CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२६८
छ. नं. ७३३
वा. वि. पु.

हैमवती

संस्कृताध्ययन-संस्थानम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२५

"सरस्वती श्रुतिमहती महीयताम्"

हैमवती

सम्पादकमण्डलम्

अम्बिकाप्रसादः अधिकारी
नयराजः पन्तः
लोकनाथः ढकालः
शिवराजः आचार्यः
ऋषिरामः पोखरेलः
विष्णुराज आत्रेयः
सिद्धिनाथः गौतमः
टीकारामः अधिकारी

प्रकाशिका

त्रिभुवनविश्वविद्यालयसंस्कृताध्ययनसंस्थानान्तर्गता
शास्त्रानुसन्धानपरिषद्

२०३२, विजयादशमी

प्रथमे वर्षे द्वितीयोऽङ्कः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयसूची --

लेखा:	लेखका:	पृष्ठाङ्काः
१. भजत संस्कृतम्	प्रा. टीकारामोऽधिकारी	१
२. स्थानपतिग्रामपञ्चायतम्	प्रा. तोयनाथपाण्डेय:	२
३. तन्त्रविषये किञ्चित्	प्रा. दुर्गाप्रसाददवाडी	५
४. राज्ञः पृथ्वीनारायणस्य मण्डल-योनिसम्बद्धस्य षाड्गुण्यस्य (परराष्ट्र-नीतेः) पद्यमयी व्याख्या	नयराज: पन्त:	१३
५. कार्तिकशुक्लपञ्चम्यां	पद्मप्रसादो न्यायाचार्यः	२०
६. श्री ५ महाराजाधिराजराज्याभिषेक-शुभ-कामना	प्रा. पुष्करनाथशर्मा पोखरेल:	२१
७. नहि ज्ञानेन सदृशं पवित्रमिह विद्यते	बद्रीपोखरेल:	२५
८. शुभराज्याभिषेको नेपालमहोत्सव:	प्रा. राधाकृष्णोऽधिकारी	२८
९. वर्तमानसमयो धर्मश्च	प्रा. रामचन्द्रपौडेल:	३३
१०. शुभाभिनन्दनम्	लोकनाथ आचार्य:	३८
११. पञ्चायत-प्रशासनस्य, राज्ञो, राज्या-भिषेकस्य च प्रशंसनम्	प्रा. लोकनाथढकाल:	३९
१२. पुराणानि शास्त्राणि चिरन्तनानि च	प्रा. विश्वनाथपोखरेल:	४३
१३. पुराणेषु श्रीमद्भागवतस्य वैशिष्टयम्	प्रा. विष्णुप्रसादज्ञवाली:	४७
१४, अपि भास्करस्य भूभानयनप्रकार: स्थूलः?	प्रा साम्वराज आचार्य:	४९
१५. काव्यप्रकाशस्याभिनवा विवृति:	प्रा. शिवराजस्य आचार्यस्य	५२
१६. शुभराज्याभिषेक: संस्कृताध्ययनसंस्था-नञ्च एकं सिंहावलोकनम्	प्रा. सिद्धिनाथगौतम:	८४
१७. पण्डितश्रीदधिरामशर्मा मरासिनी	पं. धनञ्जयमरासिनी	८६
१८. शुभकामना	पद्मनाभोपाध्यायनिरौला	८४
१९. शालग्रामशिलाष्टकम्	पं. भीमकान्त: शास्त्री	९६
२०. पण्डितश्रीबद्रीनाथसुवेदिनो जीवन-चरितम्	कुमारी भुवनेश्वरी देवी	९८
२१. दरिद्रता	पं. रामनाथ आचार्य:	१०२
२२. शिष्यादर्श:	,, ,, ,, ,, ,,	१०४
२३. प्रथमाङ्कशुद्धिपत्रम्		१०६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द. नै. ७४३
वा. वि. पु.

भजत संस्कृतम्

टीकारामोऽधिकारी
सहायकप्राध्यापकः,
वाल्मीकिविद्यापीठ–(क्याम्पस)स्य ।

हरिसमुद्भवं दिव्यवैभवमविदुषां मनोमोहभैरवम् ।
मुनिमधुव्रतैरादृतं शुभं, भजत संस्कृतं फुल्लकैरवम् ॥१॥

समभवद् यतो ब्रह्मणः पुरा, नयनगोचरं प्राकृतं जगत् ।
उत तमोऽरहः शास्त्रसञ्चयो भजत संस्कृतं कल्पभूरुहम् ॥२॥

अदितिनन्दनैः साधुसेवितं, वदनपङ्कजे पण्डितैर्धृतम् ।
कमलकोमलैर्गालकैः श्रुतं, भजत मानसाह्लादि संस्कृतम् ॥३॥

मधुरसुन्दरैर्निर्मितं पदैर्मुनिमनोहरं मेदिनीवरम् ।
भवमुमुक्षुभिः पेयमौषधं, भजत कल्मषध्वंसि संस्कृतम् ॥४॥

जगति यच्छरच्चन्द्रिकोज्ज्वलं यदुत जाह्नवीतोयनिर्मलम् ।
हरति यद्धृदाच्छादनं तमो भजत भावुकाः! साधु संस्कृतम् ॥५॥

कलकलैः कनैर्व्याकुलं जगत्, परमपावनं यत्करोति च ।
तदिह सद्धनं हृत्सरोवरे भजत संस्कृतं विश्ववैभवम् ॥६॥

जगति हाटकं यद् धनञ्जये, कुशलमानवैः संपरीक्षितम् ।
मनुजजीवनं सुन्दरं तथा भवति संस्कृतेनैव शिक्षितम् ॥७॥

पयसि संगताः कण्टकादयो जलनिधिं स्वयं प्राप्नुवन्ति हि ।
अपि तदुन्मुखा ईश्वरं जडा भजत संस्कृतं ब्रह्मदर्शनम् ॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थानपतिग्रामपञ्चायतम्

(थानपति गाउँ पञ्चायत)

–प्रा० तोयनाथ पाण्डेयः

नेपालराजधान्याः पश्चिमायां दिशि नातिदूरे प्रदेशे "स्थानपति"ग्रामपञ्चायतं परमरमणीयं विराजते। काष्ठमण्डपनगरात्सप्तक्रोशान्तरे स्थितस्यास्य पञ्चायतस्य प्राकृतिकी सुषमास्ति। पूर्वस्यां 'वोहोरे' इत्यभिधेया क्षुद्रा नदी वहति, पश्चिमायां 'छहरे' नदी पतति। उत्तरस्यां इक्षुमती (लिखु) नदी धावति। दक्षिणस्यां ककनीति शैलराजो विराजते। इयं सीमा ग्राममिमं वेष्टयति। परितो विराजमानाः कैलाश–शिवपुरी–ककनी–शैलराजाः प्रोन्नता विविधवनौषधिभिः हरितवर्णा ग्रामस्यास्य शोभामवलोकयन्ति। ककनी–शैलस्यापरपृष्ठस्य मध्यभागे प्रसृतस्य ग्रामपञ्चायतस्य हृदि स्थानपतेर्लघुमन्दिरं सुशोभते। २००० वैक्रमाब्दपर्यन्तं तस्य ग्रामस्य प्रतिगृहाङ्गणं नागरङ्ग–पनसजम्बीराम्रवृक्षाः सफला आसन्। मन्दिरं परितोऽपि वहवः फलवृक्षा आसन्। एलानां कृषिकर्म च प्राशस्त्येन भवति स्म। न जलानां न च पशुपक्षिवनोपवनानां न्यूनता। यद्यप्यस्मिन् ग्रामे चतुर्वर्णानां निवासस्तथापि ब्राह्मणा एवाधिकसख्ययाऽऽसन्। तेष्वपि थपलियेत्युपनामका ब्राह्मणा अधिकाः। तस्मिन्नेव कुले जातःकश्चिद् ब्राह्मणस्तस्मिन् ग्रामेऽधिक–भूभागस्य स्वामी आसीत्। एकदा सः ग्रामस्थात् कुटिलमतेः पुरुषात् स्वकीयं भूभागं संरक्षितुं यदाधिकरणं गन्तुकामो नुवाकोटं प्रस्थितः, तस्मिन्नेव समये महासती स्थानपतिनाम्नी भार्या सार्धक्रोशदूरे नुवाकोटमार्गस्थितं दोवाटे नाम स्थानमप्राप्य स्वगृहं नावलोकयितुं स्वपतिं जगाद। स्वपत्नीं पुत्रञ्च पोषयितुमेतादृशं कष्टमावहति पतिरिति विविच्य सा ग्रामस्थान् कुटिलान् भ्रष्टाचारिणश्च नाशयितुं स्वगृहं प्रज्वलय्य दामचन्द्रमालानामानं स्वपुत्रमङ्कमारोप्य गृहस्य मूलस्तम्भमवलम्ब्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थिता । तस्याः पतिरप्युपत्यकास्थितं दोवाटेनामस्थानं प्राप्य यदा शैलमध्यस्थितं स्वगृहं पश्यति तदा गृहदाहमद्राक्षीत् । खिन्नमनसा प्रत्यावर्त्य यदा गृहं प्राप्तस्तदा पत्नीपुत्रौ दग्धदेहौ निर्गतप्राणौ बभूवतुः । स ब्राह्मणोऽपि तत्स्थानं परित्यज्य विरहेण कुत्रचित् प्रस्थितः । तत्कालाद्वायुरूपेण चरन्तौ मातृपुत्रौ समये समये थर्पालयावर्गाणां शरीरं प्रविश्य दग्धगृहस्थले गृहमन्यन्निर्मातुं प्रेरयाञ्चक्रतुः । ततो ग्रामवासिभिश्चैकं लघुगृहं निर्मितम् । वायुदेव मत्वा तैः श्रीपञ्चम्यां, नागपञ्चम्यां, विजयादशम्यां, चण्डीपूर्णिमायां, कार्तिकशुक्लद्वादश्यां, मार्गशुक्लपूर्णिमायाञ्च पूजा समारब्धा । तासु मार्गशुक्लपूर्णिमायां रात्रौ जागरणं पूजनं होमादिकं बृहदुत्सवं कुर्वन्ति । ये ये च श्रद्धया उत्सवे समागच्छन्ति पूजयन्ति च तेषां समुन्नतिर्भवेति विश्वासः सर्वेषां ग्रामवासिनाम् । कालक्रमेण शनैः शनैरपगतश्रद्धस्य कस्यचिद् ग्रामजनस्य फलवृक्षा नष्टाः । कस्यचिद् गोमहिष्यादयो मृताः । पूर्वं वायुदेवमुपयाच्य यश्च उपयाचितं न ददाति तस्यापि हानिः । प्रत्यक्षनिन्दकाः कतिचन उन्मत्ता जाताः । गुप्तनिन्दकोऽपि उत्सवावसरे स्वशरीरस्य कम्पनं विधाय सर्वं मनसि कल्पितं कथयति । यदा कदा ग्रामे कस्यापि रोगस्य प्रकोपः संभवेत् उत्सवावसरे देवलो विकम्प्य पूर्वं सूचयति वर्णयति विविधां वायुदेवस्य तीर्थयात्राम् । मन्दिरं परितः स्थितेषु फलवृक्षेषु फलानि चोरयितुं यः कोऽपि वृक्षमारोहेत् तस्य हस्तः फलेषु संलग्नस्तावत्कालपर्यन्तं भवति यावद्देवलस्तथाविधं तं दृष्ट्वा वायुदेवं प्रति क्षमां न याचते । १९५० वैक्रमाब्दे मन्दिरस्य समीपे स्थितं नागरङ्गवृक्षं नागरङ्गं चोरयितुमारुरोह कश्चित्पुरुषो निशायाम् । अन्यस्मिन् दिवसे दशवादनसमये एकहस्तः शाखासंलग्नो दक्षिणहस्तः फलसंलग्नो नागदत्तथपलियानामक-पुरुषेण दृष्टः । स च सर्वानाहूय प्रदर्शितवान् । वायुदेवं क्षमां याचयता देवलेन पश्चान्मोचितः । तथैव १९५५ वैक्रमाब्दे क्षेत्रे धान्यराशिं परित्यज्य थर्पालयाकुलोत्पन्नौ दयानिधिटीकारामौ मन्दिरं गतौ । यात्रां दृष्टवा तदुत्तरदिने स्वक्षेत्रे गच्छद्भ्यां ताभ्यां तन्मात्रा यमुनादेव्या च कश्चिद्धान्यचौरस्तथैव चित्रवद् दृष्टः । पश्चाद्देवलो गत्वा तं मोचितवान् । १९९६ वैक्रमाब्दे कुलप्रसादनाम्ना सर्वकारकर्मचारिणा करं निश्चेतुं मन्दिरस्य भूमिं मातुं लौहशृङ्खलां स्थापयितुमारेभे, परं ग्रामवासिभिर्निवारितः । तथापि तेन हठात् स्थापिता शृङ्खला खण्डिता जाता । ततो मातुमशक्तः कुलप्रसादः खिन्नमनसा स्थितः । तस्मिन्नेव दिने नुवाकोटे तस्य ज्येष्ठपुत्रस्य वृक्षात्पतनेन मृत्युरभूदिति सन्देशोऽपि ग्रामे समागतः । २००९ वैक्रमाब्दे काष्ठमण्डपराजधान्या नुवाकोटपर्यन्तं मोटरमार्गनिर्माणाय कश्चिदेकस्तत्कर्मदक्षः कर्मचारी मन्दिरस्य भूमित एव मार्गनिर्माणं निश्चितवान् परमन्यैर्निवारितः । तथापि अन्धविश्वास इति सः स्वनिश्चये स्थितः । अन्यस्मिन् दिने तस्मिन्नेव ग्रामे सः स्वकार्यालये मृतः । एतत्कर्म वायुदेवशक्त्या वा काकतालीयन्यायेन भवेत् परं ग्रामवासिनां वायुदेवशक्तौ विश्वासः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्थं स्थानपतेर्महत्त्वं विविच्य स्थानीयजनैः सर्वकारैश्च तस्य एव नाम्ना ग्राम-पञ्चायतं निर्मितं न तस्य ग्रामस्य नाम्ना। ग्रामस्य नाम 'थापागाउँ' इत्यस्ति। इदानीं मन्दिरस्य जीर्णोद्धारो ग्रामवासिभिर्मिलित्वा कृतः। मन्दिरस्य मध्यभागे स्थाणुरग्निदग्धो ऽद्यापि तिष्ठति। देवल एकाक्येव पूजावसरे मन्दिरान्तः प्रविशति। तस्य स्थाणोः पूजां विदधाति। पश्चात्तमेव स्थाणुमवलंब्य पद्मासनेन वसति। पूर्वं मन्दिरस्याधिकारे वर्तमाना भूमिर्भूकम्प इव शब्दायमाना कम्पते। ततः पश्चाद् देवलः कम्पितुमारभते। तदा मन्दिरं परितो वर्तमाना भूमिः, मन्दिरं, तस्य द्वारस्थाऽर्गला च सर्वे देवलेन सहैव कम्पन्ते। तस्मिन्क्षणे कृशो देवलो वायुदेव इव प्रतिभाति। तस्यामवस्थायां सर्वे ग्रामजनाः स्वस्वमनोगतान् प्रश्नान् पृच्छन्ति लभन्ते चोत्तराणि। ये भूभागाः स्थानपतये समर्पिता स्तान्नान्यस्याधिकारे नेतुं वाञ्छति वायुदेव इति। अद्यावधि अपि तस्य भूभागस्य करो न गृहीतः सर्वकारैः। इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तन्त्रविषये किञ्चित्

–प्रा० दुर्गाप्रसाद दवाडी

शङ्करं शङ्करं नत्वा गुरुञ्च मुरलीधरम् ।
आगमे शङ्करप्रोक्ते किञ्चिदत्र विचार्यते ।
महत: परित: प्रसर्पतस्तमसो दर्शनभेदिनो भिदे ।
दिननाथ इव स्वतेजसा हृदयव्योम्नि मनागुदेहि न: ।।–उपमन्यु: ।

अयं हि वत्सरोऽस्माकं महते प्रमोदायेत्यत्र नास्ति कश्चन सन्देहो यतोऽस्मिन्नेव हायनेऽस्माकं भूपतेर्वीरवरस्य वीरेन्द्रवीरविक्रमशाहदेवस्य शुभराज्याभिषेकसमारोहो महता समारोहेण सम्पद्यमानोऽस्ति । समस्ते नेपालाधिराज्ये जना हर्षोत्फुल्ला मार्गा मञ्जुसंस्कृता:, भवनानि सुधालिप्तानि, देवतायतनानि सुसंस्कृतानि, जीर्णानां पुनर्निर्माणेन नवीनान्येव सम्पन्नानि, ऋतुश्च वसन्त: सम्प्राप्त एवेति प्रकृतिश्च स्वयमेवोत्फुल्ना स्वयमेवोद्यतेवाभिषेकाय । अस्मिन् समारोहे सर्वै: प्रमोदार्णवमग्नैर्जनैर्यथाशक्ति शुभेऽस्मिन्नवसरे स्वयोजना: कृता: सन्ति । वयमपि संस्कृताध्ययनसंस्थानसंस्था: प्राध्यापकाश्छात्रा: कर्मचारिणश्च किमपि कार्यं कर्तुमुद्यता: । तत्रैष प्रयासो हैमवतीप्रकाशनरूपो नूनमस्माकं भक्तिं प्रकटयिष्यति भूपतिं प्रति । वयं सनानतधर्मानुयायिनो धर्मरक्षकं राजानमीश्वररूपमेव मन्यामहे 'महती देवता ह्येषा नररूपेण तिष्ठति' 'नराणाञ्च नराधिप:' 'अष्टानां लोकपालानां मात्राभिर्निर्मितो नृप:' इत्यादिस्मृत्यभियुक्तोक्तिभी राज्ञो देवमयत्वं सुसिद्धमेव। तत्राभिषेकावसरे किं किं कार्यजातं भवति, कथञ्चाभिषेक: सम्पद्यत इत्यादिषु विषयेषु विदुषां सारगर्भा विचारा अत्रैव लेखान्तरे निरूपिता:, तद्विषये कथनं पिष्टपेषणमेव । अयञ्चाभिषेक: सनातनवैदिकविध्यनुसारेण भवन्नस्तीत्यत्र न सन्देहलेश: । न केवलं वैदिकेन विधिना अपितु तान्त्रिकेणापि विधिना तत्र यज्ञकार्याणि पूजादीनि च सम्पद्यमानानि सन्ति । सनातनधर्मानुयायिनामस्माकं ग्रामे ग्रामे पत्तने पत्तने गृहे गृहे कस्मिंश्चिदपि कार्ये वैदिकेन विधिना सह तान्त्रिकोऽपि विधि: प्रयुज्यत इत्यत्र नास्ति संशय: । केचिदाधुनिका जनास्तन्त्रशब्दमेव श्रुत्वा नासिका–कुञ्चनेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वक्रम् प्रसारणेन, स्वमुखस्य वैरूप्यसम्पादनेन च तन्त्रविषये स्वकीयां विमतिं रोषञ्च प्रकटयन्ति । मारणमोहनस्तम्भनोच्चाटनादीनामेव तन्त्रशास्त्रे प्रतिपादनं वर्तत इति केषाञ्चिद् व्यामोहोऽपि दृश्यते । केचिच्च गोप्यत्वेनात्र नास्ति किञ्चिद्रहस्यं, केवलमन्धविश्वास एव तन्त्रे प्रवर्तको वस्तुतस्तु तथ्यं नास्ति तत्रेति मन्यन्ते । केचिच्च लौकिकमेव फलं लभ्यते तन्त्रेणातो विदुषा तत्र नाभिरुचिः कर्तव्येति मन्यन्ते । एवञ्च सति तन्त्रस्य सर्वथाऽप्रामाण्यमेवापतीति किञ्चिदस्मिन् विषये विचार्यते, यतो व्याख्यानतो विशेष प्रतिपत्तिर्न हि सन्देहादलक्षणमिति वर्तत अभियुक्तोक्तिः ।

तन्त्राभिधेयः–

तत्र प्रथमं किन्तावत्तन्त्रम् ? कश्च तन्त्रशब्दार्थः ? किमागमशब्देन तुल्यार्थता तस्य नवेत्यादि विचार्यते । मेदिनीकोषकारेण–

तन्त्रे कुटुम्बकृत्ये च सिद्धान्ते चौषधोत्तमे ।
प्रधाने तन्तुवाये च शास्त्रभेदे परिच्छदे ।।
श्रुतिशाखान्तरे हेतावुभयार्थप्रयोजके ।
इतिकर्तव्यतायाञ्च · · · · · · · · · ।।

इति लिखित्वा बहवोऽर्था प्रकाशिताः । अनेनेदन्तु सिद्ध्यत्येव यत् तन्त्रं वेदस्य शाखान्तरमपि भवितुमर्हतीति ।

अमरेण तु–

तन्त्रे प्रधाने सिद्धान्ते सूत्रवाये परिच्छदे ।

इत्युक्त्वा चत्वारोऽर्थाः प्रकाशिताः । सिद्धान्तस्तु सर्वस्यैव विषयस्य कश्चन भवत्येवेति सर्वेष्वेव शास्त्रेषु तन्त्रशब्दः प्रयोक्तुं शक्यते । अमरानुसारन्तु प्रधानमपि तन्त्रमेव । प्रधानञ्च

'प्रधानं प्रकृतौ बुद्धावुत्तमे परमात्मनि'

इति हैमकोषात् प्रकृत्यादिष्वर्थेषु वर्तते । एवञ्च परमात्माऽपि तन्त्रपदाभिधेय एव ।

तन्त्रशब्दस्य व्युत्पत्तिविचारे तु 'तनु विस्तारे' इत्यस्माद् धातोर्निष्पन्नो भवति तन्त्र शब्दः । अथवा 'तत्रि कुटुम्ब धारणे' इत्यस्मादपि साधयितुं शक्यते । तनुधातोस्तनोति तन्यते अनेनेति वा विग्रहे औणादिके ष्ट्रन् प्रत्यये कृते सति तन्त्रं भवति । तत्रिधातोस्तु भावे घञि तन्त्रशब्दः तन्त्रणं तन्त्रः । अथवा तन्त्र्यते येन तन्त्र्यते यत्रेति वा तन्त्रशब्दो भवति । तथा च तनोति ज्ञानराशिं विस्तारयति, कुटुम्बं (समूहं) बिभर्ति वा तत्तन्त्रम्, यत् कस्यचिदपि ज्ञानविषयीभूतं वस्तु तत् तन्त्रम् । यःकश्चन ग्रन्थो यं कञ्चन ज्ञानविषयं विस्तारयति चेत् स तन्त्रशब्दवाच्यो भवितुं शक्नोति । एवञ्च तन्त्रशब्दो ज्ञानवाचक इत्यायाति । देवताया उपकरणादिभिः स्वाभिलषितेऽर्थे मनसो नियोजनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तन्त्रमित्यपि केचनाहुः । परमेश्वरस्य परमात्मनो वा यैर्यैरुपकरणैर्विस्तृतं ज्ञानं भवति तत्तदुपकरणं पूजा प्रकारो वा तन्त्रमित्यपरे ।

वेदस्य रूपं द्विप्रकारकं निगमरूपमागमरूपञ्च●। निश्चितं गमयति बोधयति तत्त्वनिश्चितमथवा निश्चयेन तत्त्वं गमयति, स निगमः ऋग्यजुःसामाथर्वरूपः । आगमस्तु–

आगतं शिववक्त्रेभ्यो गतन्तु गिरिजामुखे ।
मतश्च वासुदेवस्य तत आगम उच्यते ।

इति तान्त्रिका वर्णयन्ति । अनादिकालाद् गुरुशिष्यपरम्परयागतो ग्रन्थसन्दर्भ आगम इति कथ्यते । एवञ्च आङ्पूर्वकाद् गम् धातोर्निष्पन्न आगमशब्दः परम्परयैवागत इति बोधयति । किञ्च गतेश्चत्वारोऽर्था गमनमोक्षज्ञानप्राप्तिरूपाः । ज्ञानार्थे स्वीकृते गम् धातोर्निष्पन्नस्यागमशब्दस्य पूर्णज्ञानमित्यर्थोऽपि भवति । वेदशब्दस्तु विद्ज्ञाने इत्यस्मान्निष्पन्नो ज्ञानमेवार्थं गमयति । अत आगमवेदयोः समानत्वम् । आगमशब्दः प्रायः तन्त्रशास्त्रेऽपि प्रयुज्यते । वेदागमतन्त्राणां समानत्वं सिद्ध्यति । गुरुमुखाच्छ्रवणपरम्परयागतत्वेन यदि वेदेषु श्रुतिरिति व्यवहारस्तदागमानामपि तथैवागतत्वात्कथन्न श्रुतित्वम् ? हारितधर्मशास्त्रे 'अथातो धर्मं व्याख्यास्यामः, श्रुतिप्रमाणको धर्मः श्रुतिश्च द्विविधा वैदिकी तान्त्रिकी चेति' इति प्रतिपाद्य तन्त्राणामपि श्रुतित्वं प्रतिपादितम् । मनुस्मृतौ द्वितीयाध्यायस्य प्रथमश्लोकव्याख्यावसरेऽमुमर्थमुपस्थापयन् तत्र भवान् कुलूकभट्टः 'वैदिकी तान्त्रिकी चैव द्विविधा कीर्तिता श्रुतिः' इममर्थं स्वीकरोति, तन्त्रस्य श्रुतित्वञ्च प्रतिपादयति । किञ्च मनुः–

अर्थकामेष्वसक्तानां धर्मज्ञानं विधीयते ।
धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः ।

इति तस्यैवाध्यायस्य त्रयोदशे श्लोके धर्मे श्रुतेः प्रामाण्यं स्वीकरोति । अभ्युदयनिःश्रेयसहेतुर्धर्मः । तत्राभ्युदयरूपो धर्मो वेदेन प्रतिपाद्यते यतो हि चोदनालक्षणोऽर्थो धर्म इति मीमांसायां प्रतिपादितम्, चोदना च वेदस्यैवेति । निःश्रेयसन्तु वेदान्तेन प्रतिपाद्यम् । तथा च धर्मफलयोरभ्युदयनिःश्रेयसयोः प्राप्त्यर्थं यथा वैदिकविधिस्तथा तान्त्रिकविधिरपि वर्तत एव । तथा चोक्तमभियुक्तैः–

'श्रीसुन्दरीसेवनतत्पराणां भुक्तिश्च मुक्तिश्च करस्थ एव ।'

अभ्युदयनिःश्रेयसे एव भुक्तिमुक्ती । एवञ्चागमोऽपि वेदस्यैव कार्यं करोति । किञ्च वेदोऽपि मन्त्रतन्त्रागमशब्देन व्यवह्रियते । तत्र निगमागमयोरर्थभेदविचारे कृते सति निश्चयेन तत्त्वं गमयतीति निगमः, आप्तवचनादाविर्भूतमर्थविशेषसंवदनमागम इति

●अयं विचार, एतादृशा अन्ये विचाराश्च निबन्धकस्य (–स. स.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्युत्पत्तिः कर्तुं शक्यते । परमाप्तस्तु परमेश्वर एव । तत्र निगमः परमात्मनिःश्वसितरूप आगमस्तु तद्वाग्रूपस्तेन निगमागमौ सहयोगिनावेव । तत्रागमतन्त्रयोः पर्यायत्वमिति पूर्वमेवोक्तम् ।

तन्त्रस्य प्रतिपाद्यो विषयः–

तन्त्रविषयस्य सुमहति क्षेत्रे वर्तमाने सत्यपि वर्तमाने काले जनाः मन्त्रयन्त्रादि साधनं, पुरश्चरणं, उच्चाटनस्तभनमारणादिकमेव तन्त्रस्य विषया इति मन्यन्ते । सत्यप्येतस्मिन् विषये किञ्चित् सत्यत्वं आंशिकसत्यत्वमेव । सत्यमेते विषयास्तन्त्रस्य नत्वेतावन्त एव । युगह्रासानुरूपतः कलौ तन्त्रोक्त आचार एव चलति । तथा चोक्तम् ।

कृते श्रुत्युक्त आचारस्त्रेतायां स्मृतिसम्भवः
द्वापरे तु पुराणोक्तः कलावागमसम्मतः ।

अन्यच्च–

सत्यं सत्यं पुनः सत्यं सत्यमेव मयोच्यते ।
विना ह्यागममार्गेण गतिर्नास्ति कलौ प्रिये ।।
आगमोक्तविधानेन कलौ देवान् यजेत् सुधीः ।

तथा च–

कलावागममुल्लङ्घ्य योऽन्यमार्गे प्रवर्तते
न तस्य गतिरस्तीति सत्यं सत्यं वदाम्यहम् ।।

एवञ्च–

कलौ तन्त्रोदिता मन्त्राः सिद्धास्तूर्णफलप्रदाः । इति

वयञ्च प्रतिदिनं यत् स्तोत्रपाठादिकं कर्म कुर्मो देवतानां पूजनञ्च तत्सर्वं तान्त्रिकमेव । अद्यत्वे केवला वैदिका यज्ञा न दृश्यन्ते किन्तु यज्ञैः सह गणपतिकलशदीपपूजनादिभिः सह रुद्राभिषेकस्तत्पूर्वाङ्गभूतरुद्रपूजनमपि दृश्यते; सर्वमेतत्तान्त्रिकमेव । किञ्च सर्वत्र देवालयेषु पशुपतेः, कालिकायाः पराम्बाया गुह्येश्वर्याश्च पूजनं भवति तत्सर्वं तान्त्रिकमेव । होमकर्मणि पशुविशसनादिकं वैदिकं कमजातमद्य विलुप्तमिव । नहि सामयागः साधारणेन जनेन कर्तुं शक्यो रुद्राभिषेकस्तु शक्यत एव । नैवाद्य गोमेधाश्वमेधनरमेधादयो भवन्ति किन्तु गवादिशब्दानां मेधशब्दस्य च अर्था एव भिन्ना इति प्रतिपाद्यते । तन्त्रस्य नैतावानेव विषयः, तस्य क्षेत्रे दर्शनं, विज्ञानं, व्यवहारः, कला, साहित्यमित्यादयोऽनेके विषया आगच्छन्ति । प्रजातन्त्रगणतन्त्रलोकतन्त्रादिष्वपि तन्त्रशब्दो व्यवहृतो दृश्यते । आख्यायिकारूपाः पञ्चतन्त्रादयो राजनीतिग्रन्थाः स्पष्टं प्रतिपादयन्ति यद्राजनीतिशास्त्रमपि तन्त्रपदाभिधेयमेव । महाकविना माघेन तन्त्रशब्दो बह्वर्थकः प्रयुक्तः स्वकाव्ये–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तन्त्रावापविदा योगैर्मण्डलान्यधितिष्ठता ।
सुनिग्रहा नरेन्द्रेण पन्नगा इव शत्रवः ।।

एतस्य श्लोकस्य व्याख्यावसरे मल्लीनाथसूरिणा तन्त्रशब्दस्यार्थं कुर्वता 'तन्त्रावापौ स्वराष्ट्र–परराष्ट्रचिन्तनम् अन्यत्र शास्त्रौषधप्रयोगञ्च वेत्ति यस्तेन तन्त्रावापविदा' इति व्याख्याय 'तन्त्रः स्वराष्ट्रचिन्तायामावापः परचिन्तने । शास्त्रोषधान्तमुख्येषु:"' इति वैजयन्तीकोषोऽप्युद्धृतः ।"तन्त्रशब्दो दर्शनार्थकः" इति प्रतिपादितं सांख्यकारिकाया-मीश्वरकृष्णेन–

एतत्पवित्रमग्र्यं च मुनिरासुरयेऽनुकम्पया प्रददौ ।
आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम् ।।

किञ्च पुनः

सप्तत्या किल ये ऽ र्थास्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य
आख्यायिका विरहिता परवाद विवर्जिताश्चापि ।

तन्त्रभेदाः–

यद्यपि तन्त्रशब्दो बहुष्वर्थेषु प्रयुक्त स्तथापि वयन्तु तन्त्रस्यागमापरपर्यायस्यैव शास्त्रीयान् भेदान् प्रकटीकर्तुकामाः । आगमस्य श्रुतित्वमपि कथितमेव । वेदेषु पूर्वं प्रवृत्तिरूपो धर्मो व्याख्यातो यस्य व्याख्या अथातो धर्मजिज्ञासा, चोदनालक्षणोऽर्थो धर्म इत्यादिभिः पूर्वमीमांसायां कृता, निवृत्तिरूपश्च धर्मः अथातो ब्रह्मजिज्ञासा जन्माद्यस्य यत इत्यादिभिरुत्तरमीमांसासूत्रैर्व्याख्यातः । उभयोश्च धर्मयोःफले अभ्युदयनिःश्रेयसरूपे, यथाह भगवान् कणादः 'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्म' इति । त एव फले भुक्ति-मुक्ति–रूपेणागमागमेषु प्रतिपाद्येते । उभौ च धर्मौ शैवागमेषु पशुधर्म–पतिधर्म–शब्दाभ्यामुच्येते । एवञ्च फले साधनेऽपि वेदागमयोःसमानत्वम् किन्तु साधनस्य मार्गे भेदाः । वेदविहितोऽद्वैतमार्गः परमकठिनः ।

तथा च श्रुतिः 'क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदन्ति'
अपराऽपि 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह'

'नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा ।
अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते ।। कठ० २।३।१२'

'नेदं यदिदमुपासते'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यादिभिः सर्वथा कठिनत्वं प्रतिपादितं वर्तते। आगममार्गस्त्वतीव सरलः। तथाचोक्तमीश्वरप्रत्यभिज्ञायामुत्पलाचार्येण–

'इति प्रकटितो मया सुघट एष मार्गो नव'

शिवदृष्टौ च सोमानन्दाचार्येण–

ज्ञाते शिवत्वे सर्वस्थे प्रतिपत्त्या दृढात्मना।
करणेन नास्ति कृत्यं क्वापि भावनयाऽपि वा।
सकृज्ज्ञाते सुवर्णे किं भावनाकरणादिना।
सर्वथा पितृमात्रादि तुल्यदार्ढ्येन सत्यता॥

अस्य मार्गस्य सारल्ये हेतुस्तु भक्तिरेव। तथा चोक्तमागमे–

भक्ति–लक्ष्मी–समृद्धानां किमन्यदुपयाचितम्।
एतया वा दरिद्राणां किमन्यदुपयाचितम्।

तथा चात्रोपास्योपासकभावो वर्तते न च वेदान्तवत्तन्निषेधः।

एवञ्चागमाः शिवस्य, विष्णोः, शक्तेः, बुद्धस्य, जिनस्य वा परमेश्वरत्वं प्रतिपादयन्तः शैवागमवैष्णवागमशाक्तागमबौद्धागमजैनागमादिभेदेन भिन्नाः। ते च पुनः प्रत्येकं बहुधा भिन्नाः। वैष्णवागमाः वैखानसपाञ्चरात्रभेदेन भिन्नाः। तयोरपि भेदयोरनेक उपभेदाः। शैवागमश्चतुर्विधः शैवपाशुपतसोमनाकुलभेदेन। वामो दक्षिणः सिद्धान्तश्चेति त्रयोभेदाः शैवागमस्य। कापालकालामुखाघोरेत्यादयो वामशैवागमाः। त्रिकसिद्धान्तापरनामान काश्मीरशैवागमाः, दक्षिणकामिकाद्यष्टाविंशतिशैवागमानां सिद्धान्तशैवागमत्वम्॥

शिवशक्तेः स्वरूपम् वेदान्तिनस्तु मायारूपां शक्तिं स्वीकृत्य तस्या अनिर्वचनीयत्वं मिथ्यात्वञ्च प्रतिपादयन्ति। सा च माया अचिन्त्यदुर्घटकार्यसम्पादिका 'विष्णोर्माया भगवती यया सम्मोहितञ्जगत्'। शैवदर्शनानुसारं सा परमेश्वरस्य शिवस्य स्वातन्त्र्यरूपा। योगदर्शने च चिद्रूपा स्वीकृता 'चितिशक्तिरपरिणामिन्यप्रतिसङ्क्रमा शुद्धा चानन्ता च' इति निरूपितम् योगसूत्रव्यासभाष्ये। सा च शक्तिः शैवागमे शिवस्य स्वीकृतानन्तरूपात्मिकाऽपि चिदानन्देच्छाज्ञानक्रियारूपा पञ्चविधा मुख्यरूपेण। चितिः स्वतन्त्रा विश्वसिद्धिहेतुः, स्वेच्छया स्वभित्तौ विश्वमुन्मीलयतीति प्रत्यभिज्ञासूत्रे स्तः। सा च शिवाभिन्नाऽपि शिवस्य शिवत्वसाधिका। अत एवोक्तं शङ्कराचार्यैः सौन्दर्यलहर्याम्–

शिवः शक्त्या युक्तो भवति यदि शक्तः प्रभवितुम्।
न चेदेवं देवो न खलु सफलः स्पन्दितुमपि॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कामकलाविलासे च पुष्पा… (ण्या)–नन्देन–

सा जयति शक्तिराद्या निजसुखमयनित्यनिरुपमाकारा ।
भावि चराचरबीजं शिवरूपविमलनिर्मलादर्शः ।।

शक्तिं विना किमपि कर्म नचलतीति सर्वेषामेव शाक्तत्वम् । शैवादर्शनानुसार–मस्याः शक्तेर्न परिणामः किन्तु प्रसारसङ्कोचावेव । शक्तिरेव जगद्रूपेणप्रसरतीति शैवाः । जीवश्च चिच्छक्तिरूप एव । एवञ्च शाक्तागमस्यैव प्रधानत्वेऽपि तस्य अतिगुह्यतया, गुरुमुखैकगम्यतया च प्रकाशनं न सञ्जातम् । शाक्तागमानां गुणदेशकालाम्नायादि भेदेनाऽनेके भेदाः । गुणानुसारं सात्त्विकागमानां तन्त्रसंज्ञा, राजसागमानां यामलसंज्ञा तामसागमानाञ्च डामरसंज्ञा वर्तते । शाक्तागमप्रतिपादिका काश्चिदुपनिषदोऽपि वर्तन्ते–कौलोपनिषत्, त्रिपुरामहोपनिषत्, कालिकोपनिषत्, तारोपनिषदाद्याः ।

बौद्धागमास्तु प्रथमं हीनयान–महायानभेदेन द्विविधाः । महायानमपि पारमिता-यान–तन्त्रयानभेदेन द्विविधम् । तन्त्रयानमेव वज्रयानरूपेण परिणतं सत् मन्त्र-यन्त्र-तन्त्राणां साधने प्रवृत्तम् । हीनयानमार्गः स्वमुक्तये एव वर्तते चेन्महायानमार्गस्तु निः-शेषसत्त्वहितेच्छया बोधिसत्त्वमुपलब्धुं प्रेरयति ।

जैनशास्त्रेष्वपि तन्त्रणामागमशब्देनैवोल्लेखो वर्तते । रोगाणां निवारणाय मन्त्राणामुपयोगो विहितो वर्तते जैनाचार्यैः । पताकायन्त्र, अङ्कयन्त्ररेखायन्त्राक्षर-यन्त्रादीनि यन्त्राणि जैनागमे वर्तन्ते । जैनाचार्यैं विद्याकल्पशब्दयोः प्रयोगो विहितः । तथा च तेषां ग्रन्था बहवो वर्तन्ते । जैनश्रमणेषु शक्तिपूजनमपि विद्यते । चक्रेश्वर्य-जितादिदेवीनामुपासना सुप्रचलिता वर्तते । मन्त्राणां साधनं यन्त्राणां निर्माणञ्च शाक्ता-गम इव जैनागमेऽपि लभ्यते ।

आगमस्य महत्त्वम्

वाराहीतन्त्रानुसारम्–

सृष्टिश्च प्रलयश्चैव देवतानां तथार्चनम् ।
साधनञ्चैव सर्वेषां पुरश्चणमेव च ।।
षट्कर्मसाधनञ्चैव ध्यानयोगश्चतुर्विधः ।
सप्तभिर्लक्षणैर्युक्तमागमन्तद् विदुर्बुधाः

इति यदागमलक्षणं तदनुसारं यदि पर्यालोच्यते तदागमस्य महत्त्वं स्वतः सिद्धमेव । किञ्चानेनाभ्युदयनिःश्रेयसयोः प्राप्तिसम्भवः । शब्दस्य प्रभावस्तु सर्वैः स्वीक्रियत एव । मन्त्राश्च शब्दरूपा एव । शब्दस्य माहात्म्यमुद्भावयता तत्र भवता भर्तृहरिणोक्तम्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बाग्रूपताचेदुत्क्रामेत्

न प्रकाशःप्रकाशेत सा हि प्रत्यवमर्शिनी ।

किञ्च

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।

अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।।

मन्त्रयन्त्रतन्त्राणां शब्दात्मकत्वं न तिरोहितं सर्वेषाम् । भगवन्नाम्नो भगवतश्च मध्ये कस्य ज्यायस्त्वमिति विचारे नाम्न एव श्रेष्ठत्वं सिद्धयति, रूपन्तु नामाधीनम् यतो हि रूपज्ञानं नामविहीनं न भवति । नाम्नो ज्ञानं नास्ति चेत्करतलस्थितस्यापि-वस्तुनःपरिचयदानं कठिनम् । रूपमदृष्ट्वैव नाम्नि स्मृते रूपस्य स्मृतिर्भवति । मन्त्राणामलौकिकः प्रभावो भवति। तेषां कश्चिदर्थो भवतु न बा भवतु। तथा चोक्तम् महाकविना तुलसीदासेन रामचरितमानसे–

कलि बिलोकि जगहित हरगिरिजा । साबर मन्त्रजाल जेहि सिरिजा
अनमिल आखर अर्थ न जापू । प्रकट प्रभाव महेस प्रतापू ।

अयमाशयः– कलियुगं दृष्टवा संसारस्य कल्याणाय शङ्करपार्वतीभ्यां शाबर-मन्त्राणां सृष्टिर्विहिता । तेषां मन्त्राणामक्षराणि न मिलन्ति अर्थो न विद्यते तथापि प्रभावस्तु प्रत्यक्षमनुभूयतेऽवलोक्यते चात्र महेशस्य प्रभाव एव कारणम् ।

अस्माकमयं देशः पाशुपतक्षेत्रम् । पराम्बाया गुह्येश्वर्याः परमभट्टारकस्य पशुपतेश्चात्र पूजा प्रत्यहं तान्त्रिकेण विधिना भवति । आभ्यामेव पार्वतीपरमेश्वराभ्यां पालितोऽयं देशः । "एवञ्चागमशास्त्रप्रवर्तकयोर्जगतः पित्रोरनयोःसेवकार्हतां प्राप्तुमपि आगमशास्त्राध्ययनमतीवावश्यकम् । शैवागमशाक्तागमयोरध्ययनस्य प्रबन्धोऽवश्यं विधेयो वर्तते ऽस्यदेशस्य कृते" इति निवेद्य विरम्यते ।

★★

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राज्ञः पृथ्वीनारायणस्य मण्डलयोनिसम्बद्धस्य षाड्गुण्यस्य (परराष्ट्रनीतेः) पद्यमयी व्याख्या

– नयराजः पन्तः

मूलपाठः

उप्रान्त ।। यो राजे दुई ढुंगाको तरूल जस्तो रहेछ.

चीनबादसाहसित ठुलो घाहा राष्नु.

दषिनको समुन्द्रका बादसाहसित घाहा ता राष्नु. तर त्यो महाचतुर छ. हिन्दुस्थाना दबाईराषेछ. सरजिमीमा परिरहेछ. हिन्दुस्थाना जाग्यो भन्या कठिन् पर्ला भनि किल्ला षोजन आउन्या छ. सन्धीसर्पन हेरि गडि तुल्याइ राष्नु र रस्ता रस्तामा भाजा हालि राष्नु र यक दिन त्यो बल आउन्याछ. जाइ कटक् नगर्नु. छिरी कटक् गर्नु र चुरेघाटिमा षुपै काटिन्याछ. पाच सात पुस्तालाई षजना पनि मिल्नेछ. श्रीगंगाजिको साध पनि लाग्नैछ. लडाईमा पुकेन भन्या लोलोपीतो अनेक कलछल गरिकन पनि

संस्कृतभाषायामनुवादः

अथ नेपालराज्यमिदं पाषाणद्वयान्तरालोद्भवेन दीर्घकन्देन सदृशं प्रतिभाति ।

चीनचक्रवर्तिना सह सुश्लिष्टः सन्धिर्विधेयः ।

दक्षिणस्यां दिशि वर्तमानेन समुद्राधिपतिनाऽपि सह सन्धिस्तु कर्तव्यः । परं स महाचतुरो वर्तते, भारतवर्षं वशीकुर्वन्नस्ति । तस्य प्रतिवेशिभिः साकं सङ्घर्षो वर्तते । भारतीया राजानश्चेत् संघट्टिता भवेयुर्ममाऽऽपदुदियादिति सोऽत्र दुर्गमन्वेष्टुमागमिष्यति । सञ्चराणामानुकूलिकतां विभाव्य दुर्गाणि रचयत । मार्गे मार्गेऽवरोधान् स्थापयत । कस्मिंश्चिद् दिने तद् रिपुचक्रं पुरा समेति । परभूमौ गत्वा सङ्ग्रामं न कुरुत । स्वभूमिं रिपौ प्रविष्टे सङ्ग्रामं कुरुत । चूरेपर्वतस्य कटकान्तरे प्रभूता रिपुसेना क्षयमेष्यति । तत्र लब्धानि युद्धोपकरणानि पुत्रपौत्रीणतां गमिष्यन्ति । अस्मद्राज्यसीमा श्रीगङ्गां समेष्यति । सङ्ग्रामे पराजयमनुभूय रिपुर्दाक्षिण्यमालम्बमानोऽनेकान् कपटमार्गाननुसरिष्यति ।

पद्यमयी व्याख्या

आस्ते नेपालदेशो भरतवसुमतीचीनयोर्मध्यवर्ती,
स्तः साम्राज्ये उभे ते प्रथितबहुबले विस्तृते विश्रुते च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साम्राज्यद्वन्द्वसीमायुगमपि वपुषा गाहमानो निजेन
नेपालः स्वल्पदेहो ऽप्यधिधरणि चिरात् संस्थितिं स्वां बिभर्ति ॥१॥
ते साम्राज्ये उभे च प्राणहितमनसी दत्तनेत्रे सदैव
कार्ये नैपालके स्तो निजहितविधये स्पर्धमाने मिथश्च ।
साम्राज्यद्वन्द्वनीत्योरपि निजनयने प्रेषयन्तः स्वकीये
सामर्थ्ये तिष्ठमाना (१) वयमपि सततं जागरूका असाम ॥२॥

नेपालादुत्तरस्यां दिशि विपुलतरो वर्तते चीनदेश-
स्तं मञ्चूवंशजातः पृथुतरमहिमा शास्ति राजाधिराजः ।
मञ्चूवंश्यस्य वश्या धरणिपतिपतेः सन्ति देशाः प्रभूता
आस्ते चीनाधिराजः ककुभि धनपतेश्चक्रवर्ती प्रसिद्धः ॥३॥
चीनेशा भूपतीशा बहुतिथसमयादेव नेपालपाश्च
काले काले स्वदूतैर्विदितपरिचया आसतेऽन्योन्यमेव ।
अत्यन्तं दूरगत्वाद् विषमपथतया कष्टदत्वाद् गमस्य
सम्बन्धस्तु प्रजानां भवति तनुतरश्चीननेपालजानाम् ॥४॥
प्राकाराकार आस्ते तुहिनवृततनुः शैलराजाधिराज-
स्तस्योदीच्यं विभागं श्रयति जनपदो भोटनाम्ना प्रसिद्धः ।
याम्यं भागं हिमाद्रेः श्रयति जनपदः ख्यातनेपालनामा,
वर्तेते संनिकृष्टौ श्रिततुहिनगिरी भोटनेपालदेशौ ॥५॥
भोटे देशे कुलीना धरणिपरिवृढा नाऽऽसते किन्तु तस्मिन्
देशे लामाभिधाना विदधति नृपतां भिक्षुवेषा मठेशाः ।
याते पूर्वे मठेशे सुरपुरमपरो भिक्षुराप्नोति पीठं
वैधस्तस्याऽभिषेको भवति यतिपतेश्चीनपालानुमत्या ॥६॥
भोटं स्वैरं प्रशास्ति प्रतनुजवनिकान्तर्हितश्चीनसम्राट्,
सम्बन्धा भोटनिष्ठा विविधविषयकाः सन्ति नैपालकानाम् ।
सम्बन्धी भोट आस्ते, तदधिपतिपतिर्वर्तते चीननाथ-
स्तस्माद् दूरोऽपि सम्राट् स भवति निकटो दर्शने त्वस्मदीये ॥७॥
अास्माकाः सार्थवाहा बहुतिथसमयाद् भूरिपण्या व्रजन्ति
भोटं, तस्मिन् निषद्या अधिपुरि बहवः सन्ति नैपालकानाम् ।
भोटस्था अस्मदीयाः क्वचन नहि जना कष्टभाजो भवेयु-
रित्यर्थश्चिन्तनीयः सततमवहितैरस्ति नेपालपालैः ॥८॥

---

(१) स्थेयार्थे आत्मनेपदम्   निषद्या = आपणः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्माकं बाह्यनीतिः स्पृशति जनपदं भोटमस्यैव हेतोः
स्वच्छन्दा भोटनीतिर्नहि चलति परं साऽस्ति चीनस्य वश्या ।
अत्यन्तं विप्रकृष्टे प्रकृतिनियमतश्चीननेपालनीती
जायेते पृक्तदृष्टी विदितपरिचये भोटदेशं प्रपद्य ॥९॥
आस्ते चीनाधिराजः प्रथितबहुबलोऽत्यन्तविस्तीर्णराज्यः
सम्राजा तेन साकं भवतु सुघटितः श्रेयसे सन्धिरेव ।
भोटे नैपालकानां भवतु हितमथो सौम्यसीमासुरक्षा
नेपालस्याऽस्तु चेति प्रणिहितहृदयाश्चीनमैत्रीं विधत्त ॥१०॥

नेपालाद् दक्षिणस्यां दिशि निकटतरं भारतं वर्षमास्ते,
तत्राऽऽस्तेऽङ्ग्रेजजातिः प्रतिदिनमधुना वर्द्धमानप्रतापा ।
दूरे मध्येसमुद्रं निजजननमही वर्ततेऽङ्ग्रेजजातेः,
सा षाड्गुण्यं प्रयुक्ते भरतवसुमतीं जेतुकामा समग्राम् ॥११॥
सम्बन्धा अस्मदीया बहुलविषयका आसते भारतेन,
सन्धिः स्याच् श्रेयसेऽतः सितमुखपतिना भारतस्थेन सार्धम् ।
किन्त्वास्ते धूर्तराजः सितमुखनृपतिस्तेन सार्धं विधातुं
सन्धानं तच्चरित्रं प्रणिहितमनसा सम्यगालोचनीयम् ॥१२॥
आपारावारकूलं बहुलजनपदं भारतं वर्षमास्ते
साम्राज्यं भारतीयं मुगलकुलभवैर्भुज्यते भूमिपालैः ।
एते भूपा बभूवुः सकलभरतभूक्रान्तिदृष्टप्रतापाः
शक्त्या नीत्या च सर्वानपि धरणिभुजस्त्रासयामासुरेते ॥१३॥
वाणिज्यं कर्तुकामाः कतिचन चतुरा जातयो बद्धसङ्घा
दूराद् यूरोपदेशाज्जलधिपरिवृताद् भारतं वर्षमायन् ।
विद्या सांयात्रिकैस्तैः कुहकविषयका● वर्ततेऽभ्यस्यमाना,
धूर्तास्वेतासु जातिष्वपि चतुरतमा वर्ततेऽङ्ग्रेजजातिः ॥१४॥
स्वामिन् राजाधिराज प्रभुवरचरणं सेवितुं दूरदेशा-
दागच्छाम प्रभूतं बहुदिवसभवं मार्गकष्टं विषह्य ।
राजेन्द्रं सेवमाना अवनतशिरसो भारते वर्तमानाः
सम्यक् शुल्कं ददाना नियममनुगताः कुर्महे पण्यवृत्तिम् ॥१५॥
न्याय्याचारादपेतं क्वचन किमपि नो कुर्महे कार्यजात-
मस्माकं भारते स्याद् वसतिरनुमता राजराजप्रसादात् ।

●कुहकविषयका = इन्द्रजालविषयका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्थं राजाधिराजं मुगलकुलभवं प्रार्थयन्ति स्म शश्व-
दङ्ग्रेजाः सार्थवाहा अधिकृतपुरुषान् पूजयन्ति स्म रत्नैः ।।१६।।
आयं शुल्कात् समुत्थं विपुलतरमिमे सार्थवाहा विदध्युः,
संपद्येरन् पदार्था अपि सुलभतरा दूरदेशान्तरस्थाः ।
इत्थं सञ्चिन्त्य सम्राड् मुगलकुलजनिः प्रार्थनां स्वीचकार,
स्थाने स्थाने बभूवुर्भरतभुवि शनैरापणा आङ्ग्लजातेः । १७।।
आङ्ग्लश्रेणी बभार प्रतिदिवसमिव श्रीकृपादृग्विलासान्,
सा श्रेणी मन्दमन्दं लघुतरधरणीपालरूपं च भेजे ।
नौकायाने प्रवीणा मुगलनृपचमूं सिन्धुयुद्धे जयन्ती
सा श्रेणी मन्दमन्दं भरतधरणिजां राजनीतिं सिषेवे ।।१८।।
नाऽसीत् सम्यक्प्रतिष्ठा मुगलनृपकुले यौवराज्यव्यवस्था,
तस्मात् सर्वे कुमारा धरणिपतिपदे बद्धतृष्णा बभूवुः ।
ताते रुग्णे मृते वा नृपतिपदकृते मौगला राजपुत्रा
अन्योन्यं युध्यमाना व्यतनिषत पृथुं प्राणहानिं व्ययं च ।।१९।।
धर्मान्धित्वं प्रपन्नाः कतिचन मुगलाः सार्वभौमा बभूवु-
र्वैराग्यं तन्नयेन प्रकृतिषु शनकैर्बद्धमूलं बभूव ।
छिद्रं साम्राज्यगेहे व्यधिषत मुगलैर्बद्धवैरा मराठा,
मन्दं मन्दं प्रतापो मुगलकुलभवः क्षीयमाणो बभूव ।।२०।।
विक्रान्तः पारसीको भरतवसुमतीं नादिरो भूरिसैन्य
आमच्छद् राजधानीं क्षतहृतविभवां कारयामास दिल्लीम् ।
उष्ट्राद्यैर्वाहयित्वा मणिकनकचयं नादिरे स्वीयदेशं
याते वीक्षाम्बभूवे मुगलकुलभवा दीनता सर्वलोकैः ।।२१।।
इत्थं राजाधिराजे मुगलकुलभवे क्षीयमाणप्रतापे
राजस्थानीयवर्गे प्रसभमिव पदं वंशसात्कर्तुकामे ।
साम्राज्याद् मन्दमन्दं पृथगिव विषयो दाक्षिणात्यो बभूव,
बङ्गालोऽभूत् तथैवाऽनुकरणमवधे तस्य कार्यस्य जज्ञे ।।२२।।
दीनाऽऽवस्था च राजव्यसनसमुदिता भारतं वर्षमेव
व्याप्नोत्, तस्याः स्वरूपं प्रकटितमभवद् बङ्गदेशे निकृष्टम् ।
सेनान्या कारयित्वा निजधरणिभुजे द्रुह्यता युद्धभूमौ
विद्रोहं गर्धयित्वा तमपि च वणिजः प्रापुराङ्ग्ला नृपत्वम् ।।२३।।
स्पर्धा सांयात्रिकाणां विविधजनपदस्थायिनां वर्ततेऽस्मा-
दात्माधीनां वणिज्यां रचयितुमनसः कुर्वते संयुगांस्ते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाणिज्यं भारतीयं वशयितुमनसां साम्प्रतं नैगमानां
नौयानेऽतीव दक्षा रणभुवि जयितां प्राय आङ्ग्ला लभन्ते ॥२४॥
मैसूराख्ये प्रदेशे जलनिधिनिकटे दक्षिणस्यां दिशायां
भूपालो वीर्यशाली यवनकुलजनिर्वर्तते हैदराख्यः ।
जित्वा सङ्ग्रामभूमौ सितवदनचमूं विद्रुतां कुर्वतोऽस्य
स्मृत्वा स्मृत्वाऽवदानं भयचकितमना जायतेऽङ्ग्रेजलक्ष्मीः ॥२५॥
वर्तन्ते सांयुगीना अपरजलनिधेः सन्निधिस्था मराठा,
दासीकर्तुं न शेकुर्मुगलकुलनृपा हिन्दुवंश्यान् मराठान् ।
स्वैः सैन्यैः सञ्चरन्ते भरतवसुमतीं कम्पयन्तो मराठा-
स्तेभ्यः संत्रस्तचित्ता निशि शयनसुखं नो लभन्ते सितास्याः ॥२६॥
दायादैः पीड्यमानो मुगलकुलनृपो★ निर्ययौ राजधान्या,
वंश्यं साम्राज्यपीठं सितवदनबलादात्मसात् संविदध्याम् ।
इत्याशाबद्धचित्तः सितवदनकरे सोऽधिकारं प्रभूतं
प्रायच्छत्, किन्तु काले गतवति बहुलेऽपीप्सितं नाऽऽससाद ॥२७॥
आत्मानं गौरवक्त्रैर्मुगलकुलनृपो विप्रलब्धं विचार्य
वीक्षाञ्चक्रे मराठान् सितवदनरिपून् मित्रतापूर्णदृष्टया ।
तस्मिन् भूपे मराठाभलपतिसहिते देहलीं राजधानीं
सानन्दं संप्रविष्टे सितमुखहृदयं दीर्घचिन्ता विवेश ॥२८॥
आर्यावर्ते मराठाबलमभिभवितुं साम्प्रतं कोऽपि नेष्टे,
त्वां मां हन्युर्मराठा इति सितवदनो हिन्दुभीतिं प्रदर्श्य ।
स्वल्पं खण्डं धरित्र्या अवधनृपतये ● म्लेच्छवंशोद्भवाय
दत्वा सन्तोष्य भीतं प्रमुदितमनसं चाऽकरोत् तं स्वपक्षे ॥२९॥
आस्ते शूरं मराठाबलमतिबहुलं सर्वतः सञ्चरिष्णु,
कर्तव्ये तन्निरोधे तदधिकविनयं भूरि सैन्यं विधेयम् ।
मा भूच्चिन्ता त्वदीया भटगणविनये, द्रव्यचिन्ताऽस्ति किञ्चि-
दित्यादत्ते पटीयानवधनरपतेरर्थराशिं सितास्यः ॥३०॥
साहाय्यं कर्तुकामा अवधनरपतेर्युद्धभूमौ धनार्थं
गत्वा पञ्चालदेशं यवनकुलभवैः सांयुगीनै रुहेलैः ।
सार्धं घोरं सितास्या व्यधिषत समरं, बद्धसङ्घा रुहेलाः
स्वातन्त्र्यं त्रातुकामा अशयिषत रणे भूरिसङ्ख्याश्चिराय ॥३१॥

★द्वितीयः शाहः आलमः । ●अवधनृपतिः सुजाउद्दौला ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्योन्यं युध्यमाने भरतवसुमतीपालवर्गे सितास्य
एकस्याऽऽदाय पक्षं परनृपतिमहीमात्मभोग्यां विधत्ते ।
एतद्रीत्या समस्तान् भरतवसुमतीपालकान् नाशयित्वा
साम्राज्यं भारतीयं सितवदनपतिर्वर्तते भोक्तुकामः ॥३२॥

जानीयुः कालगत्या भरतवसुमतीपालका एतमर्थं
दीप्येत क्रोधवह्निः प्रतिसितवदनं तुल्यरूपस्तदीयः।
तस्मिन् काले शरण्यो नहि भवति पुरा गौरवक्त्रस्य कश्चि-
ज्जानीते सूक्ष्ममेतं विषयमतिपटुर्गौरवक्त्राधिराजः ॥३३

आपत्तौ दुर्गमेव प्रभवति शरणस्थानमस्माकमस्माद्
दुर्गाणां दुर्ग्रहाणां भवति विरचना सर्वतः श्रेयसे नः।
नेपाले शैलदुर्गं भवति हितकरं चेति चित्ते विभाव्य
नेपालं जेतुकामो न भवति न पुरा गौरवक्त्राधिराजः ॥३४॥

अस्मानुच्छेत्तुकामाः समय उपगते स्वानुकूले सितास्या
आगच्छेयुः प्रभूतोपकरणसहिता भूरिसैन्याः प्रसह्य ।
अस्माभिश्च व्यवस्था समुचितविधिना युद्धहेतोर्विधेया,
किं वा राष्ट्रं निपात्य स्वयमपि पतितैर्म्लेच्छदास्यं निषेव्यम् ॥३५॥

युष्माभी राष्ट्ररक्षा प्रणिहितहृदयैः सर्वदा चिन्तनीया,
पन्थानः सर्व एव स्वजनपदभवाः साधुरीत्या परीक्ष्याः।
मा भूच्छत्रोः प्रवेशः स्वजनपद इति प्रेक्षया तस्य मार्गः
कार्यः कूटावपातप्रहिखरसिकताकण्टकादिप्रकीर्णः ॥३६॥

अस्माकं राष्ट्रमेतद् वशयितुमनसो दक्षिणस्या दिशाया
आगच्छन्ति प्रभूता अहितजनभटा यावदित्थं विचार्य ।
स्थाने युद्धेऽपसारेऽपि समुचिततरान् भूमिभागान् परीक्ष्य
दुर्गाणां दुर्ग्रहाणां भवतु विरचने युष्मदीयः प्रयत्नः ॥३७॥

कस्मिंश्चित् स्वानुकूलेऽहनि सितमुखगो व्याजमादाय कञ्चिद्
नेपालं जेतुकामो घटितवहुबलो निश्चयं विग्रहीता ।
आङ्ग्ले युद्धे भवद्भिस्त्ववहितहृदयैः स्थायिता सेवनीया,
यायित्वं युष्मदीयं नहि भवति पुरा तत्र कल्याणकारि ॥३८॥

चूरेनाम्ना प्रसिद्धे शिखरिणि कटके वर्तमानाः कठोराः
सङ्कीर्णाः सन्ति मार्गा, वसतु दृढबला तत्र सेनाऽस्मदीया ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रैवाऽऽङ्गलध्वजिन्या सह भवतु रणो, भूरयः शत्रुसैन्या
गच्छेयुः प्रेतराजाधिपपुरमपरे क्वाऽपि दूरं पलाय्य ॥३९॥

युष्माभिर्हन्यमाना सितमुखपृतनाऽनुक्षणं क्षीयमाणा
सङ्ग्रामे शस्त्रजातं निजमपि भविता रक्षितुं नो समर्था ।
आदातुं शस्त्रजातं निखिलमपि रिपोरीशिताध्वे च यूय-
मेता नेपालसीमा हरिति पितृपतेर्जह्नुजायाश्च तीरम् ॥४०॥

नेपालं स्वीयदुर्गं रचयितुमनसो गौरवक्त्राधिपस्य
सम्पद्येताऽभिलाषः समरभुवि यदा भङ्गलाभाद् हतार्थः ।
बाह्यं वैरं तदानींप्रभृति तु शनकैर्गौरवक्त्राधिराजो
हित्वा हित्वाऽऽददीत प्रकटितसुमुखो बाह्यमित्रस्वरूपम् ॥४१॥

वाणिज्यं वर्धनीयं शुभफलमुभयोरावयोरेव सिद्ध्यै-
दित्युक्त्वाऽर्थप्रणाल्या सितवदनपतिर्भेदमाधातुमिच्छेत् ।
धर्मव्याजेन किं वा कुहकविधिपटुर्गौरवक्त्राधिराज
एतद् दुर्गं ग्रहीतुं नवनवविषयान् दर्शयेद् मोहयेच्च ॥४२॥

अस्माकं देश आस्ते नृपतिनयविदां लोभनीयः पदार्थ,
आस्ते गौरास्यराजो नृपतिनयपटुर्धूर्तराजाधिराजः ।
जीवन्मृत्योः समानं न भवति न पुरा जीवनं म्लेच्छदास्ये,
चिन्तैषा जागरूका निवसतु सततं मानसे युष्मदीये ॥४३॥

[अस्य निबन्धस्य सम्पादने लिपिकरणादिना सहायतामुपगतावायुष्मन्तौ पन्तो-
पनामको महेशराजदिनेशराजावभिनन्दामि ।]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कार्तिकशुक्ल पञ्चम्यां प्रस्थितस्य गृहप्रवेशे नवममासत्वप्रयुक्तो निषेधः कस्मात् कियदवधिक इति प्रश्ने–●

एकोदरभ्रातृविवाहकृत्यम् स्वसुर्न पाणिग्रहणं विधेयम् ।
षण्मासमध्ये मुनयः समूचुर्न मण्डनं मुण्डनतोऽपि कार्यम् ।।

'विवाहश्चैकजातानां षण्मासाभ्यन्तरे यदि ।
असंशयं त्रिभिर्वर्षैस्तत्रैका विधवा भवेत् ।।

इत्यादिषु ग्राह्यस्य मासस्य सन्देहे यस्मिन् सौरे माघादौ यत्पक्षगतायां यस्यां तिथौ विवाहादिजातं तदवधिकाः सौरा एव तत्पक्षगततत्तिथिपर्यन्ता बोध्या इति निर्णयसिन्धु-टीकायां स्पष्टमुल्लेखात्,

निर्गमान्नवमे मासि प्रवेशो नैव शोभनः ।
नवमे दिवसे चैव प्रवेशो नैव कारयेत् ।।

इत्यत्राप्युक्तयुक्त्या तिथिबद्धचान्द्र–सौरोभयात्मकस्यैव मासस्य ग्रहणम् न च तिथि-बद्धचान्द्रे मानाभावः

मस्यन्ते परिमीयन्ते स्वकलावृद्धिहानितः ।
मासा एते स्मृता मासास्त्रिंशत्तिथिसमन्विताः ।। इति

कृत्यसारसमुच्चयीयटिप्पण्याम्–

'एकतिथिभोगकालश्चान्द्रं दिनं तत्त्रिंशद्भिरेकश्चान्द्रो मासः' इति ।

निर्णयसिन्धुटीकायाम्–

'कार्तिकस्नानमाश्विनशुक्लैकादशीमारभ्य कार्तिकशुक्लैकादशीपर्यन्तं तिथिबद्ध-चान्द्रे कार्यम्' इति ।

वर्षकृत्यदीपके–

'मृततिथेर्मृततिथिं यावच्चान्द्रो मासः' इति

कृष्णभट्टीये–

'चौलोपनयन–विवाह-व्रत-गोदानादौ गर्भधारणं जन्म वाऽऽरभ्य वर्षगणनम् । यच्चै-त्रादिमासगतयत्पक्षगतायां यत्तिथौ गर्भधारणं जन्म वा तां तिथिमारभ्य वैशाखादिमास-गततत्पक्षगततत्तिथिपर्यन्तैकद्व्यादिमासगणनया द्वादशमासात्मकमेकंवर्षम्, एवं द्वितीयादि । तत्र तिथिबद्ध एव चान्द्र उपयुज्यते, एवमनन्तादिव्रतेषु द्वादशाब्दिकव्रतचर्यासु च' इत्यादेश्च वचनजातस्य जागरूकत्वात् । एवं च कार्तिकशुक्लपञ्चमीप्रस्थितस्य ज्येष्ठ-शुक्लपञ्चमीत आषाढशुक्लचतुर्थीपर्यन्तं प्रवेशो निषिद्ध इति–

समाधत्ते

ता. ३।६।५३ पद्मप्रसादो न्यायाचार्यः

●. एतद्विषयकम् पत्रमिदम् पण्डितश्रीलोकनाथढकालसकाशादुपलब्धम् (स. म.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्री ५ महाराजाधिराज राज्याभिषेक–शुभकामना

–पुष्करनाथ शर्मा पोखरेलः,
सहायकप्राध्यापको वाल्मीकि–
विद्यापीठस्य ।

अस्मिन्नार्यावर्तेऽस्मदीयो नेपालाख्यो देशोऽतीव सुन्दरो विद्यते । पूर्वस्यां दिशि मेची, पश्चिमायां महाकाली, उत्तरस्यां विश्वेषां दर्शनीयो हिमालयो नाम पर्वतो दक्षिणस्यां भारतस्य विहारोत्तरप्रदेशौ अस्य सीम्नो विभजन्ति । अयं देशो द्विधा वर्तते, विविधपर्वतमालाभिर्गिरिणद्यादिभिश्चालङ्कृतः पर्वतभागः समतलस्तराइनामाऽपरश्च । अत्रदेशे चतुर्दशाञ्चलाः पञ्च सप्ततिर्जिल्ला पदवाच्या– (जनपदाः)श्च वर्तन्ते । औतराहाया दाक्षिणात्या भूमिः शस्यश्यामला कृषियोग्या धनधान्यपूर्णाऽस्ति । पार्वतभूमौ कृषीवला अधिकमन्नमुत्पादयितुं न समर्था भवन्ति । तत्रैकस्मिन्वर्षे प्रयुक्तं मलादिकं सर्वं श्रावण–भाद्रादि–वर्षा–समये तराइ–प्रदेशं समेत्य तत्रत्यानि क्षेत्राणि, अकृष्टपच्यानि विदधाति । गोऽजमहिष्यादीनां प्रतिवर्षं प्रयुक्तं मलं पूर्णफलदं न भवति । अधिकशीत–बाधा–प्रभावेण वृक्षलतातृणादयो भूरिशो न प्ररोहन्ति । पर्वतीयायां भूयौ व्रीहियवादिकमपि वहुलं नोत्पद्यते । पर्वतीया जनाः केवलं मर्कटान्नकोद्रवादिभिरेव जीवन–निर्वाहं कुर्वन्ति । मृगचमर्यादिपशव उदीच्यभागे वहुशो भवन्ति । विरला एव गोमहिष्यादयः प्रभूतं दुग्धं ददति । नागरङ्गकट्फलादीनि फलानि स्वादूनि रसपूर्णानि, भवन्ति । पार्वतं वायुजलं जनानां स्वास्थ्यप्रदं भवति । जनतायाः कृते परिधातुं वशनादीनि भोक्तुमन्नादिकञ्च तत्र यद्यपि पर्याप्तं नोपलभ्यन्ते तथापि जना हृष्टाःपुष्टाश्च दृश्यन्ते । वृद्धा वालका युवानो युवत्यश्च नीरोगाः सुन्दर मनोमोहका भवन्ति । समयानुसारं प्रफुल्लितानि विविधानि दाडिमपुष्पकादीनि कुसुमानि दर्शकानां स्नेहजनकानि भवन्ति । हिमालयाद् वहुशो नद्यो गण्डकी, कोशी, कर्णाली, भेर. महाकाली, मेचीत्याख्या वहूदका अन्याः स्वल्पजलाश्च निःसृत्यास्मदीयं समतल (तराइ) भागं भारत ञ्च सिञ्चन्त्यः पुनन्त्यश्च सागरे एकीभवन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्ते च पद्यमयी शुभकामना –

जनाः समस्ता बहुमार्गगामिनस्तथापि सन्तु प्रभुराज्यसेविनः ।
एकीभवन्तो बहुधाविचारिणो राज्याभिषेके परितःप्रवासिनः ।।१।।
अस्मिन्विशेषे नयपालपर्वणि रम्ये शुभे शास्त्रविधानकर्मणि ।
राज्यं समस्तं नृपतिं सुयोग्यं विना विवादेन विभावयन्तु ।।२।।
राज्याभिषेको नृपतेर्महीयसो वीरेन्द्रनाम्नो महनीयमूर्तेः ।
देदीप्यते संप्रति फाल्गुनाख्ये मासे मुहूर्ते शिशिरे सुरम्ये ।।३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द. नै. ८३२

"न हि ज्ञानेन सदृशं पवित्रमिह विद्यते"

–बद्री पोखेलः
वाल्मीकिसंस्कृतविद्यापीठस्यच्छात्रः।

"ऋते ज्ञानान्न मुक्तिः" "ज्ञानादेव तु कैवल्यम्"–वेदः
न हि ज्ञानेन सदृशं पवित्रमिह विद्यते'– गीता

वास्तवरूपेण मनुष्यस्य मानवीयगतिप्राप्तिर्ज्ञानादेव सम्पद्यते। आधुनिके वैज्ञानिके समाजे ज्ञानस्य क्षेत्रं न विद्यते संकुचितम्, एकोनविंशतितम्याः शताब्द्याः प्रारम्भकाल एव यदा ज्ञानबलादेव यूरोप–देशा उद्योगविज्ञानोभय–क्षेत्रेषु चरमोन्नतिमकुर्वन्। तस्मात् कालात्तु ज्ञानस्य क्षेत्रमतीव विस्तीर्णं समजनि। सर्वस्मिन्नेव समये ज्ञानस्यैतादृक् महिमा प्रचलत्येव।

ज्ञानेन विना मनुष्यः पशुतुल्यो भवति। कर्तव्याकर्तव्ययोर्ज्ञानं ज्ञानेनैव सम्पद्यते। यदा मनुष्यो ज्ञानी भवति वा किञ्चिद्मात्रमपि ज्ञानं लभते तदा स ममैतत् कर्तव्यं न मया कर्तव्यमेतदिति ज्ञातुं शक्नोति। यः कोऽपि जनः कर्तव्याकर्तव्ये निश्चेतुं न शक्नोति स तु वास्तविकरूपेण न मनुष्यः स तु पशुरेव। पशुरपि कर्तव्याकर्तव्ये न जानाति। तस्मात् यदि मनुष्य एतस्मात् संसारात् मुक्तिं वाञ्छति चेत्तं न मनुष्यकर्तव्यं पालयितव्यम्। संसारे ऽस्मिम् केवल भक्षण–चलन–पर्यटन–शयन–कार्यं तु पशवो नराश्च समानरूपेणैव कर्तुं शक्नुवन्ति। परन्तु सुभक्षणम् अल्पभक्षणं, गन्तव्यस्थान एव गमनम् उचित स्थान एव पर्यटनम्, उचित काले शयनं तु योग्यो नर एव कर्तुं शक्नोति। एतद् योग्यत्वं नरो ज्ञानादेवाऽर्जितुं शक्नोति। तस्मात् ज्ञानं विना मानवा न भवन्ति, भवन्ति केवलं सत्यमेव दानवाः। तस्माद् दानवीयगुणान् त्यक्तुं मानवीय-गुणानुपादातुं ज्ञानार्जनमेव कर्तव्यम्। अतो ज्ञानस्य परिभाषैषा भवति या मनुष्यान् कार्याकार्यज्ञानं कारयति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्मृतिपुराणसंहितादिषु चत्वार एव पुरुषार्था कथिताः धर्मार्थकाममोक्षभेदेन । एतेषु चतुर्विधेषु पुरुषार्थेषु मध्ये पूर्वान् स्त्रीन् पुरुषार्थान् सामान्यजनाश्च सञ्चेतुं शक्नुवन्ति । यथा धर्मः; यो को ऽपि जनो दरिद्रेभ्यो ऽन्नं प्रदाय, विप्राय दानं दत्त्वा धर्ममर्जितुं शक्नोति । तथैवार्थोऽपि, प्राध्यापकश्छात्रान् पाठयित्वा, चिकित्सको रोगिभ्य औषधं प्रदाया ऽर्थमर्जितुं शक्नोति । तथैव तृतीय पुरुषार्थः कामोऽपि, यथा ऋतुकाले गौर्वृषभसंसर्गेण, वृषभश्च गोः संसर्गेण कामं प्राप्नोति । ताँस्त्रीन् पुरुषार्थान् प्राप्तुं न विद्यते किमपि काठिन्यम् । सुकरसुलभरूपेणैवार्ऽजितुं शक्यन्ते त्रय एते पुरुषार्थाः । परन्तु यत् विद्यते चतुर्थः पुरुषार्थो ऽनर्घस्वरूपो मोक्षनामकः स तु न शक्यते ऽर्जितुं सुलभप्रकारेण । तं साक्षात् कर्तुं नशक्नोति कोऽपि जनः । मोक्षातिरिक्तानन्याँस्त्रीन् पुरुषार्थान् प्राप्तुं मनुष्यातिरिक्ता अन्ये प्राणिनोऽपि शक्नुवन्ति । परन्तु स एव चतुर्थो मोक्षाख्यः पुरुषार्थो मनुष्यैरेव प्राप्तुं शक्यते । ८३ ९९९९९ जन्मनां पुण्यादेव मनुष्यजन्म लभ्यते इति वर्णितमस्ति भागवतादिषु शास्त्रेषु । मोक्षस्य पर्यायौ कैवल्यं मुक्तिश्च ।

वेदवाक्यं सर्वेषां शास्त्राणां मूलं भवति कस्मिंश्चिदपि, आस्तिकदर्शने वेदवाक्यस्य विरोधो न कृतः । 'ऋते ज्ञानान्नमुक्तिः' 'तमेव विदित्वा ऽतिमृत्युमेति' 'नान्यःपन्था विद्यतेऽयनाय' इत्यादीनि यानि यानि वेदवाक्यानि विद्यन्ते तानि सर्वाण्यपि कैवल्यप्राप्तये ज्ञानस्यैव वैशिष्ट्यं प्रदर्शयन्ति । एतेन वयं निश्चेतुं शक्नुम ज्ञानेन विना न सा मुक्तिः प्राप्यते, ज्ञानेन विना न तत् कैवल्यं लभ्यते, ज्ञानेन विना न स मोक्ष अर्ज्यते । अतो ज्ञानस्य महिमा महान् वर्तते । एतस्मादेव परमपुरुषार्थो मोक्षरूपोऽपि प्राप्तुं शक्यते । एषैव मनुष्याणामुच्चतमा विशेषता ।

दानैरपि ज्ञानमर्जितुं शक्यते । अनेकैः सामाजिककृत्यैरपि ज्ञानमर्जितुं शक्यते । राजनीत्या, समाजसेवया, अर्थार्जनेना ऽपि ज्ञानं सञ्चेतुं शक्यते । प्रथमतो ज्ञानं विना न किमपि सामाजिकं वाऽन्यत् कृत्यं कर्तुं शक्यते । सर्वत्रैव ज्ञानस्य महिमा महान् वरीवर्ति । गुरुकार्यार्थमेव ज्ञानस्य महिमा विद्यते न सत्यमेव लघवे । "विद्ययाऽमृतमश्नुते" इत्यादि वाक्ये ऽपि विद्याया वा ज्ञानस्यैव महिमा प्रदर्शितोऽस्ति ।

यत्समयपर्यन्तं मनुष्यः काम्यकर्मणि, एव लीनो भवति तदा पर्यन्तं तस्य चित्तमात्मानं प्रति न गच्छति । ते कामिनः केवलं स्वर्गमेवेच्छन्ति । एतेन रूपेण ते वास्तवज्ञानं कर्तुं न शक्नुवन्ति, परन्तु स्वर्गस्तु स्वल्पकालिको विद्यते । कथितमप्यस्ति "क्षीणे पुण्ये मर्त्यलोकं विशन्ति" एतेन ज्ञायते यत् ज्ञानस्य दृष्टौ स्वर्गोऽपि तुच्छ एव भवति । एतस्मिन् श्लोकेऽपि ज्ञानस्य महिमा वर्णितो वर्तते यत्— "कुलं पवित्रं जननी कृतार्था वसुन्धरा भाग्यवती च तेन । अपारसंवित् सुखसागरे ऽस्मिन् लीनं परे ब्रह्मणि यस्य चेतः ॥" यस्य पुरुषस्य चित्तं परे ब्रह्मणि संलग्नीभूतं विद्यते न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत् केवलं भाग्यबलेन तत्तु केवलं ज्ञानेनैव, तेन ब्रह्मपदं लब्धम् । यः पुरुषो येन रूपेण ब्रह्मपदवीं प्राप्तुं समर्थोऽस्ति, तेन जन्मभूमि वसुन्धरा भाग्यवती कृता, तेन कुलं पवित्रीकृतम्, तस्य जननी च कृतार्था सञ्जाता, येन बहुविधं ज्ञानं लब्धम् । एतेन ज्ञायते ज्ञानस्य महिमाऽतितरां विद्यते । अस्माकं देशस्य नेपालस्य राष्ट्रिय–विभूतिषु जनकस्य नाम कनिष्ठिकाधिष्ठितं वा सर्वोपरि विद्यते । एतस्य कारणं जनको महान् ज्ञानवानासीत् । पूर्वस्मिन् कालेऽपि ज्ञानवतां समादर एव क्रियते स्मेति बुद्ध्यते, एतेनोदाहरणेन । ज्ञानसदृशः पवित्रो द्वितीयो गुणो न कश्चिदपि विद्यते । एकः प्रसिद्धः कविरेकस्मिन् पद्यांशे वर्णयति ज्ञानस्य वैशिष्ट्यं यत् "या राका शशि शोभना गतघना सा यामिनी यामिनी । या सौन्दर्य गुणान्विता पतिरता सा कामिनी कामिनी । या गोविन्दरसप्रमोद मधुरा सा माधुरी माधुरी । या लोकद्वयसाधनी चतुरता सा चातुरी चातुरी"

अर्थात्–सा यामिनी एव यामिनी भवति या शशिशोभना, मेघरहिता, शरद्काल-तुल्या विद्यते । सा कामिनी एव कामिनी निगद्यते या दयादाक्षिण्यादिगुणसम्पन्ना, पति-रता एवं सुन्दरी च विद्यते । सा माधुरी एव माधुरी पदवाच्या भवति यत्र कृष्णस्य लीला व्यक्तीकृता । सा चातुरी एव चातुरी भण्यते या लोकद्वयसाधिनी विद्यते । यया इहलोकः परलोकश्च सुखदायिनौ भवतः । तादृशी चतुरता तु ज्ञानमेव । ज्ञानेनैव मनुष्याणां द्वौ लोकौ हस्तगतौ भवतः । अतो ज्ञानस्य महिमा विशालो विद्यते । सांख्य-शास्त्रे वर्णितं विद्यते यत् यः पञ्चविंशतितत्त्वज्ञो विद्यते, येन प्रकृतिपुरुषयोर्ज्ञानं कृतमस्ति तेन यत्र कुत्रापि वाऽऽश्रमेऽपि उषित्वा जटिना मुण्डिना वा शिखिना भूत्वाऽपि संसारतो मुक्तिर्लभ्यते । उक्तञ्च "पञ्चबिंशतितत्त्वज्ञो यत्र कुत्राश्रमे वसन् । जटी मुण्डी शिखी वाऽपि मुच्यते नात्र संशयः ॥" मुक्तिं प्राप्तुमयमेव सुलभ उपायो विद्यते यत् ज्ञानार्जनम् । अस्मिन् भौतिकवादप्रधाने वर्तमाने संसारे ऽपि यो विद्वान् ज्ञानी विद्यते स एव सर्वत्रैव पूज्यते, प्रसिद्धो भवति कथितं च नीतिशतके–"विद्वान् सर्वत्र पूज्यते ।"

तस्मादेव हेतोर्भगवान् षडैश्वर्यशाली कृष्णोऽपि अर्जुनं कथयति– अस्मभिर्ज्ञान-पूर्वकमेव कर्म कर्तव्यम् । ज्ञानसदृशं वस्तु संसारेऽस्मिन् न किमपि विद्यते । अतो ज्ञानस्य महती विशेषता विद्यते । तस्मादेव हेतोर्भगवान् कृष्णश्च गीतायां कथयति "न हि ज्ञानेन सदृशं पवित्रमिह विद्यते" इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुभराज्याभिषेकः

नेपालमहोत्सवः

राधाकृष्णोऽधिकारी,
संस्कृताध्ययनसंस्थानस्य,
उपप्राध्यापकः ।

नातितिरोहितमेतत् समेषां गीर्वाणवाणीवरिवस्या पारावारपारङ्गतानां शेमुषीमतां यत् किल नेपालदेशे राजा खलु ईश्वरावतारस्तस्य च पुत्ररूपेण मोमुद्यमानाः प्रजाः स्वकीयस्येश्वरस्य राज्याभिषेकं स्वाभिलषित महोत्सवाय मन्वते इति ।

तत्र खलु राज्याभिषेकोल्लेखे प्रथमतो राजा कः ? राज्ञश्च गुणाः के ? तस्य कर्म च किमित्युल्लेखः संक्षेपतो विधीयते । अस्माकं किल नेपालदेशे शाहवंशविभूषणानां राज्ञामखण्डितं राज्यशासनम् । जना वै राजानं यथैवेश्वरं समभिमन्वते । अस्माकं संस्कृतिरेव तादृशी । प्राचीना वै खलु महर्षयो योगदृष्टचा यत्परोक्षमप्यपरोक्षं कृतवन्तस्ते राजानमीश्वररूपेण स्वीचक्रुः । चन्द्रस्य वायोः यमस्य सूर्यस्य अग्नेः वरुणस्य इन्द्रस्य कुवेरस्य शाश्वतीं मात्रामादाय राजा भवति यो वै तेषाञ्चन्द्रादीनां तेजोवृत्त चरतिअर्थात् येषु येषु कार्येषु विषयेषु च तेषांयादृक्सामर्थ्योपलब्धिर्भवति, सचापि तथैव कुरुते तथाविधसामर्थ्योपलब्धिस्तस्मिन्नपि भवतीति सोऽयं राजा इत्युच्यते । राजशब्दः खलु अभिषेकादिगुणयुक्तस्य जनपद परिपालनकर्तुर्वाचकः । राज्यं वै जनपद परिपालनम् । तच्च कर्म तस्यैव । यथाह मनुः–

"ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि । सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणम्" ।। इति । एतच्च पुराणादिषु स्मृतिषु व्याकरणकोषादिषु चोक्तम् । राजानमभिषिञ्चेदित्यादिवाक्येषु अनभिषिक्तेऽपि क्षत्रिये राजशब्दप्रयोगो लोकप्रसिद्धयैव । क्षत्रिय एव राजा भवति । तस्यैव मुख्याधिकारः । क्षत्रियस्य चाभिषेकादिगुणाधानेन जनपदपरिपालनकर्मणि साधिकारता समुत्पद्यते । राजशब्दभाक्च भवति । "राजा भवेच्छत्रुहन्ता प्रजापालः सुदण्डवान्" । इति अग्निपुराणे । राज्ञो बालत्वेऽपि च देवता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वेनावलोकनम् । यथाह मनुः—"बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः । महती देवता ह्येषा नररूपेण तिष्ठति"इति ।

देशे च राज्ञः स्वातन्त्र्यमन्येषाञ्च निखिलप्रजानान्तत्पारतन्त्र्यमिति निर्दशित-वान्नारदो यथा—'अस्वतन्त्राः प्रजाः सर्वाः स्वतन्त्रः पृथिवीपतिः' इति । गौतमश्च "राजा सर्वस्येष्टे ब्राह्मणवर्जं, साधुकारी, साधुवादी त्रय्यामान्वीक्षिक्यां चाभिविनीतः शुचिर्जितेन्द्रियो गुणवत्सहायोपायसम्पन्नः समः प्रजासु स्यात् हितश्चासां कुर्वीत ।" ब्राह्मणातिरिक्तासु निखिलासु प्रजासु निग्रहादिसामर्थ्यं राज्ञः प्रतिपादयन् निगमागमस-म्पन्नत्वजितेन्द्रियत्वादिगुणांश्च विज्ञापितवान् । तस्य सहायवर्गैरपि तादृग्गुणविभूषितै-र्भाव्यमिति च ततो विज्ञायते । यस्मिन् महोत्साहित्वं लक्ष्ये स्थूलत्वं कृतज्ञता वृद्ध-सेवित्वं विनीतता सत्त्वेन सम्पन्नता कुलीनता सत्यवादिता पवित्रता अदीर्घसूत्रता स्मृति सम्पन्नता अक्षुद्रता अपरुषता धार्मिकता अव्यसनिता प्राज्ञत्वं शूरता रहस्यवित्त्वं स्वच्छिद्र-गोप्तृता आत्मविद्यायाम् दण्डनीत्यां वार्तायां त्रय्यां च कुशलतेत्यादयो गुणाः सन्ति स एव राजा राजपदभाग्भवतीति तत्त्वज्ञानां विचारः । यथाह याज्ञवल्क्यः—"महोत्साहः स्थूललक्ष्यः कृतज्ञो वृद्धसेवकः ।" इत्यादितो "विनीतस्त्वथवार्तायां त्रय्यां चैव नराधिपः ।।" इत्यन्तेन ।

प्रजानां परिपालनं राज्ञां परमो धर्मः (कर्तव्य) इत्यर्थः "प्रधानं क्षत्रिये कर्म प्रजानां परिपालनम्" । इति याज्ञवल्क्यः । मत्स्यपुराणविष्णुधर्मोत्तरादिषु च—"स्वधर्मप्रच्युतान् राजा स्वे धर्मे विनियोजयेत्" । इत्युक्तम् । स्वस्वधर्माद्विचलितानां स्वे स्वे धर्मेऽवस्थापनं सहायोपायादिकल्पनम् चतुष्पाद्व्यवहारावलोकनं सप्ताङ्गचिन्तनं षाड्गुण्यविमर्शनम् अष्टादशव्यवहारपदसमाधानमित्यादि च राज्ञां कर्म । "अष्टकर्मा दिवं याति" । तानि चाष्टौ कर्माणि—आदानं विसर्गः प्रैषो निषेधः अर्थवचनं व्यवहारावलोकनं दण्डे युक्तत्वं शुद्धौ च युक्तत्वमिति । व्यवहारावलोकनं सामान्यतो राजकर्म । व्यवहारावलोकनं पुनः स एव करोति यो वै राज्येऽभिषिक्तः, अभिषेकादिगुणयुक्तस्य हि राज्ञो धर्मशास्त्रानुसारेण प्रजानां परिपालनं परमो धर्मः । अतो हेतोः राज्ञामभिषेको विधेयः । तस्मिंश्च विहिताः कालाः सन्ति । यद्यपीश्वररूपस्य नित्यकालस्यैकत्वं तथाप्युपाधिभेदात्काल-स्यापि भेदा भवन्तीति विहिताः काला इत्युक्तम् । ते च काला विष्णुधर्मोत्तरे यथा—"ध्रुवाणि वैष्णवं शाक्रं हस्तपुष्पौ तथैव च नक्षत्राणि प्रशस्यन्ते भूमिपालाभिषेचने ।। इति नक्षत्राणि निर्दिश्य वृषोऽथ कीटसिंहौ च कुम्भो लग्ने प्रशस्यते" इत्यादिभिर्लग्नादि-निर्देशो विधीयते ।

राज्याभिषेकाय समुद्यतेन, राज्ञा सर्वप्रथमं सांवत्सरिकः पुरोहितश्च शास्त्रे प्रक्रि-यायाञ्च निपुणावन्वेष्टव्यौ । वरणीयौ च तौ । तत्र चाखिलसम्भारजातस्य नवीक-रणमावश्यकम् । पुरोहितादयश्च नूतना एव । नियुक्तैश्च तैर्नवीनमेव सिंहासनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कल्पयित्वा स्थापनीयम् । ततश्च शास्त्रानुसारं लब्धराज्याधिकारेण नृपेण सर्वौषधिकल्केन स्नानं विधेयम् मन्त्रिणश्च चतुर्वर्णान् सज्जीकृत्य जानपदांश्चाश्वास्य बद्धांश्च विमुच्य नानादेशप्रमुखानामन्त्र्य पुरोहितेन शुभे च लग्नेऽभिषेको विधेयः । तत्र चाभिषेकविधौ विनायकशान्तिः, ग्रहमखः, इन्द्रशान्तिः, नक्षत्रयागः, लोकपालपूजादयो विधेया, राज्याभिषेकस्य कृते मण्डपञ्च चतुर्द्वारोपेतं विभूषितं विधेयम् । आमन्त्रितानां समेषां परदेशप्रमुखानां स्वकीयमन्त्रिप्रभृतीनाञ्चावस्थितिस्थानं राज्याभिषेक सभाजनाय मण्डपसन्निधावेव विधेयम् । वर्णक्रमेण च पौरजानपदाः विशुद्धवसनादिभिर्विभूषिताः राजभक्तिपरायणाः निवेशनीयास्तत्रैव गजतुरङ्गादयो नटनर्तकवाद्यवादकादयो रक्षणचतुराः भटाश्च सुसज्जिताः स्थापनीयाः । निगूढचारिणश्च निगूढं चरन्तु परिज्ञानाय समेषां वृत्तम् । राज्याभिषेकमहोत्सवोपलक्ष्ये नगररथ्यादेवालयादिपरिष्करणं परिमार्जनं पर्यलङ्करणं सुगन्धधूपादिभिः सुगन्धीकरणं प्रदीपादिप्रदानेन यत्रतत्र समुज्वलीकरणं प्रसन्नचेतोभिः प्रजाभिः प्रसन्नमनसा विलोक्यानन्दनन्दितञ्च सर्वं सुसम्पादनीयम् । यत्रतत्र यैः कश्चिदपि प्रजाजनैः सुप्रसादजनकान्यामोदावहानि नानाविधानि चित्रविचित्रमनोहराणि कार्याणि सम्पादनीयानि । सम्पादनीयेषु सामग्रीसम्भारादिषु सम्पादितेषु दीपकलशगणेशमातृपूजनाभ्युदयिकश्राद्धविधानपूर्वकं मण्डपस्य पश्चिमायां द्वार्यवस्थाय ससङ्कल्पं देवतापूजनं विधेयम् ।

शास्त्रोक्तविधिमनुसृत्य सकलशेन राज्ञा सदीपया महाराज्ञा सगणेशेन च युवराजेन सवेदघोषां सवैदिकाग्रयां मण्डपप्रदक्षिणां विधाय पूर्वाभिमुखं मण्डपं प्रविश्य पूर्वेशानयोर्मध्ये उपकल्पितेषु तेषुतेषु स्थानेषु गृहीतानां दीपकलशगणेशानां स्थापनं विधेयम् । वेद्याः नैरृतीपश्चिमयोरन्तराले चोपकल्पिते स्वासने समुपविश्य राज्ञा ऋत्विग्वरणादिकं कर्म विधेयम् । पुरोहितश्च षोडशाङ्गुलसमुच्छ्रितान् द्विपञ्चाशदङ्गुलविस्तारान् सुदृढान् मसृणान् सुसम्पादितान् राज्याभिषेककलशान् स्नानशालायां समलङ्कृत्य स्थापयेत् । स्नाने उपयोक्ष्यमाणमृत्तिकास्थापनमपि विधेयम् । नानाविधकुम्भस्थापनञ्चाग्न्युत्तरदिशि विधेयम् । सुवर्णनिर्मितश्चैको कलशः प्रधानरूपेण स्थापनीयः । तत्सन्निधौ पञ्चगव्यप्रपूरितस्य कलशस्य स्थापना । गोदुग्धदधिघृतमधुकुशजलप्रपूरितानि च सुवर्णरजतताम्रमृत्तिका निर्मितानि कलशानि अभिषेकार्थं शतच्छिद्रं कलशं चतुर्षु दिक्षु चत्वारः कुम्भाः च यथास्थानं स्थापनीयाः राजसूयोक्तविधिना एकस्मिन्नौदुम्बरे कुम्भे जलस्थापनं विधेयम् । तत्सन्निधौ पलाशोदुम्बरवटशिफाश्वत्थनिर्मितानां कुम्भानां स्थापनम् । सर्वौषधियुतं सर्वबीजयुतं सर्वसुगन्धियुतं पुष्पसमन्वितं फलसमन्वितं रत्नसमन्वितं कुशाग्रदूर्वापल्लवसमन्वितं सर्वतीर्थजलसमन्वितञ्चैकं कलशं विधेयम् ।

तेषु तेषु च कलशेषु अधिष्ठातृदेवतापूजनपूर्विकां पूजां विधायाज्यसंस्कारादिविधानजातं च विधाय आधाराज्यभागप्रदानपूर्वकमग्नौ वैष्णवैन्द्रसावित्रवैश्वदेवसौम्यमन्त्रैः शर्मवर्म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गणस्वस्त्ययनगणायुष्यगणामयगणापराजितमन्त्रैश्च ससम्पातक्षेपं हवनं विधेयम् । तत्र च हुताग्नौ शुभसूचकानि निमित्तानि राज्ञा ब्राह्मणैश्च विलोकनीयानि । होमस्योत्तराङ्गं यावत् परिसमाप्य स्नानशालायां राज्ञः समुपस्थितिर्भवति । मृत्तिका पञ्चगव्यकुशोदक-तीर्थोदकादिभिः सर्वाङ्गस्नानानन्तरं वासांसि परिधाय भद्रासनोपविष्टस्य राज्ञोऽभिषेक-समयनिवेदनं पुरोहितादयः कुर्युः । यस्मिन्सम्पातपातो विहितस्तेन कलशस्थजलेन पुरोधा सराजसूयमन्त्रोच्चारणं राज्ञः शिरसि समभिषिञ्चेत् । शतच्छिद्रं सुवर्णकलशञ्चादाय सर्वौषधियुतजलेन यजुर्वेदमन्त्रानुच्चार्याभिषिञ्चेत् । सर्वगन्धसर्ववीजपुष्पफलरत्नकुश-युतजलेन च क्रमेणाभिषिञ्चेत् । राजसूयविधिमनुसृत्य विहितौदुम्बर्यकलशस्थजलेन पालाशादिपात्रचतुष्कं प्रपूर्य्य क्रमेण पुरोहितराजानुजस्वजातीयवैश्यैश्चाभिषेको विधेयः । अनन्तरं सुवर्णरौप्यताम्रमृत्तिकाकलशस्थजलेन राजाज्ञामादाय वर्णक्रमानुसारं यथादिशं क्रमेणावस्थाय मन्त्रिणोऽभिषेचनं विदध्युः । ऋग्वेदसामवेदोक्तमन्त्रांश्च समुच्चार्य उत्तरस्थाः ब्राह्मणाः मधुकुशसर्वतीर्थजलसमन्वितान् कुम्भानादाय क्रमेणाभिषिञ्चेयुः । तत्पश्चात्पौराजानपदाश्च नानाविधाः लोकाः अभिषिञ्चन्तु । कृते चाभिषेचनिके कृत्ये वैदिको ब्राह्मणः राज्ञः शिरसि अनुलेपनं कुर्यात् । तत्पश्चात्संस्नाय राजोचितवासांसि परिधाय छायानिदर्शनं मङ्गलालम्भनं विष्ण्वादिदेवतापूजनञ्च राज्ञा विधेयम् । उक्तेन विधिना सर्वमाभिषेचनिकं कर्मजातं सांवत्सरिकपुरोहितादयः सम्पादयेयुः । तदन्तरञ्च दैवज्ञपुरोधसौ मधुपर्कविधिना राजानमर्हयेताम् । राज्ञा च तौ पूजनीयौ तेनैव विधिना । राज्ञो ललाटपट्टे पट्टबन्धनं शिरसि मुकुटधारणञ्च कर्म पुरोधाः कुर्यात् । सिंहासने च व्याघ्र-चर्मोत्तराणि पञ्चचर्माणि संस्थाप्य शुभे लग्ने राज्ञा समारूढिर्विधेया । सायुधाश्च बलाधि-कृतादयस्तत्र तिष्ठन्तु ।

एतच्च सर्वं विधानजातं राज्ञा सहैव महाराज्ञा अपि विधेयम् । महाराज्ञाः पट्टबन्धनं मुकुटधारणञ्च राजा विदधीत । विशेषतो वाद्यादिवादनञ्च सिंहासनारूढिसमये विधेयम् । स्वविध्यनुसारं भटाश्च राज्ञे सम्मानं समर्पयेयुः । समागताश्च समे अतिथयः पौराः जान-पदाश्च जनाः क्रमेण सादरं भक्तिपूर्वं राजदर्शनं कुर्युः । राज्ञा च ब्राह्मणान्प्रपूज्य मङ्गलाल-म्भनं विधाय स्वकीयायुधधारणं विधेयम् । अग्निं परीत्य गुरुं प्रणम्य वृषयुतां वत्सासहितां धेनुं च स्पृष्ट्वा अश्वं गजञ्च प्रपूज्य तत्तन्मन्त्रं दक्षिणे कर्णे श्रावयित्वा अश्वमारुह्यावरुह्य राज्ञा सहैव गजाधिरोहणं विधाय भृत्यैश्चानुसृतः सोपकरणैः परिचारवर्गैः समन्वितः सपु-रोहितमन्त्रिवर्गादिभिश्च सहितो राजमार्गेण नगरं परिभ्रमेद् देवायतनेषु देवदर्शनार्थं गच्छेत् । परावृत्य राजगृहप्रवेशं विधाय समागतान् सम्पूज्य सत्कृत्य विसर्ज्य च न्यायेन स्वराष्ट्रपरिपालनं राजा कुर्यात् । इति च राज्याभिषेकविधिः संक्षेपतो निर्दशितः ।

अनेनैव विधिना कृताभिषेकाः नेपालेश्वरा जगति खलु प्रसिद्धिमापन्नाः जेगीयन्ते कविभिरपि यथा—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"कर्णारुन्तुदमन्तरेण रणितं गाहस्व काक स्वयं
माकन्दं मकरन्दशालिनमिह त्वां मन्महे कोकिलम् ।
धन्यानि स्थलवैभवेन कतिचिद्वस्तूनि कस्तूरिकां
नेपालक्षितिपालभालपतितेपङ्के न शङ्केत कः.." इति ।

उपर्युक्त सर्वविधगुणसम्पन्नस्य अस्माकं श्री ५ वीरेन्द्र वीर विक्रमशाहदेवस्यायं शुभ-राज्याभिषेकः नेपालदेशवासिनां महोत्सवः । दृष्टादृष्टगुणसम्पन्नस्य नेपालेश्वरस्यास्माकं महाराजस्य वीरेन्द्र वीर विक्रम शाहदेवस्य राज्याभिषेक विधिना कृतगुणाधानस्य न्यायेन प्रजापरिपालनसामर्थ्योदयः उत्तरोत्तरं समृद्धिमापद्येतेत्याशंसमाना निखिलाः प्रजाः स्वकीयेष्टदेवतां हृदयतः प्रार्थयन्ते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्तमानसमयो धर्मश्च

प्रा. रामचन्द्र पौडेलः
वाल्मीकि विद्यापीठस्थः

परिवर्तनशीले संसारे सर्वाणि वस्तूनि एकरूपाणि न भवन्ति, संसारशब्दस्यावयवार्थ एव तमर्थं स्फुटीकरोति । एतत्स्वाभाविकमेव, सहस्राब्द्याः शताब्द्या वा वार्ता आस्तां दूरे । वर्षो मासः पक्षोऽपि एकत्र गच्छतु, दिनमात्रमपि एकरूपेण अवर्तमानाः पदार्था अस्माकं दृष्टिगोचरा एव, तत्रापि प्रतिक्षणं परिणामिनो हि भावा ऋते चितिशक्तेः' प्रतिक्षणं पदार्था अन्यरूपा भवन्तीति सिद्धान्तयन्तो दार्शनिका अपि लोकमान्या एव । कालो हि स्वयं परिवर्तमान अन्यानि सर्वाणि वस्तून्यपि परिवर्तयति ।

पुरा समये जनसंख्याया अतीव न्यूनत्वम्, उर्वराया भूमेः प्राशस्त्यम्, शुद्धो व्यवहारः सर्वत्र सदाचारः, परोपकारस्य दयादेश्च प्राचुर्यम्,सरलःस्वभावः शान्तं वातावरणम्, अदूषितो वायुः, अनायासेन जीवननिर्वाहः, अतिथीनां याचकानां ■ च दुर्लभता स्वल्पस्य समयस्य प्रयासेन उदरदर्याः पूरणम्, धर्मात्मनां जनानां व्रतोपवासादीन् विधातुं समयस्य दारिद्र्याभावः, साधारणरूपेण जीवननिर्वाहं विधाय अवशिष्टं सदुपार्जितं द्रव्यं धर्मकार्ये विनियोक्तव्यम्, केवलं भोगविलासाय न मानवजीवनम्, धर्मं समर्ज्य अन्यस्मिञ्जन्मनि सुखप्राप्त्यर्थमिति जनानां सद्विचार आसीत् ।

राजानोऽपि धनधान्यादीन् संचित्य सामान्ययागादिना केवलं देवान् नाप्रीणयन्त अपितु दरिद्रादिषु सर्वस्वदानेनैव सकल नृपालजयेनैव वा पूरणीयान् महनीयान् विश्वजिदादियागानपि विधाय लोकोत्तरां ख्यातिमर्जयन्ति स्म ।

"धर्माय यशसेऽर्थाय कामाय स्वजनाय च । पञ्चधा विभजन्वित्तमिहामुत्र च मोदते" इत्युपदेशानुसारम् अपहासमिव विलासं सर्वतो विसृज्य दानपरोपकारसार्वजनिककार्यादिषु न्यायोपार्जितस्य धनस्य सदुपयोगं विधाय आत्मानं कृतकृत्यं मन्यन्ते स्म ।

सदाचारवतांजनानां प्राचुर्येण दुराचारमिच्छन्तोऽपि स्वल्पा जना भयेन लज्जया वा सन्मार्गं प्रत्यक्षतस्त्यक्तुं न प्रभवन्ति स्म ।

■ अतिथींश्च लभेमहि याचितारश्च नःसन्तु इति श्राद्धसमये यजमानेन ब्राह्मणैःसह प्रार्थनया एतदवगम्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अधुना समयस्यातीव परिवर्तनं जातम् । अहो: रात्रं प्रयस्याऽपि येन केनाऽपि वस्तुना आत्मनः परिवारस्य च उदरदरीं पूरयितुं साधारण व्रस्त्रेणाङ्गानि समाच्छादयितुमपि काठिन्यमजायत 'स्वार्थेनाऽऽत्मसात्कृता जनाः स्वकीयलाभमेव बहुलाभं मन्यमाना अन्येषां महतीं हानिं विधायाऽपि स्वस्य स्वल्पलाभाय सहर्षं यतन्ते । ग्रासवासदुर्लभतैव प्रायेण दृश्यते वञ्चनप्रतारणापहरणादीननर्थानपि पौरुषपथे स्थापयतां विवेकरहितानां जनानां प्राचुर्यम् जनसंख्याया बाहुल्येन सर्वत्र जनसंमर्दः खाद्यवस्तूनामभावो महार्घश्च बणिजां स्वार्थाऽन्धां दृष्टिः, शुद्धवस्तूनां दुर्लभता यन्त्रवाष्पादिना दूषितं वातावरणं नैकविधरोगाणां दुर्भावश्च, दुराचारदुर्ग्रहग्रस्तो विवेकरहितो लोकः सर्वतो निष्पीडितो मध्यमवर्गः ।

"प्राकृतप्रकोपतो गृहेण उपकरणकलापादिना च विरहितान् भोजनमप्राप्य बुभुक्षयैव यमातिथिभूतानां स्वकीय देशस्थितानां परःसहस्राणां जनानां दुरवस्थां समीक्ष्य दयावद्भि मित्रराष्ट्रैरवशिष्टानां तेषां प्राणरक्षार्थं समर्पितानि वस्तून्यपि अवैधवाणिज्येन बहिर्देशं नयतः स्वदेशजाञ्जनान् विलोक्य चरित्रहीनान् तान् उद्दिश्य सच्चरित्रं जनताभ्यः कथं दापयेयमिति वङ्गलादेशस्य प्रधानमन्त्रिमहोदयेन प्रकटीकृतन् २०३१ पौष मासस्य ४ दिवसे गोरखापत्र पत्रिकायां प्रकाशितमुद्गारं विलोक्याऽपि आधुनिका केचन जनाः कीदृशा जाता इति अनुमातुं शक्यते ।

अपरं च इन्धनवन्तो देशास्तदभाववतां बहूनामविकसितदेशानामार्थिकीमवस्थामनपेक्ष्यैव स्वार्थान्धा इन्धनमूल्यं वर्द्धयितुं पुनः पुनः प्रयतमाना दृश्यन्ते ।

अन्यच्च विलासिनो विकसितदेशा स्वल्पमपि विलासं परित्यज्य स्थातुमपारयन्तो विकासोन्मुखराष्ट्राणां दुरवस्थामसमीक्ष्यैव इन्धनं विलासाय आत्मसात् कर्तुं प्रयतन्ते । बहिर्दर्शयितुं विकसिताविकसितराष्ट्राणां परस्परं मित्रताऽपि वर्तत एव ।

करालेऽस्मिन् कलिकाले किं कर्तव्यम्, कथं वा सर्वजन कल्याणम् को वा उपायो धार्मिक वातावरणविस्तारे कया वा रीत्या सर्वत्र सुखशान्तिः कस्मिन् मार्गे समाश्रिते देशोन्नतिः कं वा समवलम्ब्य स्थातव्यम् इति सर्वैर्विचारणीयोऽयं विषयः ।

तत्रेत्थं प्रतिभाति मन्दमतेर्मम मनसि–'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः' इति धर्मलक्षणं विधाय पूर्वाचार्यैर्यस्मादिहलोके परलोके च सुखप्राप्तिः स धर्म इत्युपदिष्टं वर्तते "धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः । धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥" इति मनुनाऽपि धर्मलक्षणं कृतमेव । अपि च प्रातः स्मरणीयैरस्माकं पूर्वजैर्महर्षिभिर्लोकानां कल्याणहेतवे सकलजीवनं समर्प्य तपसा दिव्यदृष्टिं च समा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साद्य सार्वजनिका धर्ममार्गा बहवः प्रदर्शिताः सन्ति । तेषु मध्यस्य कलियुगस्य कृते समुचितः स्वल्पप्रयाससाध्यो धर्ममार्गोऽवलम्बनीयः साधारणैर्जनैः । अस्मिन् समये बहुसमयसाध्या बहुलधनप्रयोगा विपुलायासा यागा दुःसाध्याः । सत्यत्रेतादावनुसृतान् धर्ममार्गान् अनुसर्तुमधुना असमर्था जना, व्रतोपवासादिषु बहुसमययापने स्वोदरपूर्तौ बाधा, युग-समुचितो मार्गः प्रदर्शित एव महर्षिभिः 'कः कालः कानि मित्राणि को देशः कौ व्यवा-गमौ । कश्चाहं का च मे शक्तिरिति चिन्त्यं मुहुर्मुहुः ॥' इति नीतिवचनान्यपि विचारणीयानि ।

श्वःश्रेयसं समधिगन्तुं दीर्घाः स्वल्पाः सरला दुर्गाश्च बहवो मार्गाः सन्ति । अस-मर्थेन झटित्येव प्राप्यत इति दुरारोहस्य स्वल्पमार्गस्यानुसरतो अन्तराल एव पतन संभवः अतो बहुसमयसाध्योऽपि सरलो मार्गोऽनुसरणीयः । दुर्बल-दरिद्र-दीन-हीनानां जनानां कथं स्यात्तादृशी शक्तिः ।

दरिद्रनारायणस्य बुभुक्षया दन्दह्यमानस्य जठराग्नेः सदुपार्जितेन स्वल्पेनापि द्रव्येण शमनमपि हवनसमानमेव । अकिञ्चनापाङ्गदरिद्ररुग्णादीनां सेवनं धर्मसेवनम् । मातृभूमिं सर्वैश्वर्यसम्पन्नां विधातुं देशविकासकार्ये संलगनमपि सत्कर्मलगनम्, कर्म-योगसाधनस्यायं समयः ।

श्लोकार्द्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः ।
परोपकारः पुण्याय पापाय परपीडनम् ॥

इति धर्मसारं समनुसृत्य परोपकारके बहुजनहितकारके मार्गनिर्माणे प्रपाविरचने सेतुबन्धने धारास्थापने एतादृशेषुअन्येषु अपि कार्येषु सश्रद्धं सानुरागं श्रमदानं कर्मयोगानुगुणः पन्थाः । अन्नदानविद्याप्रदानगोचरनदानविद्यालयनिर्माणघट्टविरचनादीनि सामयिकानि धर्मकार्याणि प्रशस्तानि ।

स्वार्थं दूरतः परित्यज्य कार्यसिद्धिं तत्फलं चाऽसमीक्ष्य स्वस्य परेषां च फलेच्छा-रहितकर्मकरणं कर्मयोगः । देशविकासार्थं सर्वतोभावेन प्रवृत्तिर्धर्मकार्यप्रवृत्तिः । देशस्योन्नतौ स्वस्याप्युन्नतिः संपद्यत एव, क्षुद्रस्य स्वार्थस्यैव पञ्जरे को वा विवेकवान् पतति ।

अपिच देवपूजासङ्गतिकरणदानेष्वर्थेषु वर्तमानाद् यजधातोर्निष्पन्नो यागशब्दो यज्ञ शब्दश्च । अतो देवपूजन मान्यसंमानसत्सङ्गमनदानादयोऽपि यज्ञा एव । देव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूजनात्सद्बुद्धेर्लाभः मान्यजनसमादरणाद्व्यवहारकौशलम्, सतां सङ्गमनात्सदसद्विवेकः दानतस्त्यागभावनाया वृद्धिर्जायते । एतादृशयज्ञानां संम्पादनमधुनाऽत्यावश्यकम् ।

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥

इति भगवद्गीतायां समुपदिष्टस्य शारीरतपस अर्जनमेव समर्जनम् ।

व्यापकः परमेश्वरः सर्वत्र वर्तते परमेश्वरमये जगति यस्य कस्याऽपि सेवा परमेश्वर सेवा, यत् किमपि कृतं तत्परमेश्वरकार्यमेव, यस्य कस्याऽपि समाराधनं परमेश्वर-समाराधनम्, यस्य कस्यापि तर्पणं परमेश्वरतर्पणम् इति निश्चित्य इन्द्रियादीन् वशीकृत्य स्वकीये कार्ये संलगनमेव सकलमानवानां निःश्रेयसस्य मार्गः ।

अस्मिन्वैज्ञानिकयुगे विज्ञानतः– समुपलब्धानां परिणामहितावहानां सुखानां यथा-सम्भवमनुसरणमपि नानुचितम् विद्युत्, औषधम् शल्यचिकित्सा पारदर्शनयन्त्रम् दूरश्रवणयन्त्रम् व्योमयानम्, वाष्पयानम् इत्यादीनि वैज्ञानिकवस्तूनि अतीवोपयुक्तानि, मानवानां कृते विलासप्रसारसाधनानि अधःपतननिदानानि तानि । अश्लीलचलचित्रादीनि तानि तु दूरतस्त्याज्यानि ।

आर्य संस्कृतौ स्थातुं संयमोऽनिवार्यः असंयमिन आर्या अपि अन्धपरम्परेयमुन्नते-र्वाधिकेति प्रजल्पन्तः पाश्चात्त्यैर्विकसितदेशैः कृतान् विलासान् सस्पृहं समीक्ष्य तृष्णया विह्वलाः सन्ति । स्वसंस्कृतौ नष्टायां स्वजातेरपि नाश इति न विचारयन्ति विलास-ग्राहेण ग्रस्तास्ते वराकाः ।

पाश्चात्यदेशस्यानुकरणमकृत्वैव स्वकीयमर्यादायां संस्कृतौ च बहुपरिकरा जापान-देशीया उन्नत पाश्चात्त्यदेशीयैरपि सानुरागं स्पृहणीया जाता इति सर्वं विदितमेव ।

धर्मस्य संस्कृतेर्मर्यादायाश्च संरक्षणमेवास्माकं परमं कर्तव्यम्, सच्चरित्रं नाम मान-वानां समुज्वलताकारकममूल्यमसाधारणं महाभूषणम्, न ह्येतद्भूषणं समुपलभ्यते मह-त्स्वपि आपणेषु यत्र कुत्राऽपि वा देशेषु । सदाचारेणैव लभ्यते सच्चरित्रम् नान्यथा प्राणव्ययेनापि । पूर्वं सदाचारं निहत्य भ्रान्ताः पाश्चात्याः अधुना पुनस्तस्यैवान्वेषणतत्पराः सन्ति । वयं तु हस्तस्थितमपि तं सहजं सदाचारं त्याज्यपदार्थमिवापसारयितुं प्रयतमानाःस्मः।

मानवः स्वभावेनैव सर्वदा नवं नवं वस्तु समीहते । समीह्यमानं वस्तु सद्वा असदिति समीक्ष्यैव तस्य वस्तुनः प्राप्तौ यतनीयम् । परं विवेकरहितो जनस्तदसमीक्ष्यैव अभिलषितस्य वस्तुनो लाभे प्रयतते, पश्चाद्दुःखं पश्चात्तापं महतीं हानिं च लभते । अतोविवेकस्याऽतीवा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऽऽवश्यकता सचेतनानां कृते, विवेकवारिणा निर्मलीकृता बुद्धिरेव सदसद्विवेक्तुं क्षमते, विवेकलाभाय सदाचारः सेवनीयः ।

चतुर्भिर्वर्णैः षट्त्रिंशज्जातिभिश्च मिथो मिलित्वा राष्ट्रं सर्वेषामेव सर्वस्वमिति निश्चित्य तस्योत्थाने सततं प्रयासो विधेयः । राष्ट्रस्य राज्ञश्च महत्त्वं सर्वैः वर्द्धितव्यम् । देशविकासयज्ञे द्रव्यस्य शरीरस्य वचसो मनसश्च हवनमपि सद्यागकरणम् अस्मिन् यागे सर्वजनानां दीक्षितत्वम्, सर्वैः संभूय एव यागः पूरणीयः, अपूर्वोऽयं यागो यतो यस्य फलमस्मिन्नेव जन्मनि यागपूरणसमनन्तरमेव लभ्यते सर्वैः कार्यकर्तृभिर्बहुकालपर्यन्तम् पुत्रपौत्रप्रपौत्रादिभिश्च लप्स्यते आत्मनोऽनन्तरं तत्फलम् । सफलीभूतेऽस्मिन् यागे रोगदारिद्र्यशोकादयोऽपसरिष्यन्ति देशतो दूरम् । एतादृशयागे सहयोगायाऽऽहूता वयं श्रीपञ्चकाञ्चितैर्महाराजाधिराजश्रीरेन्द्रवीरविक्रमशाहदेवैः । अतः सर्वैरस्माभिः स्वस्वस्थानतःसानुरागं यथाशक्ति सहयोगो विधातव्योऽस्माकमेव लाभाय इति प्रार्थये सर्वान् नयपालनिवासिनः । सर्वेषां शुभमस्तु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीमन्महाराजाऽधिराजानां नेपाल–नरेशानां वैदिक–धर्मसंरक्षकाणां
श्री ५ वीरेन्द्रवीरविक्रमशाहदेवानां राज्याऽभिषेकमहे––

।। शुभाऽभिनन्दनम् ।।

दयासमुद्रो हि जनाश्रयो नु नेपाल–राजेश–पदं प्रपन्नः ।।
श्रीपञ्चपूर्वश्चिरमत्रजीव्याद्वीरेन्द्रनामा महनीयमूर्तिः ।।१।।
पित्र्यान् गुणाननुहरन्निखिलान् सुशील–वात्सल्य–धर्मपरता–विबुधादरादीन् ।।
प्रागेव यः प्रकृति–लोक विलोचनानामुद्वेलमुत्सवभरं जनयाम्बभूव ।।२।।
दिष्ट्याद्य तावकपितुः परितोऽवकीर्णं सिंहासनं मणिगणोच्छलदंशुजालैः ।।
अध्यासितं हि भवता परिवीक्ष्य देव ! स्वान्तं प्रमोदभर–मेदुरतां दधाति ।।३।।
ग्रैष्माविसह्य–परिताप–हता–लतेव धाराधरं ननु भवन्तमुपघ्नमाप्य ।।
नेपाल–देश–जनता व्यपनीय शोकमानन्दथुं पृथुमियं प्रकटीकरोति ।।४।।
भूयस्तरां तव धृतिर्धरणीन्द्रधुर्य ! कापि क्षमा क्षितिमपिस्वगुणैर्हसन्ती ।।
अन्यः स कोऽपि महनीय ! तवाऽनुभावो लोकोत्तरप्रकृतिवत्सलता च हृद्या ।।५।।
नेपालकेश्वर ! निजेतरनिर्विशेषं न्यायं त्वदीयमवलोक्यहृतान्तरङ्गाः ।।
आवाल–वृद्धमखिला जनताः कृतज्ञा दीर्घायुरत्र भवतः परितोऽर्थयन्ते ।।६।।
दीप्त्या रविः प्रकृतिरञ्जनतः सुधांशुर्वाचा गुरूः पृथुरुदारतया महत्या ।।
अत्यद्भुतोऽसि न कथं हरसि प्रजानां नेपाल–भूप ! हृदयानि दयाम्बुराशे ।।७।।
स त्वं चिराय निखिलाऽवनि-सौख्य-कोटिं प्राप्तःप्रजाजनमवंस्तनयाविशेषम् ।।
नेपाल–देश–जनताऽऽश्रित–कल्पवृक्ष ! देवानुयाहि पदवीं पितुरीड्यनाम्नः ।।८।।
तिग्मांशु–तीक्ष्ण–महसा सहसा सपत्नानुत्सादयन् धवलयन् यशसा दिशश्च ।।
प्राज्यं महेन्द्र–पुरवैभवहारि–राज्यं राजाऽधिराज परिभुङक्ष्व समाः सहस्रम् ।।९।।
देवान्न–पुष्टवपुषः स्वकृतज्ञभाव–राज्याभिषेक–सुमहोत्सवमोदनुन्नम् ।।
श्रीलोकनाथ–कृतिनो लपितं किलैतच्छ्रीमत्प्रभोरसमसम्मदमादधातु ।।१०।।

श्रीमदाऽऽश्रितो लोकनाथआचार्यः
श्रीपशुपति–देवपत्तनम्
शिक्षकः संस्कृत—प्रधान—माध्यमिक—विद्यालयस्य, काष्ठमण्डपस्य ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पञ्चायतप्रशासनस्य, राज्ञो राज्याभिषेकस्य च प्रशंसनम्

–प्रा. लोकनाथ ढकालः

सर्वदा चेतनायुक्तो वियुक्तो बन्धहेतुभिः ।
संयुक्तः शक्तिभिः कृष्णः कृपायुक्तः करोतु शम् ।। १ ।।
अदीर्घदेहे लेखेऽस्मिन् पञ्चायतप्रशासनम् ।
राजा राज्याभिषेकश्च संकीर्त्यन्ते समासतः ।। २ ।।
महेन्द्रभूभृदुद्भूतं वीरेन्द्रनृपरक्षितम् ।
चिरं जयतु नेपाले पञ्चायतप्रशासनम् ।। ३ ।।

तत्रादौ पञ्चपदार्थो निरूप्यते---

व्यक्तीकरणार्थकपञ्चधातोः (पची व्यक्तीकरणे, भ्वा.) पञ्चति व्यक्ती करोतीति विग्रहे अथवा विस्तारार्थकणिजन्तपञ्चिधातोः (पचि विस्तारे, चु.) पञ्चयति विस्तारयतीति विग्रहे पचाद्यच् प्रत्ययद्वारा निष्पन्नेनाकारान्तपञ्चशब्देन जनानामनुकूलं प्रतिकूलं वा यद् भवेत् सम्यगवगम्य तस्य व्यञ्जकः प्रचारको वा व्यक्तिविशेषो बोध्यते।

पञ्चायत–प्रशासनेऽत्रत्ये सभानां सदस्यानां पञ्चायतानां च केषामपि पञ्चसंख्यकत्व नियमाभावेनात्र पञ्चपदस्य पञ्चत्वसंख्याविशिष्टार्थबोधकत्वं तु न संभवत्येव ।

अत्र हि ग्रामाणां नवधा विभाजनं विधाय प्रतिग्राममेकैकसदस्यक्रमेण ग्रामसभाविभावितैः सदस्यैः सह निर्वाचिताभ्यां प्रधानोपप्रधानपञ्चाभ्यां संभूयैकादशभिः पञ्चैरेकं ग्रामपञ्चायतं, विहितमस्ति ।

नगरेषु च तत्परिमाणमपेक्ष्य नगराणि नैकधा वर्गीकृत्य ततोऽप्यधिकसंख्यैः पञ्चैरेकं नगरपञ्चायतं, निर्मितम् । इत्थमाराष्ट्रं प्रपञ्चितेभ्यः प्रचुरपञ्चायतमण्डलेभ्यः प्रति जनपदमेकैकशः पञ्चसप्ततिसंख्याकानि जनपदपञ्चायतानि, विहितानि । ततो निर्वाचितैः पञ्चैश्चैकं राष्ट्रियपञ्चायतं, विरचितमस्ति । तेनात्र कुत्रापि पञ्चसंख्याकत्वनियमस्यादर्शनात् पञ्चपदस्य पञ्चसंख्याकत्वार्थकल्पनं केवलबलकल्पनमेवेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'पञ्चजनाः (ऋ.) इत्यादिश्रुतौ श्रूयमाणः पञ्चशब्दश्च व्यञ्जकाद्यर्थ–व्यञ्जकोऽपि सम्भवति। अतएव "‥शङ्खरूपधरोऽसुरः (भा. पु.) इत्यादिना समुद्रनिवासिनः शब्द-विशेषव्यञ्जकशङ्खरूपधरस्यैकस्यासुरस्य पञ्चजनेत्यभिधानेनाभिधानम्, तमसुरं हत्वा तदङ्गप्रभवं पाञ्चजन्यं नाम शङ्खं हरिर्जग्राहेति भागवती कथा च संगच्छते। संगच्छते च––"तस्यायं प्रपञ्चः" इत्यादिना ग्रन्थेषु स्थाने स्थाने कथितस्य प्रपूर्वकस्य पञ्चपदस्य सामान्य रूपेणोपात्तस्य विशेषरूपेण कथनं प्रपञ्चः, इत्यादि व्याख्यानम्।

पञ्चभद्रजनाः, इत्यादि लौकिकव्यवहारेऽपि पञ्चपदं वास्तववाक्यव्यञ्जकपरकं न तु पञ्चसंख्यकाववोधकम्, पञ्चत्वसंख्याशून्येष्वपि त्रिचतुरादिषु विवेचकेषु लोके तादृश-शब्दप्रयोगस्य दर्शनात्। नापि पञ्चसंख्यकैरेव कृतो निर्णयः प्रामाणिकः, विभिन्नविद्या-वद्भि स्त्रिभिः स्त्रैविद्येनैकेनैव वा कृतस्य निर्णयस्यापि स्मृतिशास्त्रे (पर्षत् त्रैविद्यमेव वा, म. स्मृ.) प्रामाणिकत्वप्रतिपादनात्। अत एव न्यायालयादिषु आधिकरणिकैर्द्वयोरपि साक्षिणोः समक्षं विवादविषयो निर्णीयत इति उपर्युक्तं नायुक्तम्।

अत्र प्रशासनपदेन राष्ट्रव्यापकं मूलभूतं प्रशासनं विवक्षितम्, तथाविधस्य तस्य सकलेषु पञ्चेषु प्रसृततया पञ्चायतत्वं वोध्यम्। एवं पञ्चेषु पर्याप्तं मण्डलं च पञ्चायत-मुच्यते। पञ्चायतमित्येवकथनं तु संक्षेपेणाभिधान–सौकर्यार्थमित्यवधेयम्। केचित्तु पञ्चा-धीनमिदं प्रशासनमिति तकारद्वययुक्तं 'पञ्चायत्तम्, इत्यमिधानमुचितमिति वदन्ति।

प्राचीनसमये हि शासनस्य भारं केवलो राजा तदनुमताः कतिचिदमात्या एव वा वह-न्ति स्म। अधुनाऽपि प्रजातन्त्रादिगिरा निगद्यमानस्य शासनस्य भारं वहुग्रामनगरेभ्यो निर्वाचितैरेकैकसदस्यैः सह वहन्ति निर्वाचिता एव राष्ट्रपतिप्रभृतयः।

अस्य तु पञ्चायतशासनस्य धुरं धरति धर्मधुरन्धरो महीधरः प्रतिग्राम नगरैकैक प्रति-निधिभिरसंख्यैः पञ्चैः सहित इति शासनान्तरापेक्षया ऽधिक व्यक्तिषु विस्तृतया कुल-क्रमागतमहाराजाधिराजसंचालिततया चेदं शासनं प्रकृष्टम्। प्रकृष्टं शासनमतएव प्रशासनमिति व्यपदिशन्ति विद्वांसः।

अस्मिन् प्रशासनविधौ प्रत्येकग्रामनगरनिवासिनां जनानां यदनुकूलं प्रतिकूलं वा भवेत् तस्य संपादनं विनाशनं वा तत्तद्ग्रामनगराधिकृतैः पञ्चैरेव यथाऽधिकारं क्रियते। तथा विधातुमशक्ताश्च ते पञ्चायतमण्डले समुपस्थाप्य तद्द्वारा तत्संपादयन्ति। यदि पञ्चा-यतमण्डलमपि जनानां हिताहितप्रापणपरिहारयोरसमर्थं तर्हि जनपदपञ्चायते तन्निवेद-यति। तच्च राष्ट्रियपञ्चायते। तदपि तत्सम्वन्धिविधेयमूहापोहैः समवधार्य राज्ञे विज्ञाप्य च तदाज्ञया यथोचितं कार्यं करोति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदनेन प्रशासनविधिनेषदनुरूपमिव प्रशानप्रकारं प्रादर्शयन् षड्दर्शनटीकाकृतो वाचस्पतिमिश्राः–

"यथाहि ग्रामाध्यक्षः कौटुम्बिकेभ्यः करमादाय विषयाध्यक्षाय, विषयाध्यक्षश्च सर्वाध्यक्षाय, स च भूपतये । तथा वाह्येन्द्रियाण्यालोच्य मनसे समर्पयन्ति, मनश्च संकल्प्याहंकाराय, अहङ्कारश्चाभिमत्य बुद्धौ सर्वाध्यक्षभूतायाम्, इति । (सांख्यतत्त्वकौमुदी) प्रकृते च ग्रामाध्यक्षपदेन ग्रामपञ्चायतम्, विषयाध्यक्षवचनेन च जनपदपञ्चायतम्, सर्वाध्यक्षशब्देन च राष्ट्रियपञ्चायतम् अवगन्तुं शक्यते । मन्त्रिमण्डलं तु राष्ट्रियपञ्चायतस्यैवाङ्गं तदनुमत्या कार्यविधायकमिति तद्ग्रहणेनैव गृहीतमित्यवधेयम् । एवं वाह्येन्द्रियस्थानापन्नास्तत्तद्ग्रामनगराधिकृताः पञ्चाः, मनःस्थानापन्नानि ग्रामनगरपञ्चायतानि, अहंकारस्य स्थाने जनपदपञ्चायतम्, निर्णयविधायि बुद्धिप्रतिनिधिभूतं च समन्त्रिमण्डलं राष्ट्रियपञ्चायतम्, सर्वविषयदर्शकसाक्षिस्वरूपपुरुषस्थाने विराजमानश्च श्री ५ महाराजाधिराज इति बोध्यम् । तदनेनोक्तप्रकारेण सपुरग्रामस्यास्य राष्ट्रस्य शरीरत्वं तत्संचालकस्य राज्ञश्च शरीरित्वं ज्ञायते । यथा चिद्रूपं पुरूषपदाभिधेयमात्मानं विना प्राकृतिकं शरीरं न संचलति, तथैव प्रकृतिवर्गात्पृथग्भूतं राजानं विना राष्ट्रमपीदं न संचलतीति चाववोध्दुं शक्यते ।

तदनयोरुपरि परिदर्शितदिशा पञ्चायतप्रशासनस्यास्य प्राचीनशासनवदैहिकामुष्मिकश्रेयोऽनुकूलत्वं, शरीरशरीरिणोः संवन्धवदनिवार्यत्वं, प्रजानां स्पृहणीयत्वञ्चेति वैशिष्टचमेवैतस्यावसीयते शासनान्तरादिति ।

किंच, गोहत्या-गर्भपात-प्रभृतीनि सज्जनजनमानसोद्वेजनजननानि दुष्कृतान्यत्र नीतिविरूद्धान्यनिहितानीति धर्मसापेक्षतया सर्वा एव प्रजा इदं प्रशासनं प्रशंसन्ति ।

अपिच– अम्वरचुम्बि-शिखरिशिखरान्निपतितं परैरपीतमतिपूतं पानीयं पेपीयमानाः, मानवान्तरैरसेवित-पूर्वस्या-पूर्वस्य पर्वतप्रभवपावनतमपवनस्य निषेवणेनात्मानं धन्यंमन्यमानाः, परानपेक्षैर्निरपेक्षवहुव्ययैः स्वदेशसुलभैः सर्षपदुःस्पर्शादिशाकैरुदरपूरणं विदधानाः अद्यावधिपराधीनता- व्याधिभिरनभिभूताः, वीरगणानायामग्रे गणनीया नैपालकाः प्रजागणाः स्वधर्मपालभूपालकुलालङ्कारेण नरपालेनाभिसृष्टाय साम्प्रतं परैरजुष्टाय स्वाभीष्टसाधनायैतस्मा एव पञ्चायतप्रशासनाय सुप्रसन्नमनसा स्पृहयन्तीति विश्वविदितमेवैतत् । प्रशंसनं त्वस्य भूतार्थानुवचनमेवेति ।

अन्यच्च–' न कश्चिद्दुःखभाग्भवेत्, इति धिया ग्रामं ग्रामं गताऽगतानि विदधता धरित्रीपतिनासह सर्वासामपि प्रजानां पञ्चायतद्वारेव साक्षादपि संपर्कसम्भवात् अत्र न कोऽपि जनोऽन्यायगर्ते निपतनभयाद्‌विभेति, तस्मादपि जनेभ्यो रोचतेऽयं प्रशासनप्रकारः । अपरं च—

नग्ना रुग्णाः क्षुधाऽऽर्ताश्च पोषणीयाः प्रजा इति ।
प्रतिज्ञाय तथा कार्यं विदधानस्य भूपतेः ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रजास्वस्त्यधिकः स्नेह स्तासां भक्तिश्च राजनि ।
पञ्चायत–व्यवस्थाया लब्धो लाभोऽयमुत्तमः ।।

राजप्रजानामन्योन्यमेधमाना दिवानिशम् ।
प्रीतिरेषा ऽस्य देशस्य विकासाय प्रकल्पते ।।

परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ।
इति गीतासु–गीतं च श्रेयोऽत्र भविता ध्रुवम् ।।

पुनश्च––पञ्चायत प्रशासनस्य प्रवृत्तेः पूर्वकालादेवेह कालक्रमागतैर्ग्रहैरिवावग्रहैर्म्लानतामुपगता संस्कृतशिक्षालतेयं कृशकलेवराऽऽसीत् । सांप्रतं चैषा प्रसारिणीव उपर्येव वितन्यमानां तनुतरां तनुं दधत्यपि स्वकीयौदार्य–सौन्दर्य–गाम्भीर्यादिगुणगणगरिम्णा, सुचिरात् सनातनसंस्कृतशिक्षापद्धतिसमलङ्कृतिभिः कृतलक्षणया दक्षतया च वर्तमान नूतनशिक्षापद्धतिमपि सुमण्डयति मञ्जुललता–मण्डपायमाना, फलफुल्ल–पल्लवादिभिः स्वाङ्गैः सृजति प्रजानां नैरुज्यम्, जनपतिविश्वजनमनोरञ्जनम्, आवहतिच हितं महितं महीपतये ।

तदित्थं सर्वासामेव संस्कृतीनां जीवनं वहन्तीं तपस्विनीमेनां पञ्चायतप्रशासनमिदं यदि सुसमृद्धाध्ययनाध्यापनादिभिः सुदृढबन्धनैर्भूयो विधाय बद्धमूलां, सस्नेहानुग्रहवारिवर्षणैः समभिषिच्य, समस्त–गृहिणां गृहाङ्गणेषु संरोपणमहोत्सवैं विपुलीकृत्य च ऋतुकुसुमादिभिः प्रविकसितां सुमधुरकम्रफलभारनम्रां बिदध्यात् तदैतत्प्रशासनं समेषामेव मनुजजनिभाजां प्रशंसा–भाजनतां भजेत । मानवानां का कथा देवानामपि शुभाऽशंसनेन सुशोभितं भवेत् ।

अन्ते च– श्रित–श्रीपशुपतिनाथस्य श्रीगोरक्षनाथस्य कृपापात्रेण धर्मपरायणेन पृथिवीनारायणेन धरित्रीवररत्नेन महता यत्नेन संकलिते, भुवनप्रथित–पृथुयशसा त्रिभुवनावनिपतिना संस्कृते, नेपालभूमण्डले महीमहेन्द्रेण महेन्द्रेण संरोपितः शाहवंशावतंशेन वीरवरेण श्रीवीरेन्द्रधराधरेन्द्रेण सुरक्षितः संवर्धितश्च पञ्चायतप्रशासनतरुवरोऽयं प्रफुल्लः सत्फलश्च भूत्वा समासामेव प्रजानां समाऽऽशानां संप्रपूरणक्षमो भूयात् इति––

श्रील ! नेपालपालेन्द्र ! वीरेन्द्र ! जनवल्लभ !
शुभराज्याभिषेकोऽयं योगक्षेम करोऽस्तु ते ।।
इति च श्रीगुह्येश्वरीसनाथं श्रीपशुपतिनाथं प्रार्थयमानस्य––
हिन्दुराज्यं जना धर्म्या राजा वंशक्रमागतः ।
तस्य राज्याभिषेकोऽयं वेदोक्तविधिना भवन् ।।

राष्ट्रस्य परमं श्रेयो विधातेति दृढाऽशया ।
प्रमोदितस्य लोकस्य, लेखनी विरताऽधुना ।।

ॐ तत्सत् ।

★

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुराणानि शास्त्राणि चिरन्तनानि च

प्रा० विश्वनाथ पोखरेल:

श्रुतिविहितधर्मस्य दर्शनस्य चाऽनायासेन प्रबोधनार्थं कथोपकथारूपेण प्रादुर्भूतानि हि पुराणानि। श्रुतिप्रतिपादित-विविधविषयाणां वैदिकभाषायाः काठिन्येन सहसा येन केनापि बोद्धुमशक्यत्वात्परमकारुणिकैः पूर्वाचार्यैस्तेषामेव वेदोक्तविषयाणां प्रचाराय प्रसाराय तथा सुखबोधाय च पुराणानि रचितानीति मन्यमानोऽहं केषाञ्चिद्ग्रन्थानां विद्वल्लेखानां चाऽऽश्रयमवलम्ब्य पाठकहृदयाऽऽह्लादनाय पुराणानि शास्त्राणि चिरन्तनानि चेति प्रदर्शयितुमुत्सहे। अद्यपर्यन्तमपि यानि शास्त्राणि भारतवर्षे भरतखण्डान्तर्गत-नयपालप्रदेशे च प्रादुर्भूय सनातनधर्मस्योपोद्वलकानि सन्ति। तेषां विभाग एवं भवति। प्रथमं वेदशास्त्रं, द्वितीयं वेदाङ्गशास्त्रं तथोपवेदशास्त्रं च, तृतीयं दर्शन-शास्त्रं, चतुर्थं स्मृत्यादिधर्मशास्त्रं, पञ्चमं सेतिहासपुराणशास्त्रं, षष्ठं तन्त्रशास्त्र-मेवं सप्तममार्षसंहिताशास्त्रञ्चेति। सनातनधर्मस्य मूलं तु वेदशास्त्रमेव तस्याऽपि—ऋग्यजुःसामाऽथर्वाभिधेयाश्चत्वारो विभागाः सन्ति। तथा प्रतिविभागमवान्तरविभागाश्च त्रयः सन्ति यथा—मन्त्रो ब्राह्मणमुपनिषदिति, परमेषां सर्वेषां वेदसंज्ञाऽस्ति। षड्वेदाङ्गानि सन्ति, यथा—शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्यौतिषं चेति। उपवेदाश्च चत्वारो विद्यन्ते—यथाऽऽयुर्वेदो धनुर्वेदो गान्धर्ववेदः स्थापत्यवेदश्चेति। तथा षड्दर्शनानि सन्ति—कपिलोक्तं सांख्यदर्शनं, पतञ्जलिप्रकाशितं पातञ्जलदर्शनं, महर्षि गौतमप्रकाशितं न्यायदर्शनम्, जैमिनिप्रकाशितं मीमांसादर्शनं, तथा वेदव्यासोक्तं वेदान्तदर्शनं चेति। इतोऽन्यानि शाण्डिल्यपाशुपतादीनि दर्शनशास्त्राणि च नयनगोचरं समागच्छन्ति। ततः स्मृत्यादि-धर्मशास्त्राणि सन्ति, तेषामाचार्याश्च मन्वत्रिविष्णुहारीत— याज्ञवल्क्योशनाऽङ्गिरोयमाऽऽ पस्तम्ब—संवर्त—कात्यायन—बृहस्पति—पराशर—भरद्वाजव्यास—शंख—दक्ष-गौतम—शातातप—वशिष्ठाश्चेति। अतः परं नारदादीनाञ्च संहिताः सन्ति। तन्त्रशास्त्रस्य ग्रन्थाश्च-महानिर्वाण-कुलार्णव-ज्ञानसंकलिनी-ब्रह्मयामलादयो वहव उपलभ्यन्ते। एवं नारदाऽष्टावक्रादिप्रणीता आर्षसंहिताग्रन्था दृष्टिपथमायान्ति। एवंविधेषु सर्वेषु सनातनधर्मसंरक्षकेषु शास्त्रेष्वाचार्येषु च सत्स्वपि पुराणस्य वैशिष्ट्यं प्रदर्शनीयमितिधिया चैतल्लिख्यते। पुराणं शास्त्रमस्ति, तस्य च द्वौ भागौ स्तः, महापुराणान्युपपुराणानि च, ब्रह्म पद्म-विष्णुशिवलिङ्ग—गरुडनारद—भागवताऽग्नि—स्कन्द—भविष्य—ब्रह्मवैवर्तमार्कण्डेय—वामन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाराह–मत्स्य–कूर्म–ब्रह्माण्डादीनि महापुराणानि । उशनआदित्यकल्किकापिलकालिका दुर्वासोनन्दि–बृहन्नारदीय–नृसिंह–पाराशर–भार्गवमहे–श्वरवारुण––वासिष्ठ–साम्ब–शिव–सनत्कुमार–सौरादीन्यष्टादशोपपुराणानि कथ्यन्ते । परं रामायणमहाभारतग्रन्थौ त्वितिहासत्वेन प्रसिद्धौ स्तः । तथैतेभ्यः पुराणोपपुराणेभ्य इतरे मानवाऽऽदि मुद्गल बृहद्धर्मादयः पुराणग्रन्था स्तथा व्यासलोमहर्षण–सावर्ण्य–पुराण–संहितादिग्रन्थाश्चोपलभ्यन्ते । सर्वाणि चेमानि पुराणानि भगवच्छ्रुतिविहितसनातनधर्ममनुसृत्य मन्दमतीनां सङ्गतिप्रदानाय सरलया रुचिप्रदया भाषयोपदिशन्ति, परं श्रुतितो न वहिर्गच्छन्ति । अतः प्रवृत्तिनिवृत्तिरूपोपदेशकानि पुराणानि श्रुतिस्मृतिसंमतानि तथाच––

"प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा । पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते ।।"

इति वचनाच्च शास्त्राण्येव । यतोऽस्मिन्कलिकालकवलितेऽपि दुराचारमये समये पुराणानां प्रचारो यत्र कुत्राऽपि श्रूयते । अतः पुराणानां विवरणमस्माभिर्वोद्धव्यमेव । पुराणग्रन्था इतिहासग्रन्थाश्चाऽभिन्नजातीयाः केवलं येषु ग्रन्थेषु प्राचीनकथाः प्रायोभवन्ति त इतिहास ग्रन्थाः कथ्यन्ते यथा रामायण–महाभारतादयो ग्रन्थाः येषु सृष्टिक्रियाया विवरणमाधिक्येनोपलभ्यन्ते ते ग्रन्थाः पुराणपदवाच्या भवन्ति, यथा-शिवपद्मादयः । "इतिहासः पुराणम्" इति वाक्येन पूर्वाचार्यैं र्यानि यानि शास्त्राणि प्रकाशितानि, तेषामिदमेव तात्पर्यं कथोपकथाभ्यां वेदाऽभिप्राय प्रकाशनम् । प्राचीनकालतः पुराणशास्त्रं नैपालकानां च प्रियमस्ति तद्वदधुनाऽपि धर्मग्रन्थेषु पुराणस्यैव सर्वत्र प्रचारो दृश्यते । अस्य निदानं त्विदमेव हि, धर्मविषयकगभीरग्रन्थानां विवेके सामान्यजनानां रुचिस्तावन्मात्रं नैव जायते यावन्मात्रं सरलेतिहासपूर्णधर्मग्रन्थेषु भवति । तथापि विद्याभिमानिनः केचन महाशयाः शङ्कन्ते यत्पुराणशास्त्रमाधुनिकमेव परं वैदिककाले नासीदिति । अस्याः शङ्काया निवारणायोपनिषदादिग्रन्थेषु वहूनि प्रमाणानि लभ्यन्ते । शतपथब्राह्मणे यथा––"ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसो इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि," तथा छान्दोग्योपनिषदि "ऋग्वेदं भगवो ध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थं मितिहासं पुराणं पञ्चमम्" । तथा मनुसंहितायामपि प्रमाणं लभ्यते "स्वाध्यायं श्रावयेत्पित्रे धर्मशास्त्राणि चैव हि । आख्यानानीतिहासांश्च पुराणानि खिलानि च । एतत्प्रमाणाऽध्ययनेन स्पष्टं ज्ञायते पुराणानां प्रचारो चिरन्तनकालादेवाऽऽसीत् । एवं वेदे बहुषु स्थानेषु पुराणस्य तथेतिहासस्य च वर्णनमायाति च कुत्रचित्तु पुराणेतिहासयो रेतद्विधा व्याख्या विलोक्यते यत्र देवाऽसुरादेर्युद्धवर्णनं विशेषेणोपलभ्यते तस्येतिहाससंज्ञा भवति, यत्र च सृष्ट्यादेर्वर्णनं विशेषतोपलभ्यते तस्य तु पुराणसंज्ञा ज्ञायते पूर्वोक्तैः प्रमाणैः पुराणस्य चिरन्तनत्वमपि सिध्यति । परमधुना व्यासादिनिर्मितानि पुराणानि प्राप्यन्ते, प्राचीनै–रन्यैराचार्यैर्निर्मिता ग्रन्थास्तुलुप्तप्रायाःसन्ति । बौद्ध–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विप्लव-यवन-विरोधादिभिरनल्पकारणैरध्यात्म-विद्या नष्टा तथाऽपरिमितधर्मग्रन्थाश्च नष्टाः । परमस्माकं पूर्वाचार्यैः कीदृशमत्यावश्यकमुद्दिश्य साधयितुं पुराणानि प्रकाशितानीति तल्लक्षणदर्शनादेव वक्तुं शक्यते । तल्लक्षणानि तु ब्रह्मवर्वतपुराणे यथा

'सृष्टिश्चापि विसृष्टिश्च स्थितिः, तेषां च पालनम् ।
कर्मणां वासना वार्ता मनुना च क्रमेण च ।

वर्णनं प्रलयानां च मोक्षस्य च निरूपणम् ।
उत्कीर्तनं हरेरेव देवानां च पृथक् पृथक् ।।"

मूलसृष्टिर्विस्तृतसृष्टिस्तथा जगत् स्थितिस्तेषां पालनम्, कर्मणि वासनावार्ता मनुष्यप्रकाशक्रमः प्रलयो मोक्षो हरिकीर्तनं, देवानां पृथग्गुणवर्णनञ्चेति ।

एवं प्राचीनकालात् सनातनधर्मरक्षकाणि, पुराणानि शास्त्राणि चिरन्तनानि चेति । परं पुराणेष्वाख्यायिकाया भिन्नभिन्नस्थानेषु विभिन्नरूपस्य वर्णनं दृष्ट्वा ये लोकाः सन्देहं गच्छन्ति परं ते पुराणस्य यथार्थाऽभिप्रायमविदित्वैव मिथ्यासन्देहसृतौ वृथा धावन्ति । अस्माकं त्रिकालदर्शिभिराचार्यैरस्य विषयस्यैवं याथार्थ्येनोद्घाटनं कृतमस्ति । पुराणेषु त्रिविधा भाषा भवन्ति-समाधिभाषा, परकीयभाषा लौकिकभाषा चेति । समाधौ तु कस्याऽपि दृष्टपदार्थस्याऽनुभवो नहि विधीयते, समाधिगम्यानि हि परब्रह्मेश्वरजीवसृष्टि स्थितिलयकर्मवर्णनान्येव । यत्र यत्र पुराणशास्त्रे लोककल्याणार्थं परब्रह्मादीनां वर्णनानि समायान्ति तेषामेव भाषा समाधिभाषेति कथ्यते । केनचिदित्थं कथितमासीदिति परहिताय श्रुतवाचः कथनं यदा भवति तां परकीयभाषां वदन्ति । यत्र लौकिकरीत्या कस्याऽपि प्रसङ्गस्य वर्णनं भवति सा लौकिकभाषा । यथ यावद् भगवता कृष्णचन्द्रेण सह सत्सङ्गं विधाय रात्रिर्गता ताम्रचूडाश्च निनेदुस्तावद् गोप्यः सकोपा स्ताम्रचूडान् तिरश्चक्रुरिति । एवं विविधानां लोकानां मङ्गलार्थं नानाविधया रीत्या सत्यवस्तु प्रतिपादयन्ति पुराणशास्त्राणि, किन्तु वर्णनभेदेऽपि सत्यवस्तुभेदो नास्ति । अथ कथयितुं शक्यते शास्त्राणां सम्यगनध्ययनाद्वा सविवेकमश्रवणाच्च चेतसि मालिन्यं निवसति ततः स्वकीयविवेकदोषेऽपि धर्मग्रन्थं सर्वज्ञमाचार्यं च दूषयितुं न लज्जन्ते जनाः । पूज्यमहर्षिभिस्तु सर्वविधानां जनानां कल्याणायैव पुराणानां रचना विहिताऽऽसीत् । परं पुराणेषु भाषाभेदादाधुनिका जिज्ञासवो विचलिता दृश्यन्ते तथा पुराणानां वर्णनवैचित्र्याच्च ते तानि तिरस्कुर्वन्ति । पुनस्ते पुराणोक्तं विज्ञानविरूद्धमिव स्मारं स्मारं विमनायन्ते विरोधिन इव च जायन्ते । परं बुद्धिमन्तो वदन्ति पुराणानां विज्ञानस्य च सम्यगनभ्यासवशादेव भ्रमः समुत्पद्यते । ते यदाऽऽर्यशास्त्रस्य शिक्षां गुरुपरम्परया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लभन्ते ततो विज्ञानं चोत्तमरीत्याऽभ्यस्यन्ति तदा तद्विधभ्रमे न मज्जन्ति। एतदेव सत्यव-चनं नोचेदार्यग्रन्थोक्ताः पुराणाचार्यप्रतिपादिता दिव्यभौमलौकिकादयो ये ये विषयाः सन्ति तेषु प्रतिशतं पञ्चनवतिभागाः पाश्चात्यविज्ञानपद्धत्या च सत्यतां प्राप्ता। तत् कथमवशिष्टा अन्यभागा असत्या भवेयुः। अतः केवलं स्मरणभेदात्पुराणतात्पर्याऽनवगमादेव जिज्ञासवो भ्रममग्नाः सन्ति। अहं तु तेषां बुद्धिमालिन्यमेव भ्रमहेतुरितिमन्ये।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुराणेषु श्रीमद्भागवतस्य वैशिष्ट्यम्

विष्णुप्रसादज्ञवाली:

ज्ञानविज्ञानयुते परिसृतप्रवाहे दुरवगाहे परःसहस्रबाधेऽगाधे संसाराब्धौ श्रीमद्भागवतमेव पुराणेषु वैशिष्ट्यम् भजते । द्वादशस्कन्धमयः पञ्चत्रिंशदुत्तरत्रिशताध्यायकल्पिताष्टादशसहस्रश्लोकपरिमितोऽयं ग्रन्थः कल्पद्रुमसमानो वर्तते । अस्मिन् ग्रन्थे सर्वे विषयाः सर्वाणि शास्त्राणि च समाविष्टानि सन्ति । व्यासेक्तेन– "निगमकल्पतरोर्गलितं फलम्" इति निर्दिष्टश्लोकांशेन सर्वाणि पुराणानि पत्रपुष्परूपाणि श्रीमद्भागवतं परिपक्वफलमेवेति । यथा साधारणजनानां फलभक्षणादेव तृप्तिर्जायते तथा रसिकानां भक्तानां श्रीमद्भागवतरसपानादेव तृप्तिर्भवति । अत्र प्रमाणानि निर्दिष्टानि अपि सन्ति– व्यासेन पूर्वं सप्तदशपुराणानि निर्मितानि । परन्तु मनसि शान्तिर्न जाता । अतः सरस्वतीनदीतटे निवसता व्यासेन नारदोपदेशात् श्रीमद्भागवतंनिर्मितम् । भागवतस्य निर्माणप्रपञ्चेनैव व्यासदेवस्य मनसि शान्तिर्जाता । तद्वत् परीक्षितं सभायां कथां वक्तु संस्थिते शुके सुधाकुम्भं गृहीत्वा देवास्तत्र समागमन् । कथासुधां प्रयच्छस्व गृहीत्वैव सुधामिमाम् । एवं विनिमये जाते सति राज्ञा सुधा प्रपीयताम् । वयमपि श्रीमद्भागवतामृतं प्रपास्याम इत्युक्ते सति क्व काचः क्व मणिर्महान् क्व सुधा क्व कथेत्युत्वा शुकदेवो देवानुपजहास । देवानभक्तान्विज्ञाय न ददौ स कथामृतम् । राज्ञः परीक्षितो मोक्षं वीक्ष्य ब्रह्मणापि सत्यलोके पुरा तुलां बद्ध्वा तुलिते सति सप्तदशपुराणानि लघूनि जातानि, श्रीमद्भागवतं गुरु जातम् । अतो देवर्षिगणा विस्मिताः सन्तो भगवद्रूपमेव भागवतं मेनिरे । श्रीमद्भागवते यदस्ति तदन्यपुराणेषु नास्ति । अन्यपुराणेषु यदस्ति तद् श्रीमद्भागवत एव । द्वितीयस्कन्धे योगशास्त्रनिर्दिष्ट–सद्योमुक्तिक्रममुक्त्योः विशेषवर्णनं वरीवर्ति । तृतीयस्कन्धे कपिलदेवहूत्योः संवादे सांख्यशास्त्रस्य विवेचनाऽस्ति । चतुर्थस्कन्धे वेनस्यैकाधिपत्यं पृथोः प्रकृतिरञ्जनराज्यस्य च सौन्दर्यवर्णनमस्ति । पञ्चमस्कन्धे ज्योतिषखगोलभूगोलशास्त्राणां विशेष विन्यासोऽस्ति । नारद–युधिष्ठिरयोः संवादे सप्तमस्कन्धे धर्मशास्त्रप्रतिपादितानां चतुर्णामाश्रमाणामादर्शसमाजस्य च गौरवोल्लेखोऽस्ति । उक्तञ्च–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यावद्भ्रियेत जठरं तावत् स्वत्वं हि देहिनाम् ।
अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति ।।

दशमस्कन्धे पूर्णावतारस्य श्रीकृष्णस्य लीलाया वैचित्र्यवर्णनमस्ति । एकादशस्कन्धे कृष्णोद्धवसंवादे वेदान्तादिदर्शनानां विषया विशेषरूपेण वर्णिताः सन्ति । वेदस्तुत्या विशेषवर्णनान्निगमकल्पतरोरित्युक्तत्वाच्च वेदानां साररूपमेव भागवतम् । षष्ठस्कन्धे नारददक्षकथाप्रसङ्गे प्रवृत्तिनिवृत्तिमार्गयोश्च वैशद्ये चर्चाऽस्ति । अष्टमनवमस्कन्धयोः धन्वन्तरिच्यवनकथाप्रसङ्गवर्णने भैषज्यविशेषविषयोल्लेखोऽस्ति । नमुचिदानवकथायां धनुर्वेदशास्त्रस्य वैशिष्ट्यं वरीवर्ति । कर्दमस्य कामगविमानस्य मयदानवरचितस्य त्रिपुरस्यच वर्णनाच्च विज्ञानस्यापि विशेषो दरीदृश्यते । ज्ञानवैराग्ययोर्भाण्डागारमेव भागवतम् । अतः सकलशास्त्राणां पठनपाठनमननिदिध्यासनादि कर्तव्यम् । ततः भागवतवैशिष्ट्यज्ञानं बोभवीति । एतदेवोक्तम् "विद्यावतां भागवते परीक्षा,, । भागवतज्ञानाय प्रकाण्डपाण्डित्यप्राचुर्यमावश्यकमस्ति । अष्टादशपुराणानां शरीरावयवप्रसङ्गवर्णने श्रीमद्भागवतं भगवतो विष्णोर्हृदयम् । अन्यानि पुराणान्यवयवाः । अतो हृदयं विना कोऽपि जीवितुं नार्हति । अन्यावयवान् विनाऽपि जनाः प्रायेण जीवन्ति । एतत्प्रसङ्गेनाऽपि भागवतस्यैव वैशिष्ट्यं प्रतिपाद्यते । मण्डलवर्तिनां राज्ञां मध्ये चक्रवर्तिनः राज्ञः स्थानवत् सकलपुराणेषु श्रीमद्भागवतस्यैव वैशिष्टं स्थानं वरीवर्ति, उक्तञ्चात्र--

पाद्मब्राह्मगृहीतचामरयुगो वाराहसंवीजितो
ब्रह्माण्डेन धृतातपत्रमनिशं स्कन्दादिभिः संस्तुतः ।।
श्रीमद्वैष्णवसेवितानुगमनः सर्वेप्सितार्थप्रदः
श्रीमद्भागवताऽभिधो विजयते सम्राट् पुराणप्रभुः ।।

श्रीमद्भागवतस्य पुराणेषु यन्महत्वं यद्वैशिष्ट्यं या च शक्तिः यद्वैभवं समुल्लसति तन्महत्वं सा शक्तिः तद्वैभवं नान्यपुराणेषु समुल्लसति । द्वादशस्कन्धे सूतपौराणिकेन शौनकादिभ्योऽपि 'सर्ववेदान्तसारं हि श्रीभागवतमिष्यते । वैष्णवानां यथा शम्भुः पुराणानामिदं तथा, इत्यादि-विशिष्टश्लोकांशानां तात्पर्यबोधस्य बोधनात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपि भास्करस्य भूभानयनप्रकारः स्थूलः ?

–साम्बराज आचार्यः

भास्कराचार्येण सिद्धान्तशिरोमणेर्ग्रहगणिताध्यायस्य चन्द्रग्रहणाधिकारे चन्द्रग्रहणोपयोगि भूभामानसाधनं विहितम् । सा भूभा चन्द्रकक्षायां नागता । चन्द्रकक्षातो बहिरागता । तेन न तया स्पर्शादिकालः सम्यक् घटते । भूभामानस्य न्यूनत्वात् । अतो भास्करस्य भूभामानसाधनप्रकारः स्थूल इति मुनीश्वरकमलाकरादीनां मतम् ।

मुनीश्वरस्य भूभामानसाधनप्रकारे यत्क्षेत्रमुत्पद्यते, तस्य विभावनया मुनीश्वरसाधितभूभामानमपि वास्तवभूभामानान्न्यूनमेव भवतीति कमलाकरेण प्रतिपादितम् । मुनीश्वरस्य भूभामानसाधने या त्रुटिः सा गेनालालमहोदयेन समुद्भाविता गङ्गाधरमिश्रमैथिलेन सिद्धान्ततत्त्वविवेकस्य टीकायां क्षेत्रविन्यासपुरःसरं प्रदर्शिता । तेन मुनीश्वरस्य प्रकारोऽपि स्थूल एव । अतः कमलाकरेण स्वप्रकारः प्रदर्शितः । स च प्रकारः सर्वैराधुनिकैश्च स्वीक्रियते । परन्तु तत्साधनप्रकारस्य गौरवात् बापूदेवसुधाकरप्रभृतिभिर्ज्योतिर्विद्भिः स्व–स्वप्रकारो दर्शितः ।

भास्करस्य भूभामानसाधने प्रबन्धमणिमालायां गङ्गाधरमिश्रमैथिलेनेत्थं लिखितम्–

"तत्र तावद्भास्कराचार्यभूभाप्रदेशो वर्ण्यते–"भूव्यासहीनं रविविम्बमिन्दुकर्णाहतं भास्करकर्णभक्तम् । भूविस्तृतिर्लब्धफलेन हीना भवेत् कुभाविस्तृतिं रिन्दुमार्गे ।" इत्युपपत्तिविभावनया चन्द्रकर्णच्छिन्नचन्द्रकक्षाप्रदेशाद्भूभापृष्ठसूत्रे या लम्बरेखा तत्तुल्यव्यासार्धं भूभाया आगतम् । अर्थात्तल्लम्बमूलाद्भूभासूच्यग्रं यावत्खण्डं तदधिकं चन्द्रकक्षातस्तत्सूच्यग्रपर्यकं(न्तं) भुभामध्यसूत्रे कर्णरूपमस्ति । अत एव तत्सूचीशीर्षाद्विलोमेन संमुखं कोटिरूपं छिद्यते, तदा तच्छेदनविन्दुश्चन्द्रकक्षातः ऊर्ध्वमेव स्यादतो भास्करोक्ता भूभा नहि चन्द्रकक्षागता सिद्धेति विदुषां सुविदितमेवास्तीति ।"

तथैव कपिलेश्वरशास्त्रिणा सूर्यसिद्धान्तस्य टीकायां भास्करस्य भूभानयने 'मुनीश्वरोक्तसिद्धान्तसार्वभौमे या भूभा सा चन्द्रकक्षास्पर्शकर्त्री भवति, अर्थात्तदुक्तभूभाकेन्द्रं चन्द्रकक्षाछिन्नमध्यसूत्रगत सिद्धयति । तेन सा सौरोक्तभास्करोक्तभूभापेक्षया किञ्चित्सूक्ष्मा भवतीति' इति लिखितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतावता भास्करस्य भूभानयने क्षेत्रगता स्थूलता जातेति सर्वेषामैकमत्यम् । परन्तु वस्तुतस्त्वगता स्थूलता भास्करप्रकारे अस्ति वा नास्तीति विचार्यते । यदि वस्तुतत्त्वगता स्थूलताऽपि भास्करप्रकारे स्वीक्रियते तदा भास्करेण स्वप्रकारस्य स्थौल्यं कथं नानुभूतम् ? ग्रहणं हि दृक्प्रत्यक्षं भवति, दृक्प्रत्यक्षे विषये स्वगणना मिलति वा न मिलतीति अनुभवितुं शक्यते । दृक्प्रत्यक्षे विषयेऽपि भास्करस्य तादृशो दोषः कथं जातः ? किं भास्करेण स्वग्रन्थरीत्या गणना न कृता ? कृता चेत् स्वकीयदोषस्य निराकरणं किमिति न कृतम् ! अत्र विविधाःशङ्कोपशङ्का जायन्ते, भवतु तावदेष विषयः । प्रथमं भास्करस्य प्रकार एवात्र प्रदर्श्यते–

भास्करस्य योजनात्मक भूभाविम्बसाधने सूत्रम्–

'भूव्यासहीनं रविविम्बमिन्दुकर्णाहतं भास्करकर्णभक्तम् ।
भूविस्तृतिर्लब्धफलेन हीना भवेत् कुभाविस्तृतिरिन्दुमार्गे ॥'

सूत्रानुसारस्वरूपम्–

$$\text{भूभा} = \text{भूव्या} - \left(\frac{\text{सूव्या} - \text{भूव्या}}{\text{सूक}} \right) \text{चक.}$$

योजनात्मिकाया भूभायाः कलाकरणार्थं भास्करसूत्रम्–

'सूर्येन्दुभूभातनुयोजनानि
त्रिज्याहृतान्यर्कशशीन्दुकर्णैः ।
भक्तानि तत्कार्मुकलिप्तिकास्ता–
स्तेषां क्रमान्मानकला भवन्ति ॥'

अनेन सूत्रेण यदि योजनात्मिकां भूभां त्रिज्यया संगुण्य चन्द्रकर्णेन विभज्यते तदा कलात्मिका भूभा भवतीति स्पष्टमेव ।

$$\therefore \text{कलात्मिकाभूभा} = \left\{ \text{भूव्या} - \left(\frac{\text{सूव्या} - \text{भूव्या}}{\text{सूक}} \right) \text{चक} \right\} \frac{\text{त्रि}}{\text{चक}}$$

$$= \frac{\text{भूव्या} \times \text{त्रि}}{\text{चक}} - \frac{\text{सूव्या} \times \text{त्रि}}{\text{सूक}} + \frac{\text{भूव्या} \times \text{त्रि}}{\text{सूक}}$$

$$= \text{२ चंपलं} - \text{सूर्यबिम्बम्} \times \text{२ सूपलं}$$

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

$$\frac{\text{कलात्मकभूभा}}{२} = \text{चपलं} - \frac{\text{सूवि}}{२} \times \text{सूपलं}$$

$$= \text{सूपलं} + \text{चपलं} - \frac{\text{सूवि}}{२}$$

अनेन स्वरूपेण

दिवाकरनिशानाथपरलम्बनसंयुतिः ।
रविबिम्बार्धरहिता भूभाबिम्बदलं भवेत् ।।"

इति म. म. बापूदेवशास्त्रिमहोदयप्रकार उपपद्यते । अर्थात् शास्त्रिप्रकारे यत्स्वरूपं तदेव भास्करप्रकारेऽपि सिद्धमिति स्पष्टमेव ।

एतावता वयं निश्चयरूपेण वक्तुं शक्नुमो भास्करप्रकारेऽपि केवलं क्षेत्रगता स्थूलता न तु वस्तुतत्त्वगतेति ।

++

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काव्यप्रकाशस्याभिनवाविवृतिः

–शिवराजस्य आचार्यस्य

मम्मटविरचितेऽलकपूरिते
काव्यप्रकाशे
प्रथम उल्लासः

ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत् परामृशति–

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ॥१॥

अथ हैमवती काव्यप्रकाशविवृतिः प्रारभ्यते ।

प्रतिपाद्यविषयैक्यसूत्रसन्दृब्धानि वाक्यानि **ग्रन्थः** । द्वात्रिंशदक्षरात्मको ग्रन्थस्त्वन्यः । वाक्यश्च निराकाङ्क्षस्यार्थस्य वृत्तिद्वारा प्रतिपादकः शब्दः । **आरम्भ**-शब्दोऽत्रारम्भप्राक्कालं लक्षयति, आद्यकृतिरूपस्य मुख्यस्यार्थस्य बाधितत्वात् । चिरन्तनोऽप्याचार्यो विघ्नध्वंसमेव मङ्गलस्य फलं स्वीकुर्वन्नाह– **विघ्नविघातायेति** । विघ्नः प्रतिबन्धकोऽदृष्टविशेषः । **समुचिता** प्रतिपाद्यविषयानुरूपा **इष्टदेवता** अभिमता देवता ताम् । **परामृशति** स्मरति स्तुवीति वा ।

शिष्यशिक्षायै प्रवक्तॄणां श्रोतॄणां च मङ्गलाय च ग्रन्थे मङ्गलपद्यं निबध्नाति– **नियतिकृतेत्यादि** । तथा हि भूवादिसूत्रस्थभाष्ये भगवान् पतञ्जलिः–'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषाणि आयुष्मत्पुरुषाणि च भवन्ति अध्येतारश्च प्रवक्तारो भवन्ति' इति । **ह्लादैकमयीम्** ह्लादेन एकं (वस्तु) ह्लादैकम् । ह्लादेनेत्यत्र अभेदे तृतीया धान्येन धनवान् इत्यत्र 'अर्थेनैव विशेषो हि निराकारतया धियाम्' इत्यादौ च तथा दर्शनात्, प्रकृत्यादिभ्य उपसंख्यानमिति वार्त्तिकस्य प्रामाण्याच्च । एकशब्दः प्रायेण सङ्ख्येयवचनः 'सङ्ख्येये ह्यादश त्रिषु' इति कोषात् । 'द्व्येकयोर्द्विवचनैकवचने'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नियतिशक्त्या नियतरूपा सुखदुःखमोहस्वभावा परमाण्वाद्युपादान-कर्मादिसहकारि-कारणपरतन्त्रा षड्रसा, न च हृद्यैव तैः, तादृशी ब्रह्मणो निर्मितिर्निर्माणम्; एतद्विलक्षणा तु कविवाङ्निर्मितिः, अत एव जयति, जयत्यर्थेन च नमस्कार आक्षिप्यते इति तां प्रत्यस्मि प्रणत इति लभ्यते ।।

इत्यत्र सङ्ख्यापरोऽपि दृष्ट इति प्रायेणेत्युक्तम् । एकपदं दुःखमोहव्यवच्छेदाय । ह्लादैकं (वस्तु) प्रचुरं यस्यां सा ह्लादैकमयी, 'तत्प्रकृतवचने मयट्' (५।४।२१) इत्यस्य द्वितीयव्याख्यानस्य प्रामाण्यात् । **अनन्यपरतन्त्राम्** अनन्याधीनाम्, समवाय्यादिकारण-निरपेक्षामित्यर्थः । परतन्त्रशब्दोऽत्राधीनपर्यायः । **नवरसरुचिराम्** नवावयवो रसो नवरसः शाकपार्थिवादिसमासवृत्तिप्रामाण्यात् । रसशब्देनात्र उद्भूतावयवभेदको रस-समुदायो विवक्षितः । अथवा 'न हि रसाद् ऋते कश्चिदर्थः प्रवर्तते' इति भरतमुनिसूत्र-व्याख्याने 'पूर्वं च बहुवचनमत्र चैकवचनं प्रयुञ्जानस्यायमाशयः– एक एव तावत् परमार्थतो रसः सूत्रस्थानीयत्वेन रूपके प्रतिभाति, तस्यैव पुनर्भागदृशा विभागः' इति वदतोऽभिनवगुप्तस्य, अलङ्कारकौस्तुभे 'रसस्यानन्दधर्मत्वाद् ऐकध्यं भाव एव हि । उपाधिभेदान्नानात्वं रत्यादय उपाधयः' इति वदतः कर्णपूरस्य, 'मनोऽनुकूलेषु दुःखादिषु आत्मनः सुखाभिमानो रसः । स तु पारम्पर्येण सुखहेतुत्वाद् रत्यादिभूमसूपचारेण व्यवह्रियते' इति वदतो भोजराजस्य च विवेचनमनुसृत्य वस्तुतो रसस्य एकत्वमेवेति उपाधिभिरेव तस्य नानात्वप्राप्तिरिति नवोपाधिको रसो नवरस इत्यर्थो विवक्षितो बोध्यः । एवञ्चात्र द्विगुत्वाभावान्न महाभाष्यकारेष्ट्याः 'अकारान्तोत्तरपदो द्विगुस्त्रि-यामिष्टः' इत्यस्या विषयता । तेन रुचिरा मनोहारिणी । ह्लादैकमयीमिति पदेनालङ्कारादिजन्याह्लादजनकत्वमुक्तमिति नैतस्य विशेषणस्य पुनरुक्तता शङ्क्या । **आदधति** आविष्कुर्वती । **कवेः** काव्यकारस्य **भारती** काव्यरूपा वाणी, 'तत्तेज ऐक्षत' 'ता आप ऐक्षन्त' (छान्दोग्ये ६।२।३।४) इत्याद्युपनिषत्प्रयोगे इव अधिष्ठात्रधिष्ठेययोरभेदाध्यवसायात् काव्याधिष्ठात्री देवता च **जयति** उत्कर्षेण वर्तते । कवेर्भारतीत्यत्र कवेरिति काव्यपक्षे जन्यजनकभावरूपः सम्बन्धो देवतापक्षे आराध्यारा-धकभावरूपः, स षष्ठ्यर्थः, षष्ठी स्थानेयोगा (१-१-४९) इति सूत्रे भाष्ये 'एकशतं षष्ठ्य-र्थाः' इति वदता मुनिना पतञ्जलिना षष्ठ्या अनेकसम्बन्धविशेषार्थकत्वस्य प्रतिपादि-तत्वात् ।

स्तुतिगाथां विवृणोति– **नियतिशक्त्येत्यादिना** । ब्रह्मनिर्मितजगतः कविभारती-निर्मितजगतो व्यतिरेकं मङ्गलगाथाध्वनितं प्रदर्शयितुं पूर्वं ब्रह्मनिर्मितजगतः स्वभावमाह । **नियतिरदृष्टं** नियामकमसाधारणो धर्मो वा तस्याः शक्त्या स्वभावेन । **नियतरूपा**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इहाभिधेयं सप्रयोजनमित्याह-

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यःपरनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥२॥

कालिदासादीनामिव यशः, श्रीहर्षादेर्धावकादीनामिव धनम्, राजादिगतोचिताचारपरिज्ञानम्, आदित्यादेर्मयूरादीनामिवानर्थनिवारणम्, सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्, प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्सम्मितार्थतात्पर्यवत्-

---

नियतं निजनिजसंस्थानमानवर्णादिना व्यवस्थितं रूपं यस्याः सा । **सुखदुःखमोहस्वभावा** सुखदुःखमोहसम्भिन्नेत्यर्थः । लोकायतदर्शनाश्रयेण कार्यकारणभावं प्रदर्शयन्नाह-**परमाण्वादीति ।** परमाण्वाद्युपादानकारणस्य कर्मादिसहकारिकारणस्य चाधीना । षड्रसा मधुराम्लादयः षट् रसा यस्यां सा । **न च हृद्यैव तैः ।** हृदे मनसे हिताऽनुकूला हृद्या । तैर्मधुरादिभिः । तिक्तकषाययोः प्रायेणाहृद्यत्वात् मधुरादेरपि कदाचित् कस्यचिदहृद्यत्वस्य सम्भवात्, तैःषड्भी रसैर्न हृद्यैव न सर्वदा सर्वस्य मनोऽनुकूला एवेति भावः। **निर्मितिर्निर्माणं** जगदित्यर्थः । निर्मितिरिति कर्मणि क्तिन्, निर्माणमित्यत्र कर्मणि ल्युट् 'कृतो बहुलमिति वक्तव्यम्' इतिवार्तिकप्रामाण्यात् । ब्रह्मनिर्मितितः कविवाङ्निर्मितेराधिक्यमाह-**एतद्विलक्षणेति ।** काव्यसंसारे दुःखात्मकघटनाया अपि करुणादौ सुखजनकत्वस्य दर्शनात् अचेतनस्यापि मेघादेर्दौत्यादिकरणस्य दर्शनाच्च नियतिकृतनियमरहिता सुखैकमयी उपादानादिविविधकारणसङ्घटनानिरपेक्षा शृङ्गारादिभिर्नवभी रसैः, सर्वस्य सदा हृद्या मेघाद्यात्मकदूतादिरूपा कवेर्वाचो निर्मितिरस्ति, **अतएव जयति** उत्कर्षेण वर्तते । निरवधिकेन चोत्कर्षेण भारत्याः सर्वेभ्य उत्कृष्टत्वमुपलभ्यते । तादृशेन जयत्यर्थभूतेन चोत्कर्षेण सर्वस्तां प्रत्यस्ति प्रणत **इति** गम्यते उत्कृष्टस्य नमस्कार्यत्वात् । नमस्कारः प्रणतिः, स्वकीयापकृष्टत्वज्ञानाविष्करणानुकूलो व्यापारः । अपकृष्टत्वं नमस्कार्यतः । ततश्चाहं तां प्रत्यस्मि प्रणत **इति** लभ्यते अर्थात् । वृत्तौ प्रथम **इति**शब्दो हेत्वर्थको द्वितीयस्तु प्राकाश्यार्थकः, 'इति हेतुप्रकरणप्रकाशादिसमाप्तिषु' इति नामलिङ्गानुशासनकोषात् । अत्र नियतिकृतेत्यादिभिरुत्कर्षहेतुगर्भैः विशेषणैः ब्रह्म-भारतीनिर्मित्योरुपमानोपमेयभावे आक्षिप्ते उपमानभूतविधिनिर्मितित उपमेयायाः कविभारतीनिर्मितेराधिक्यं प्रतीयते ततश्च ब्रह्मतः कविभारत्या आधिक्यमिति व्यतिरेकालङ्कारो व्यज्यते । 'उपमानाद् यदन्यस्य व्यतिरेकः स एव सः ।' इति हि व्यतिरेकालङ्कारलक्षणम् । अलङ्कार्यस्य व्यङ्ग्यस्यापि अलङ्कारशब्देन व्यवहारो ब्राह्मणश्रमणन्यायादिति ग्रन्थकृदेव प्रतिपाद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया

यिष्यति । श्रमणो बौद्धो भिक्षुः। श्रमणीभूतस्य न ब्राह्मणत्वं तथापि भूतपूर्वगत्या तथोच्यते तथैवात्रापि । पर्यन्ते च ग्रन्थकर्तुर्भारतीविषयको रत्याख्यो भावः स्फुटं प्रतीतिपथमवतरति । तेन चास्या गाथाया ध्वनिकाव्यत्वम् ।। १ ।।

प्रयोजनप्रतिपादनमावश्यकमित्याह– **इहेति । इति**र्हेत्वर्थः । लोके प्रेक्षावता मभिधेयं प्रयोजनसहितं भवतीतिहेतोरस्य ग्रन्थस्यापि प्रयोजनमाहेत्यर्थः। अथवा इह ग्रन्थे यत्प्रतिपाद्यं तत्प्रयोजनसहितं विद्यते इति काव्यं यशसे इत्यादिना प्रतिपादयतीत्यर्थः। अस्य ग्रन्थस्य काव्यशिक्षात्मकत्वेन एतदनुसारमभ्यासः काव्यहेतुघटक इति ग्रन्थस्यास्य काव्योपकारकत्वम् उपकारकस्य चोपकार्यफलेनैव फलवत्त्वमतः काव्यफलेनैवायं ग्रन्थोऽपि फलवानिति काव्यप्रयोजनान्याह– **काव्य**मित्यादिना । **अर्थकृते व्यवहारविदे उपदेशयुजे** इति सर्वत्र भावार्थकप्रातिपदिकानि तादर्थ्यचतुर्थ्यन्तानि, सम्पदादिभ्यः क्विबिति कात्यायनव्याकृतेः सम्पदादेराकृतिगणत्वस्वीकाराच्च । अर्थकरणाय व्यवहारवेदनाय उपदेशयोगाय इति तेषामर्थाः। कृदभिहिताभावो द्रव्यवद् भवतीति हि सार्वधातुके यगितिसूत्रे महाभाष्यकारः । **परनिर्वृतिः** परमानन्दः । **कान्तासम्मिततया** कान्तातुल्यतया भवतीति शेषः । एवञ्च काव्यं यशसे भवतीत्यादयोऽप्यर्थाः, प्रत्येकमपि वाक्यपरिसमाप्तेः ।।२।।

कारिकामुदाहरणपूर्वकं व्याचष्टे– **कालिदासादीनामित्यादिना ।** काव्यं कवेः कालिदासादीनामिव यशः धावकादीनामिव धनं करोति, सहृदयस्य राजादिगतोचिताचारपरिज्ञानं करोति, कवेः सहृदयस्य च मयूरादीनामिवानर्थनिवारणं करोति, (आस्वादकत्वे सहृदयत्वस्यैव प्रयोजकत्वात्) सहृदयस्य विगलितवेद्यान्तरमानन्दं रामादिवद् वर्तितव्यं न रावणादिवदित्यद्युपदेशञ्च करोतीत्यर्थः । **इति** अस्माद्धेतोः **सर्वथा** सर्वप्रकारेण दोषपरिहारेण रससन्निवेशादिना **तत्र** काव्ये **यत्नीयम्** करणाय यत्नः कार्य इति भावः । आस्वादनायापि इति केचित् ।

कालिदासः काल्या दासः ङ्यापो संज्ञाछन्दसोर्बहुलमिति (६–३–६३) पाणिनिव्याकृतेः । अत्र वाल्मीक्यादीनामिति वक्तव्ये कालिदासादीनामित्युक्तिः वाल्मीक्यादीनां दिव्यादिव्यप्रकृतित्वान्न काव्यमात्रकृतं तेषां यशः कालिदासादीनान्तु अदिव्यप्रकृतीनामज्ञातकुलशीलानां काव्यमात्रकृतं तदिति विवेकादिति ज्ञेयम् । **श्रीहर्षादेरिति** पञ्चम्यन्तम् । **धावक**नामा कवी रत्नावलीं नाटिकां कृत्वा श्रीहर्षाय राज्ञे समर्पयामास, श्रीहर्षश्च धावकाय प्रचुरं धनं दत्त्वा तां नाटिकां स्वकृतत्वेन ख्यापयामासेति सहृदयसमाजे प्रसिद्धिः । **राजादिगतोचिताचारा** राजादेः समुचिता व्यवहारा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राजादिविषयका अन्येषां वा उचिताचाराः । **आदित्यादे**रिति पञ्चम्यन्तम् । मयूराख्यः कविः पद्यानां शतेनादित्यं स्तुत्वा कुष्ठरोगादुल्लाघतां जगामेति प्रसिद्धिः । प्रसिद्धश्च मयूरशतकाख्यं सूर्यशतकापरनामकं काव्यम् । अलौकिकानन्द एव काव्यस्य मुख्यं फलमिति स्वीकुर्वन्नाह– **सकलेत्यादि** । **मौलिः** चूडामणिः (शिरोरत्नम्) । मौलिभूतं मुख्यमित्यर्थः । **समनन्तरमेव** काव्यश्रवणानन्तरमेव । रस्यते इति रसः स्थायिभावस्तदास्वादनेनास्वादकरणभूतेन विभावानुभावव्यभिचारिसंयोगेन समुद्भूतं व्यक्तम् । **विगलितं** तिरोहितम् । अन्यद् वेद्यं वेद्यान्तरम्, मयूरध्वंसकादीनां तथा व्याकरणोपदेशात् । विगलितं वेद्यान्तरं यस्मिन् स तम् विज्ञेयान्तरसम्पर्कशून्यमित्यर्थः, विषयान्तरभानरहितमिति भावः । काव्यफलभूतस्योपदेशस्य वैशिष्ट्यं प्रतिपादयितुमुपात्तस्य कान्तासम्मिततयेत्यस्य सकलमर्थमाविष्कुर्वन्नाह– **प्रभुसम्मितेत्यादि** । **प्रभुसम्मितानि** प्रभुतुल्यानि शब्दप्रधानानि वेदादिशास्त्राणि । यथा प्रभुराज्ञाबोधकस्य शब्दस्य परिवृत्तिमाज्ञाभङ्गं न सहते तथैव वेदादि-शास्त्राण्यपि शब्दपरिवृत्त्यसहानि सर्वथा विधिपराणि च 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' (जै०सू०१।२।१) इति शास्त्रविदामुपक्रमणात् । शब्दस्य शब्दनित्यसम्बद्धस्य वाच्यार्थस्य विधेश्च 'न विधौ परः शब्दार्थः' इति न्यायात् कथमप्यन्यथाऽकरणीयत्वाद् वेदादिशास्त्रस्य शब्दप्रधानत्वम् । **'औत्पत्ति**कस्तु शब्दस्यार्थेन सम्बन्धः' (जै० १।१।५) इति हि शास्त्रविदो वदन्ति । तेभ्यो वेदादिशास्त्रेभ्यो विलक्षणमित्यन्वयः । **सुहृत्सम्मिता** मित्रतुल्या **अर्थतात्पर्यवन्तो** वस्तुस्थितिबोधनेन तात्पर्यार्थप्रकाशनमात्रपराः **पुराणादय इतिहासाश्च** तेभ्यश्च विलक्षणमित्यन्वयः । यथा मित्राणि इदमित्थमिदमित्थम्, एवं कृते एवं भवति, एवं कृते एवं भवति, अमुकेन इत्थं कृतं तस्य इत्थं जातम्, यथा तुभ्यं रोचते तथा वर्तस्वेति अवगमयन्ति तथैव **पुराणादीतिहासाश्च** केवलमर्थानर्थौ बोधयन्ति न नियोजयन्तीति ते मित्रतुल्याः । **शब्दार्थयोर्गुणभावो**ऽप्राधान्यम्, गुणा द्रव्यपारतन्त्र्येणाप्रधानानि तेषां भावोऽप्राधान्यम् तेन । **रसस्याङ्गीभूतो व्यापारो** व्यञ्जना, रसस्य केवलव्यञ्जनाविषयत्वाद् व्यञ्जनाया एव साक्षाद्रसाङ्गत्वम्, व्यापारान्तरस्य तु परम्परया । तत्र **प्रवण**मासक्तं तस्य भावस्तया । व्यञ्जनावृत्तिप्रधानतयेति फलितोऽर्थः । न च कव्यव्यापारप्राधान्यस्वीकाराद् आचार्यमम्मटे भट्टनायकमतदीक्षा प्रसञ्जनीया, व्यापाराणां मध्ये काव्ये व्यञ्जनायाःप्राधान्येऽपि तद्विषयस्य व्यङ्ग्यार्थस्यैव मम्मटमते काव्ये विश्रान्तिधामत्वेन प्राधान्यात् । **विलक्षणम्** विसदृशम् । **काव्यं** कविकर्म,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गुणवचनब्राह्मणादिभ्यः कर्मणि च (५-१-१२४) इति पाणिनिना व्याकृतत्वात्। ननु तत्र पाणिनिसूत्रे कर्मशब्दः क्रियावचन इति वृत्तेर्दर्शनात् काव्यस्य च कविकृतग्रन्थत्वेनेष्टत्वात् कथं कवेः साधनकर्मणि काव्यशब्दवृत्तिः। अत्र हरदत्त आह—"अत्राहुः क्रियाकर्मण्येव प्रत्ययविधानम् औपचारिकस्तु तत्कृते प्रयोग इति। अपर आह—सूत्रे यः कर्मशब्दो यश्च वृत्तौ क्रियाशब्दस्तदुभयमपि कर्मसाधनं कर्म क्रियाकार्यमित्यर्थः तेन कृतिव्याप्ये साधनकर्मण्येव प्रत्यय इति।" इति। **लोकोत्तरा** आह्लादजनकबोधजनिका **वर्णना** वर्णनम् ण्यासश्रन्थो युच् (३-३-७) इति व्याकृतेः। तत्र **निपुणो** निष्णातस्तस्य कवेस्तादृशवर्णनात्मकं **कर्म**। लोकोत्तरवर्णनानिपुणं कविकर्म इत्यपि कश्चित्। कर्मयोजनं न तूच्चारणमपि मौनिपद्यासङ्ग्रहात् इति कश्चित्। कर्मत्वं चात्र शब्दानित्यतावादिमते प्रथमोच्चारणनिष्पाद्यत्वम्, उच्चारणञ्च मानसमपि, शब्दनित्यतावादिमते तु प्रथमोच्चारणप्रकाश्यत्वम् शब्दस्य कर्मत्वम्, अर्थस्य तु कविसमवेतरसालङ्कारान्यतरजन्यचमत्काराभिव्यक्त्युपायभूतसामग्रीसङ्घटनविषयकज्ञानकर्मत्वेन कर्मत्वम्। एवञ्च न लास्याङ्गानां काव्यत्वापत्तिः। **कान्तेव** वनितेव जनितात्यर्थानुरागा योषिदिवेत्यर्थः। **सरसतापादनेन** रसवत्त्वसम्पादनेन **अभिमुखीकृत्य** आवर्ज्येत्यर्थः। यथा कान्ता प्रियं सरसतामापाद्य स्वाभिमुखीकृत्य विनैवाज्ञां स्वाभीप्सिते पथि प्रवर्तयति तथैव काव्यमपि शृङ्गारादिरसेन श्रोतृमनो वशीकृत्य तत् सत्पथे प्रवर्तयति त्वया रामादिवद् वर्तितव्यं न रावणादिवदित्युपदेशस्वरूपकाटवं परिहृत्य निभृतं प्रयुक्तेन ध्वनितेन सर्वैर्मयापि रामादिवद् वर्तितव्यं न रावणादिवदिति सहृदयचित्ते स्वतःस्फुरितेन उपदेशेन। एतच्च काव्यप्रयोजनं राष्ट्रस्य परं वरणीयम्, प्रेयसोऽविरोधेन श्रेयसोऽपि साधकत्वं काव्यस्य यदि न कलुषीकृतं धूर्तैस्तदा नरस्यापि वरणीयमेव। यथायोगं यथायुक्ति। एतेषां प्रयोजनानां मध्ये यस्य यस्य कविना सहृदयेन वा योगो लोके दृश्यते उपपद्यते वा तदनुसारमित्यर्थः।

विश्वनाथस्तु अल्पधियामपि सुखादेव चतुर्वर्गफलप्राप्तिं काव्यप्रयोजनं मन्यते। कुन्तकस्तु 'चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम्। काव्यामृतरसेनान्तश्चमत्कारो वितन्यते' इति ब्रुवाणोऽलौकिकानन्दमेव काव्यस्य परमं प्रयोजनं मन्यते। भामहवामनौ तु (लौकिकेषु) प्रीतिम् (अलौकिकेषु) कीर्तिं काव्यप्रयोजनं मन्येते। अन्येषान्तु मतानि आचार्यमम्मटमतेनैव गतार्थानि।

अत्रेदमप्याकलनीयम्—'स्तेमः स्तोकोऽपि नाङ्गे श्वसितमविकलं चक्षुषां सैव वृत्तिर्मध्ये क्षीराब्धिमग्नाः स्फुटमथ च वयं कोऽयमीदृक्प्रकारः। इत्थं दिग्भित्तिरोधक्षतप्रसरतया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम् ।।

एवमस्य प्रयोजनमुक्त्वाकारमाह-

मांसलस्त्वद्यशोभिः स्तोकावस्थानदुःस्थैस्त्रिजगति धवले विस्मयन्ते मृगाक्ष्यः' इत्यादेरसत्यार्थस्याभिधायित्वात्, 'वयं बाल्ये डिम्भाँस्तरुणिमनि यूनः परिणतावपीच्छामो वृद्धान्परिणयविधेस्तु स्थितिरियम्। त्वयारब्धं जन्म क्षपयितुममार्गेण किमिदं न नो गोत्रे पुत्रि क्वचिदपि सतीलाञ्छनमभूत्' इत्यादेरसतोऽर्थस्योपदेशकत्वात्, 'नित्यं त्वयि प्रचुरचित्रकपत्रभङ्गीताटङ्कताडनविपाण्डुरगण्डलेखाः। स्निह्यन्तु रत्नरशनारणनाभिरामकामार्तिनर्तितनितम्बतटास्तरुण्यः' इत्यादेरसभ्यार्थस्याभिधायित्वात् 'काव्यालापाँश्च वर्जयेत्' इति किरातार्जुनीयटीकारम्भे मल्लिनाथेन धृतात्स्मृतिवचनात्, "शास्त्रेषु भ्रष्टाः कवयो भवन्ति" "काव्येन हन्यते शास्त्रम्" इत्यादिकाव्यनिन्दावचनात्, ऋषिभिरप्रणीतत्वात् प्रयोजनाभावाच्च **काव्ये न यतनीयमिति केचित्**; अर्थवादरूपस्यासत्यार्थाभिधानस्य 'पुष्पिण्यौ चरतो जङ्घे भूष्णुरात्मा फलेग्रहिः। शेरेऽस्य सर्वे पाप्मानः श्रमेण प्रपथे हताः' (ऐतरेयब्राह्मणे-३३-३-१५) इतिप्रभृतिश्रुतौ अन्येषु शास्त्रेषु चोपलब्धेस्तस्य तादृशस्य न्याय्यत्वात्, असतोऽपि निषेध्यत्वेनोपदेशस्योचितत्वात्, असभ्यार्थाभिधायित्वस्य च 'अहं रोमशा (अर्थान्मैथुनयोग्या) अस्मि अतो मां सम्भोगायोपेत्य परामृश' इत्यभिधायिन्याम् 'उपोप मे परामृश मा मे दभ्राणि मन्यथाः। सर्वाहमस्मि रोमशा गान्धारीणामिवाविका' [ऋग्वेदे २।१।११] इति श्रुतावन्यत्र च (ऋ. १०।१०।७; १०।८६।१६,१७ अथर्व. ३।२५।१-६) शास्त्रेषु दृष्टत्वेन प्रक्रमापन्नस्यासभ्यार्थस्यापि निबन्धनीयत्वात्, काव्यालापाँश्च वर्जयेत्' इति स्मृतेः काव्यनिन्दावचनानाञ्चासत्काव्यविषयकत्वात् सत्काव्यस्य तु 'काव्यालापाश्च ये केचिद् गीतकान्यखिलानि च शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः' इति विश्वनाथवृतादग्निपुराणवचनाद् उपादेयत्वात्, वाल्मीकिव्यासपाणिनिप्रभृतिभिश्च महर्षिभिः काव्यस्य प्रणयनात् दृष्टादृष्टप्रयोजनानां विशिष्टानाम् पूर्वप्रतिपादितानां सत्त्वाच्च काव्ये यतनीयमेवेति तु विवेचकाः (सू. १)।

काव्यहेतुमाह- **शक्तिरित्यादिना** । शक्तिःलोकशास्त्रादिविमर्शनान्निपुणता काव्यज्ञशिक्षया अभ्यास इति त्रयं काव्यस्य निर्माणे समुल्लासे च हेतुरित्यर्थः ।।३।।

कारिकां विवृणोति **शक्तिरित्यादिना**। कवित्वम् आह्लादजनकबोधजनिका वर्णना, तस्य **बीजरूपः संस्कारो** बीजात्मकः ज्ञानादेःस्वकीयप्राक्तनोद्भूतावस्थासमानावस्थान्तरापादनक्षमा चित्ते वर्तमाना सूक्ष्मावस्था। संस्कारविशेषश्चात्र काव्योपयोगिपदपदार्थादिरसादिप्रतिभानहेतुः तादृशप्रतिभानस्य चित्ते वर्तमाना सूक्ष्मावस्था। तादृशशक्तेः कारणघटकत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥३॥

मुपपादयति–**यां विनेत्यादिना**। लोकशास्त्रकाव्याद्यवेक्षणात् नैपुण्ये प्राप्ते काव्यज्ञशिक्षयाभ्यासे च कृतेऽपि सर्वस्यानुपहसनीयकाव्यरचनासामर्थ्यं न दृश्यते इति कल्पनीयस्तदतिरिक्तः कश्चनातिशयः कविषु। स चातिशयो जन्मान्तरतोऽनुवर्तमाना देवतामहापुरुषादिप्रसादजन्या ऐहिकी वा शक्तिः यां विना काव्यं नोद्भवति उद्भूतं वोपहसनीयं भवति। स्वरूपसतो लोकस्यावेक्षणान्न नैपुण्यं किन्तु लोकवृत्तस्यावेक्षणात् तद् इति कारिकास्थं लोकपदं व्याचष्टे– **लोकवृत्तस्येति**। लोक्यते इति लोकः, लोकवृत्तमपि तयैव वृत्त्या लोकः। स्थावरः स्थितिशीलः स्वाधीनगतिरहित इत्यर्थः। जङ्गम इत्यत्र भृशार्थकःपौनःपुण्यार्थको वाऽभ्यासस्तत्प्रयोजको यङ्वा कर्त्रर्थकः पचाद्यच् च। पुनः पुनर्गन्ता इत्यर्थः स्वाधीनगतिमान् इति वा। आत्मशब्दोऽत्र स्वरूपवचनः; आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च इति नामलिङ्गानुशासनदर्शनात्। यद्यपि 'प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा। पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते।' इति 'शास्त्रत्वं हितशंसनात्' इति वा शास्त्रलक्षणं तथा च वेदानामेव परमार्थतः शास्त्रत्वं तथापि लक्षणाश्रयणेन परम्परया शास्त्रोपकारकानप्याह– छन्दोव्याकरणेत्यादि। छन्दोग्रन्थाः स्वरावच्छेद–विशेषनियमबोधका ग्रन्थाः पिङ्गलाचार्यादिभिः कृताः, अर्वाचीनैश्च दण्डिकेदारभट्ट–गङ्गादासकालिदासादिभिः कृताः, । **व्याकरणग्रन्थाः** पदतदर्थ–वाक्यतदर्थ–सम्बन्धज्ञानस्य प्रकृतिप्रत्ययादिविश्लेषणद्वारेण उपकारकाः पाणिन्यादिभिः कृताः, ते चाष्टौ इति प्रसिद्धिः, तथाहि– 'ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्। सारस्वतं चापिशलं शाकलं पाणिनीयकम्' इति। वाल्मीकीये रामायणे तु नव व्याकरणानि उल्लिखितानि इति वदन्ति। इदानीन्तु संस्कृतभाषायाः पाणिनीय–कातन्त्र (कौमार) चान्द्र–सारस्वत– जैनेन्द्राऽभिनवशाकटायन–हैम– मुग्धबोध–जौमर (संक्षिप्तसार) सुपद्म–हरिनामामृत–प्रबोधप्रकाश–सरस्वतीकण्ठाभरण–धर्मदीपक–बुद्धिसागर–व्याकरणानि प्राचीनानि उपलभ्यन्ते। **अभिधानकोशग्रन्थाः** नामादिशब्दसङ्ग्राहका अमर–कोशाख्यनामलिङ्गानुशासनादयो ग्रन्थाः, ते च प्राचीना अर्वाचीनाश्च बहवस् त्रिकाण्डशेष-हारावली- विश्वप्रकाश–विश्वलोचन–वैजयन्ती— मेदिनिकर–नानार्थमञ्जर्यभिधानरत्नमालाऽभिधानचिन्तामणि–शब्दकल्पद्रुम–वाचस्पत्या–ऽऽख्यातचन्द्रिकादयः। **कलाग्रन्थाः** दण्डनीति–गान्धर्ववेद–धनुर्वेदायुर्वेद–कामशास्त्रादिसम्बद्धकलाग्रन्थाः, कला च यद् यत् स्याद् वाचिकं सम्यक् कर्म विद्याभिसंज्ञितम्। शक्तो मूकोऽपि यत् कर्तुं कलासंज्ञं तु तन्मतम्' इति शुक्रनीतौ (४।२६५) विद्यातो विविक्ततया परिभाषिता। इयन्तु परिभाषा कामशास्त्रावयविनीषु कलासु न सर्वथा समन्वेतीति बोध्यम्। कामसूत्रावय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वित्यः काव्योपयुक्ताः कलास्तु (१।३।१५) चतुष्षष्टिः। ता यथा- १. गीतम्, २. वाद्यम्, ३. नृत्यम्, ४. आलेख्यम् (चित्रलेखनम्), ५. विशेषकच्छेद्यम् (भूर्जादिपत्रमयानां तिलकानामनेकप्रकारकं छेदनम्), ६. तण्डुलकुसुमवलिविकाराः (अक्षततण्डुलानां कुसुममाल्यादीनां च भक्तिविशेषस्य रचनाः), ७. पुष्पास्तरणम्, ८. दशनवसनाङ्गरागाः, ९. मणिभूमिकाकर्म (मरकतादिमयकुट्टिमभूमिरचना), १०. शयनरचनम्, ११. उदकवाद्यम् (उदके मुरजादिवत् वाद्यम्), १२. उदकाघातः (हस्तयन्त्रमुक्तजलधाराभिस्ताडनेन क्रीडा); १३. अद्भुतदर्शनवेदिता (चित्राश्च योगाः=परातिसन्धानार्थाः पलितीकरणादयः) १४. माल्यग्रथनविकल्पाः; १५. शेखरकापीडयोजनम् (शेखरकस्य शिखास्थाने प्रलम्बन्यायेन परिधापनस्य, आपीडस्य च मण्डलाकारेण ग्रथितस्य,काष्ठिकायोगेन परिधापनस्य च कौशलम्); १६. नेपथ्यप्रयोगाः; १७. कर्णपत्रभङ्गाः (हस्तिदन्तशङ्खादिकृताःकर्णपत्रविकल्पाः) १८. गन्धयुक्तिः (वसनादौ सुगन्धयोगः, उत्सादनानुलेपनधूपनादीनां गन्धद्रव्याणां योगो वा); १९. भूषणयोजनम्; २०. इन्द्रजालम् (सैन्यदेवकुलादिप्रदर्शनेन विस्मापनम्); २१. कौचुमारयोगाः (बलवीर्यौजोवर्धकौषधादिनिर्माणप्रयोगाः); २२. हस्तलाघवम् (सर्वकर्मसु क्षिप्रहस्तता); २३. चित्रशाकयूषभक्ष्यविकारक्रियाः, २४. पानक-रसरागा-ऽऽसवयोजनम्, २५. सूचीवानकर्म (सूचीकर्म त्रिविधम्-कञ्चुकादीनां सीवनम् प्रतिक्रुष्टवस्त्राणामूतनम्, कुथास्तरणादीनां विरचनञ्चेति; वानकर्म वयनम्), २६. सूत्रक्रीडा (सूत्रस्य छिन्नस्येव दग्धस्येवेति प्रदर्शनम् पुनस्तस्यैव अच्छिन्नत्वेन अदग्धत्वेन च प्रदर्शनम्, सूत्रैर्देवकुलाद्याकाररचना चेति); २७. वीणाडमरुकवाद्यानि; २८. प्रहेलिका; २९. प्रतिमाला (अन्त्याक्षरिकेति प्रसिद्धा); ३०. दुर्वाचकयोगाः (शब्दतोऽर्थतश्च दुःखेन वक्तुं शक्या रचनाः यथा काव्यादर्शे-'दंष्ट्राग्रद्ध्या प्राग्घोद्राक्क्ष्यामम्ब्वन्तस्स्थामुज्चिक्षेप। देवध्रुट्क्षिद्ध्यचृत्विक्स्तुत्यो युष्मान् सोऽव्यात् सर्पार्केतुः' इति); ३१. पुस्तकवाचनम्, ३२. नाटकाख्यायिकादर्शनम् (नाटकाख्यायिकाविशेषपरिज्ञानम्); ३३. काव्यसमस्यापूरणम्; ३४. पट्टिकावेत्रवानविकल्पाः (पट्टिकाभिर् वेत्रविदलैश्च खट्वादेर्वानस्य प्रकाराः); ३५. तर्कुकर्माणि (सूत्रकर्तनादीनि) कुन्दकर्माणि (शाणकर्माणि वा); ३६. तक्षणम् ३७. वास्तुविद्या, ३८.रूप्यरत्नपरीक्षा; ३९. धातुवादः (क्षेत्रवादा मृत्प्रस्तररत्नधातुनां पातनशोधनमेलनज्ञानरूपाः); ४०. मणिरागाकरज्ञानम् (स्फटिकमणीनां रञ्जनविज्ञानम्, पद्मरागादिमणिनामुत्पत्तिस्थानज्ञानञ्च); ४१. वृक्षायुर्वेदयोगाः, ४२. मेष-लावक-कुक्कटयुद्धविधिः, ४३. शुकसारिकाप्रलापनम्; ४४. उत्सादन-संवाहन-केशमर्दनकौशलम्, ४५. अक्षरमुष्टिकाकथनम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वा उपहसनीयं स्यात् । लोकस्य स्थावरजङ्गमात्मकस्य लोकवृत्तस्य, शास्त्राणां

(अक्षरच्युतकम्); ४६. म्लेच्छितकविकल्पाः (गूढवस्तुमन्त्रणार्था अस्पष्टार्था आलाप-
प्रकाराः) ४७. देशभाषाज्ञानम्; ४८ पुष्पशकटिका (अर्धरात्रे उपश्रुतिशब्दगृहणस्य
कला पुष्पवप्रप्रकाराणां रचने कौशलम् वा); ४९. निमित्तज्ञानम् (उत्पातादिनिमित्त-
ज्ञानम्); ५०. यन्त्रमातृका (यन्त्रनिर्माणयोजनादिकला); ५१. धारणमातृका
(स्मृतिदृढीकरणोपाययोगाः) ५२. सम्पाठ्यम् (बहूनां सम्भूय सुस्वरेण पठनम्);
५३. मानसी काव्यक्रिया; ५४. अभिधानकोषज्ञानम् ५५. छन्दोवृत्तज्ञानम्;
५६. क्रियाकल्पः (काव्यालङ्कारः) ५७. छलितकयोगाः (स्वरूपमन्यरूपेण प्रकाश्य
वञ्चनं परव्यामोहनार्थम्); ५८. वस्त्रगोपनानि (वस्त्रसंरक्षणानि, प्रतिकृष्टस्य वस्त्रस्य
अप्रतिकृष्टस्येव धारणमिति च):, ५९. द्यूतविशेषाः, ६०. आकर्षक्रीडा (पाशकक्रीडा);
६१. बालक्रीडनकानि (गृहकगेन्दुक-पुत्रिकादीनि):, ६२. वैनयिकविद्याज्ञानम् (मनुष्य-
विनयार्थमाचारशास्त्राणां गजाश्वादिविनयार्थं तच्छास्त्राणाञ्च ज्ञानम्),६३ वैजयिक-
विद्याज्ञानम् (अपराजितादीनां दिव्यविद्यानां विजयफलानां शस्त्रविद्यानाञ्च ज्ञानम),
६४. व्यायामिकविद्याज्ञानम् इति । **चतुर्वर्गग्रन्था** धर्मार्थकाममोक्षग्रन्थाः । तत्र
धर्मगृन्थाः प्राधान्येन वेदाश्चतुर्धा विभक्ता ऋग्यजुस्सामाथर्वनामभिः ख्यातास्तेषां
प्रवचनभेदात् प्रतिवेदं भिन्ना भूयस्यः शाखाः, तत्र एकशतमध्वर्यु शाखाः, सहस्रवर्त्मा
सामवेदः, एकविंशतिधा बाह्वृच्यम्, नवधाऽऽथर्वणो वेद इति महाभाष्ये उक्ताः ।
शिक्षागृन्थाः वर्ण-स्वर-मात्रा-वल-साम-सन्तानादिप्रतिपादका ग्रन्थाः -पार्षद-प्राति-
शाख्यादिनामानो बहवः पाणिन्यापिशलिप्रभृतिभिः कृताः शिक्षाश्च ।
कल्पग्रन्थाः चरणान्तरस्थगुणोपसंहारपूर्वकं वैदिकानुष्ठानक्रमविशेषस्य कल्पका
(ज्ञापकाः) गृन्थाः, तत्र हौत्रप्रयोगप्रतिपादका आश्वलायन- साङ्ख्यायन-
कौषीतकादिप्रणीताः, आध्वर्यवप्रयोगप्रतिपादका बौधायना-ऽऽपस्तम्ब-सत्या-
षाढ (हिरण्यकेशि) -वैखानस-भारद्वाज-मानव-कात्यायनादिप्रणीताः, औद्गात्र-
प्रयोगप्रतिपादका मशक-लाट्यायन-द्राह्यायण-जैमिनिप्रभृतिभिः प्रणीताशाः न्तिक-पौष्टि-
काभिचारिकादिप्रयोगप्रतिपादका वैतान-श्रौतसूत्रादयश्च । गृह्यकल्पाश्च प्रायः पूर्वोक्तै रेव
मुनिभिः प्रणीताः । **व्याकरणन्तु** संस्कृतकाव्यप्रणयने इदानीं पदे पदे आवश्यकमिति पृथ-
गेवोक्तम् । **निरुक्तग्रन्था-** व्याकर्तुमशक्ययोः पदपदार्थयोः सम्बन्धस्य निरूपणाय पद्धतेः
प्रदर्शकास् तादृशकतिचनपदपदार्थसम्बन्धस्य दुर्बोधदेवतावाचकपदपदार्थसम्बन्धस्य च प्रद-
र्शका ग्रन्था यास्कादिप्रणीताः । छन्द,: ज्योतिषग्रन्था आर्चयाजुषादिज्यौतिषग्रन्था लगधादि-
प्रणीताः सूर्यसिद्धान्तादयो गर्गसंहितादयश्च । स्मृतिग्रन्था आपस्तम्बादिप्रणीता धर्मसूत्रप्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्थाः, मनुयाज्ञवल्क्यविष्णुयमाङ्गिरोवसिष्ठदक्षसंवर्तशातातपपराशरगौतमशङ्खलिखितहारीतापस्तम्बोशनोव्यासकात्यायनबृहस्पतिदेवलनारदपैठीनसिप्रभृतिभिः कृताः स्मृतिग्रन्थाश्च । मीमांसा जैमिनिप्रभृतिभिः कृता, सङ्कर्षकाण्डश्च । न्याये आन्वीक्षिकी गौतमप्रणीता । पुराणसंहिताः पराशरद्वैपायनवैशम्पायनसूतकृताः । तत्र द्वैपायनसंहितायां ब्रह्म-पद्म-विष्णु-शिव-भागवत-नारद-मार्कण्डेया-ऽग्नि-भविष्य-ब्रह्मवैवर्त-लिङ्ग-वराह-स्कन्द-वामन-कूर्म-मत्स्य-गरुड-ब्रह्माण्डपुराणानि । सनत्कुमार-नरसिंह-स्कन्द-शिवधर्मा-ऽऽश्चर्य(दुर्वासो)-नारद-कपिल-वामनोशनस-ब्रह्माण्ड-वरुण-कालिका-महेश्वर-साम्ब-सौर-पराशर--मारीच-भास्करोपपुराणानि, सनत्कुमार-बृहन्नारदीया-ऽऽदित्य-मानव-नन्दिकेश्वर-कौर्म-भागवत-वासिष्ठ-भार्गव-मुद्गल-कल्कि-देवी-महाभागवत-बृहद्धर्म-परानन्द-वह्नि-पशुपति-हरिवंशाख्यानि औपपुराणानि । **अर्थग्रन्था** वार्हस्पत्यनीतिशास्त्र-शुक्रनीतिप्रभृतयो नीतिग्रन्था विष्णुगुप्तप्रणीतोऽर्थशास्त्रग्रन्थः कामन्दकीयनीतिसार-पञ्चतन्त्रप्रभृतयश्च । आयुर्वेद-धनुर्वेदौ विमानादिग्रन्थाः स्थापत्यादिग्रन्थाः वार्ताशास्त्र-ग्रन्थाश्च विषयसाजात्येनार्थग्रन्थमध्ये गणनीयाः । **कामग्रन्था**:नन्दि-श्वेतकेतु-बाभ्रव्यादिभिः प्रणीताः, वात्स्यायनमल्लनागकृतः कामसूत्राख्यश्च । कुचुमारतन्त्र-कोकशास्त्र-रतिरहस्य-नागरसर्वस्वादयस्तज्जातीया ग्रन्थाश्च । गान्धर्ववेदोऽपि देवोतोपासनादावप्युपयुज्यमानोऽपि रागवर्धकत्वात्कामग्रन्थमध्ये गणनीयः । मोक्षग्रन्थाः प्राधान्येन ईशावास्य-केन-कठ-प्रश्न मुण्डक-माण्डूक्य-तैत्तिरीयैतरेय-छान्दोग्य-बृहदारण्यकादय उपनिषदो वेदान्त-नाम्ना प्रसिद्धाः, दूरतः समीपतश्च तदुपकारकाणि न्याय-वैशेषिक-साङ्ख्ययोग-धर्म-मीमांसा-ब्रह्ममीमांसाख्यानि षट् शास्त्राणीति प्रसिद्धानि, षट् शास्त्राणि तु वस्तुतः षड्वेदाङ्गान्येव, शैव-वैष्णव-शाक्तादयो वेदाविरोधिन आगमाश्च । गजलक्षणग्रन्थः पालकाप्यादिः, बृहत्संहितांशादयश्च, गजलक्षणानि विष्णुधर्मोत्तरादौ पुराणेऽप्यागतान्येव तथाऽपि प्राधान्यादुक्तम् । तुरगलक्षणग्रन्थः शालिहोत्रग्रन्थः, अन्ये चार्वाचीना जयदत्तादिकृताश्च-शास्त्रादिग्रन्थाः, पराशरसंहिताबृहत्संहितांशादयः प्राचीनग्रन्थांशाश्च । खड्गलक्षणग्रन्थाः विष्णुधर्मोत्तरांशा देवीपुराणांशा बृहत्संहितांशाः धनुर्वेदांशाश्च । आदिपदात् स्त्रीपुरुषलक्षणादिप्रतिपादकसामुद्रादि-चार्वाक-बौद्ध-जैन-धर्म-दर्शन-ग्रन्थादीनां सर्वेषां सङ्ग्रहः । एतेन सर्वाणि शास्त्राणि काव्याङ्गानीत्युक्तं भवति । उक्तं हि-विद्याः समस्ता यत्राङ्गमहो भारो महान् कवेः' इति,

> "न स शब्दो न तद् वाच्यं न स न्यायो न सा कला ।
> जायते यन् न काव्याङ्गमहो भारो महान् कवेः ।"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[भामहकृते काव्यालङ्कारे, ५।४] इति च । लक्षयन्ति ज्ञापयन्तीति लक्षणाः, लक्षणा ग्रन्था लक्षणग्रन्थास्तेषाम् । **महाकवयो** वाल्मीकि- व्यास- कालिदास- भारवि-माघ- श्रीहर्षादयस्तत्सम्बन्धिनस्तत्कृतास्तेषाम् **काव्यानाम्** रामायण-महाभारत-रघुवंश-कुमारसंभव- किरातार्जुनीय- शिशुपालवध- नैषधीयचरितादीनाम् । **इतिहासाः** "धर्मार्थ-काममोक्षाणामुपदेशसमन्वितम् । पूर्ववृत्तकथायुक्तमितिहासं प्रचक्षते " इति परिभाषिता महाभारतादयोऽन्ये च पुरावृत्तप्रतिपादका ग्रन्थास्तेषाम् । अवेक्षणाद् **विमर्शनात्** पुनः पुनः पठनात् विचारणाच्च । **व्युत्पत्तिर्बहुज्ञता**, वर्णनीयवस्तु–विषयोपयोगिसमस्त-वस्तु–पौर्वापर्यपरामर्शकौशलमिति केचित् उचितानुचितविवेक इत्यन्ये, शास्त्रचिन्ताजन्यः संस्कारविशेष इति परे, प्रतिभानविशेष एव व्युत्पत्तिरिति अस्मत्पक्षः । **विचारयितुं** सदसद् वेति परीक्षितुम् । **तदुपदेशेन** तेषां शिक्षया कविसमयशिक्षासहितया । **कविसमयश्च असदपि** पद्मादि नदीषु, हस्त्यादि आकाशगङ्गायाम्, हंसादि जलाशयमात्रे, स्वर्णरत्नादि यत्र तत्राद्रिषु, सूचीभेद्यत्वमुष्टिग्राह्यत्वे तमसि, कुम्भोपवाह्यत्वं ज्योत्स्नायाम्, शौक्ल्यं यशोहासादौ, कार्ष्ण्यमयशःपापादौ, रक्तत्वं क्रोधरागयोः, चन्द्रिकापानं चकोरेषु, निशि भिन्नतटाश्रयणं चक्रवाकयुग्मेषु **वर्णयेदिति; सदपि** पुष्पफलं चन्दनद्रुषु, फलमशोकेषु मालतीं वसन्ते ज्योत्स्नातमसी शुक्लकृष्णपक्षयोः, रक्तत्वं कामिदन्त-कुन्दकुड्मलयोः हरित-त्वं कमलमुकुलादौ, पीतत्वं प्रियङ्गुपुष्पेषु, दिवा नीलोत्पलानां विकासम्, शेफालिका-पुष्पेषु निशानिमित्तकं विस्रंसनं **न वर्णयेदिति;** कृष्णनीलयोः,कृष्णश्यामयोः पीतरक्तयोः शुक्लगौरयोः, चन्द्रे शशमृगयोः, कामध्वजे मकरमत्स्ययोः, अत्रिनेत्रसमुद्रोत्पन्नयोश्चन्द्रयोः, द्वादशानामप्यर्कणाम्, नारायणविष्णुदामोदरकूर्मादेः, कमलासम्पदोः, नागसर्पयोः, क्षीर-क्षारसमुद्रयोः, दैत्यदानवासुराणाञ्च **ऐक्यमिति;** चक्षुरादेः शुक्लश्यामकृष्णमिश्रानेकवर्ण-त्वम्, चिरकालजन्मनोऽपि शिवशेखरचन्द्रस्य बालत्वम्, कामस्य मूर्तत्वामूर्तत्वं **चेत्यादिः** । समस्यापूरणम्, वाक्यावरहितवृत्तरचनम् परोक्तगुराजोविपद्यादिरचना परकीयपद्यपादा-द्युपजीविपद्यरचना चेत्याद्याकारा **अभ्यासाः** प्राथमिकाः । **करणे** विभिन्न- वस्तुरसादि-विषयकसन्दर्भाणां सृष्टौ **योजने** तेषां सन्दर्भाणां परस्परं परमोपकारकतया सन्निवेशे, यथाऽभिज्ञानशाकुन्तले षष्ठेऽङ्के धनवृद्धेरनपत्यस्य वृत्तान्तः स्वयं नातिरमणीयोऽपि दुष्यन्तगतविप्रलम्भशृङ्गारस्य दुष्यन्तचरित्रस्य च परमपोषकतया योजितः । कारि-कास्थमितिपदं मिलितास्यापनायेति प्रदर्शयन् व्याचष्टे–**त्रयः समुदिता न तु व्यस्ताः** इति । **समुदिताः** परस्परसापेक्षा इत्यर्थः । व्यस्ताः पृथक् पृथक् स्थिताः परस्परनिरपेक्षा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्युत्पत्तिः, काव्यं कर्तुं विचारयितुं च ये जानन्ति तदुपदेशेन करणे योजने च पौनःपुन्येन प्रवृत्तिरिति त्रयः समुदिता न तु व्यस्तास्तस्य काव्यस्योद्भवे निर्माणे समुल्लासे च हेतुर्न तु हेतवः ॥

एवमस्य कारणमुक्त्वा स्वरूपमाह—

(सू० ३) तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि ।

इत्यर्थः । **समुल्लासे** सम्यक् प्रसृतौ । **हेतुः** काव्यरूपकार्योपहित इत्यर्थः । शक्तिनिपुणताभ्यासानां मेलकः सर्वदा काव्यस्योत्पादक एव तु न भवतीति विवेक्तव्यम् । **हेतु**रित्यत्र एकवचनं दण्डचक्रचीवरन्यायेन हेतुत्वमिति ध्वनयितुम्, अत एव शक्तिनिपुणताभ्यासा हेतुरिति विशेष्यविशेषणयोर्भिन्नवचनत्वं सङ्गच्छते । दण्डचक्रचीवरादेः समुदितस्य यथा घटत्वाद्येकधर्मावच्छिन्नं प्रति हेतुत्वं तथैव शक्तिनिपुणताभ्यासानां समुदितानां काव्यं प्रतीति ज्ञेयम् । **न तु हेतव** इति तृणारणिमणिन्यायेन शक्त्यादेर्हेतुत्वं निराचष्टे । यथा तार्णवह्निं प्रति तृणस्य आरणेयवह्निं प्रति अरणेः मणिजवह्निं प्रति मणेश्च पृथक् पृथक् हेतुत्वं (न तु वह्नित्वावच्छिन्नं प्रति तृणादेः हेतुत्वं परस्परव्यभिचारात्), तथा शक्त्यादेः काव्यं प्रति पृथक् पृथक् हेतुत्वं न इत्यभिप्रायः ।

रसगङ्गाधरकारस्तु काव्यस्योद्भवे प्रतिभैव हेतुः, नैपुण्यशिक्षाभ्यासदेवतासिद्धप्रसादादीनान्तु कस्यचित् क्वचिदेव प्रतिभाजनद्वारा परम्परया हेतुत्वं न साक्षादिति मन्यते । चन्द्रालोककारस्यापीदमेव मतम् । सूक्ष्मेक्षिकायुक्तञ्चैतन्मतम् । (सू. २) ।

एवमुपर्युक्तप्रकारेण **अस्य** काव्यस्य **कारणमुक्त्वा स्वरूपं** लक्षण**माह-तददोषा**वित्यादिना । **अदोषौ** रसाद्युद्देश्यप्रतीतिप्रतिवन्धकदोषरहितौ **सगुणौ** प्रातिभासिकेन सत्येन वा माधुर्यौजःप्रसादान्यतमगुणेन तादृशाभ्यां गुणाभ्यां वा सहितौ **क्व** क्वचित् स्फुटरससहितस्थले तु **अनलङ्कृती**त्यस्य स्फुटालङ्काररहितौ **अपि** । नञोऽल्पार्थकत्वेन अनलङ्कृतीत्यस्य स्फुटालङ्काररहितौ इत्यर्थं उपपद्यते । नञर्थश्च—'तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ।' इति । **अपि**शब्दात् सर्वत्र सालङ्कारौ इति लभ्यते । **शब्दार्थौ** शब्दश्च अर्थश्च । **शब्दः** प्रतीतपदार्थको ध्वनिः, तथा हि महाभाष्यकारः— अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते इति । **अर्थो**ऽत्र शब्दजन्य-ज्ञानविषयः । शब्दार्थाविति शब्दार्थयोर्जात्यर्थकत्वेनैक वचनान्तत्वम् । तथा च वाच्यलक्ष्यव्यङ्ग्याः सर्वेऽप्यर्थाः सङ्गृहीता भवन्ति । **तत्** काव्यमित्यर्थः । रसाद्युद्देश्यप्रतीतिप्रतिवन्धकदोषरहितौ प्रातिभासिकेन सत्येन वा गुणेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सहितौ सर्वत्र सालङ्कारौ स्फुटरससहितस्थले तु अस्फुटालङ्कारौ अपि शब्दार्थौ काव्यमिति प्रव्यक्तोऽर्थः ।

सदोषयोरतिव्याप्तिवारणाय **अदोषौ** इति । ननु उत्तमकाव्यत्वेन स्वोदाहृते एव 'निश्शेषच्युतचन्दनंस्तनतटम्' इत्यादौ काव्ये वाक्यगतविधेयाविमर्शदोषस्य 'स्तनतटं निश्शेषच्युतचन्दनम्' इत्यादौ वक्तव्ये तथाऽवचनात्, जातस्य सत्त्वादिदं लक्षणमव्यापकम्, उदाहरणविरोधो वा इतिचेत् अत्र वदन्ति– दुष्टांशे अकाव्यत्वमेव, न च काव्यपदस्याविषयत्वप्रसङ्गोऽदुष्टपादमात्रमप्यादाय तस्य. सविषयत्वात्, निश्शेषेत्यादौ उत्तमत्वप्रयोजकस्य उपाधेः वाच्यातिशयिव्यङ्ग्यस्यैव उदाहृतत्वान्न उदाहरणविरोधोऽपि, काव्यश्च विरलविषयमेव, तथाहि ध्वन्यालोककारः-"अस्मिन्नतिविचित्रकविपरम्परावाहिनि संसारे कालिदासप्रभृतयो द्वित्राः पञ्चषा वा महाकवय इति गण्यन्ते [१–६]" इति ब्रुवाणः सूचयतीति । **अन्ये** तु अत्र दोषशब्देन रसाद्युद्देश्यप्रतीतिप्रतिबन्धको दोषो विवक्षितस्तथा च निश्शेषच्युतचन्दनं स्तनतटमित्यादौ दोषसत्त्वेऽपि तथाविधदोषाभावान्न काव्यत्वहानिरिति समादधति ।

निर्गुणयोरतिव्याप्तिवारणाय **सगुणौ** इति । ननु गुणस्य रसधर्मत्वात् "रसादिस्तु व्यङ्ग्योऽर्थो अलङ्कारान्तरञ्च सर्वत्राव्यभिचारीत्यगणयित्वैव तद् अलङ्कारा उदाहृताः तद्रहितत्वेन तु उदाह्रियमाणा विरसतामावहन्तीति पूर्वापरविरुद्धाभिधानं न चोदनीयम् [१०–८७]" इति ग्रन्थकृता सूचिते नीरसे चित्रकाव्ये स्वच्छन्दोच्छलदित्यादौस फुटरस-रहिते काव्ये च रसधर्मगुणाभावाद् अव्याप्तिरिति चेत्, न; तत्र प्रातिभासिकान् रसपर्यन्तविश्रान्तप्रतीतिबन्ध्यैः शब्दाश्रितत्वेन गृहीतान् गुणान् (माधुर्याद्याभासरूपान्) आदाय लक्षणस्य प्रवृत्तेः । अयञ्च ग्रन्थकृतोऽभिप्राय आविष्कृत एवास्माभिः सगुणौ इत्यस्य व्याख्यानेऽपि । भवन्ति हि माधुर्याद्यन्यतमगुणव्यञ्जकवर्णसाजात्ययुक्ता वर्णाः तादृश्यो वृत्तयो वा सर्वत्र काव्येषु । एवञ्च सति विश्वनाथेन यदपि चोदितम्–"तयोः काव्यस्वरूपेणाभिमतयोः शब्दार्थयो रसोऽस्ति न वा । नास्ति चेत् गुणवत्त्वमपि नास्ति गुणानां तदन्वयव्यतिरेकानुविधायित्वात्, अस्ति चेत् कथं नोक्तं रसवन्तौ इति विशेषणम् । गुणवत्त्वान्यथानुपपत्त्यैतल्लभ्यते इति चेत् तर्हि सरसावित्येव वक्तुं युक्तम् न सगुणाविति न हि प्राणिमन्तो देशा इति वक्तव्ये शौर्यादिमन्तो देशा इति केनाप्युच्यते" इति, तदप्यकाण्डताण्डवायितम् आचार्यमम्मटमते नीरसयोरपि प्रातिभासिकगुणयुक्तयोः शब्दार्थयोरन्यलक्षणयुक्तयोः काव्यत्वस्य इष्टत्वात् ।

अनलङ्कृतयोः "अद्रावत्र प्रज्वलत्यग्निरुच्चैः प्राज्यः प्रोद्यन्नुल्लसत्येष धूमः" इत्याद्योः शब्दार्थयोरोजोव्यञ्जकवर्णसाजात्ययुक्तवर्णसत्त्वात् प्रातिभासिकस्य ओजोगुणस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दोषगुणालङ्कारा वक्ष्यन्ते । क्वापीत्यनेन एतदाह यत् सर्वत्र सालङ्कारौ क्वचित्तु स्फुटालङ्कारविरहेऽपि न हानिः, यथा–

उपस्थित्या काव्यत्वं प्रसज्येत तथा चातिव्याप्तिर्लक्षणस्य तद्वारणाय सर्वत्र सालङ्कारौ इति सूचितम् । ननु तत्रानुप्रासस्यापि दर्शनात् तत् काव्यमेवेति चेत् न, चमत्कारे जननीये रससहकारित्वरूपस्य सालङ्कारत्वस्य तत्राभावात् । अस्तु वा चित्रकाव्यं तत् ।

स्फुटालङ्काररहिते यः कौमारहर इत्यादौ अव्याप्तिः स्यादिति स्फुटरससहितस्थले तु स्फुटालङ्काररहितावपीति सूचनाय **अनलङ्कृती पुनः क्वापी**त्युक्तम् ।

अभिनेयेऽर्थे अतिव्याप्तिः स्यादिति **शब्द**ग्रहणम्, रागेऽतिव्याप्तिः स्यादिति **अर्थ**ग्रहणमिति केचित् । **शब्दार्थौ** इत्यत्र शब्दस्यार्थाश्रयत्वात् तस्य प्रागुक्तिः, तथा च महाकविरपि वागर्थाविवेत्याह ।

एवञ्च सति "तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि" इति वाक्यं काव्यलक्षणवाक्यत्वेनैव आचार्यमम्मटस्याभिप्रेतमिति ज्ञेयम्, । प्राचीनैर्व्याख्यातृभिस्तथारूपेणैव गृहीतत्वाच्च ।

तथा च सति तददोषावित्यादिवाक्यं न लक्षणवाक्यं तत्र चमत्कारासाधारणकारणान्येव परिगणितानि । लक्षणन्तु चमत्कारनिपुणकविकर्मत्वम्, तन्नैपुण्योपपादकंचैतत्" इति, 'परमानन्दप्रयोजनकं काव्यं काव्यप्रयोजनकञ्चेदं शास्त्रम् इति प्रयोजनसम्बन्धं दर्शितम् । तत्र काव्यज्ञशिक्षाभूतस्यास्य शास्त्रस्य काव्यजनने सहकारिचक्रं पूर्वकारिकया निरूपितम् । इदानीन्तु शब्दार्थोभयरूपेण काव्येन कथं परमानन्दो जन्यत इत्याकाङ्क्षायां तत्र सहकारिचक्रं निरूप्यते" इति, "काव्यलक्षणन्तु वृत्तिकृता पूर्वमेव (लोकोत्तरवर्णनानिपुणकविकर्म इति) दर्शितम्" इति च मैथिलपण्डितगोकुलनाथोक्तम् आचार्यमम्मटाभिप्रायप्रतिकूलमेव, मुख्यतया प्रतिपाद्यस्य काव्यलक्षणस्य कारिकासु अनुल्लेखस्य अविश्वसनीयत्वाच्च । एतेन आचार्यमम्मटेन तददोषावित्यादिना काव्यस्यादर्शभूतं प्रायिकं वा स्वरूपं प्रतिपिपादयिषितं न तु इतरव्यावृत्तिव्यवहारान्यतरफलकं लक्षणमुक्तमित्यभिप्रायकं पण्डितबलदेवोपाध्यायोक्तं तज्जातीयकमन्यदपि व्याख्यातम्, परोक्तौ स्वाभिप्रायारोपो युक्तो न वे ति विद्वांसएवजानन्तु । वयन्तु स्वाभिप्रायं स्वाभिप्रायत्वेनैव अनुपदं प्रकाशयिष्यामः ।

वाक्यार्थज्ञानस्य पदार्थज्ञानाधीनत्वात्, अभावज्ञानस्य प्रतियोगिज्ञानाधीनत्वाच्चाह- **दोषगुणालङ्काराः वक्ष्यन्ते** इति । दोषाः सप्तमे उल्लासे, गुणा अष्टमे,अलङ्कारा नवमे दशमे च निरूपयिष्यन्ते इत्यर्थः । कारिकास्थस्य क्वापीत्यस्य 'अभिसन्धिमाविष्करोति- **क्वापीत्यनेनेत्यादिना । सर्वत्र सालङ्कारौ** इत्यस्यायमभिप्रायः काव्ये सालङ्कारत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः ।

मुत्सर्गत इति । **क्वचित्तु** स्फुटरसयुक्तस्थलेषु तु कुत्रचित्**स्फुटालङ्कारविरहेऽपि** प्रव्यक्तालङ्काराभावेऽपि **न काव्यत्वहानिः** नाकाव्यत्वम् । एतेन स्फुटरसयुक्तस्थलेऽपि उत्सर्गप्राप्तोऽलङ्कारयोग आवश्यक एव किन्तु यदि कुत्रचित् तादृशस्थले स्फुटोऽलङ्कारो नोपलभ्यते तथापि काव्यत्वहानिरेव तु न भवति इत्येतावन्मात्रम् उक्तं भवति । तत्रापि अलङ्कारविरहेऽपीत्येतावन्मात्रमनुक्त्वा **स्फुटालङ्कारविरहेऽपीत्युक्तवत** आचार्यस्य तादृशस्थलेऽपि, कामं लेशत एव भवतु, अलङ्कारचमत्कार आवश्यक एवेत्यभिप्रायः प्रतिभाति । अलङ्कारमात्रकृतं चमत्कारमपि शब्दार्थयोः काव्यत्वप्रयोजकं मन्वानस्याचार्यस्य इदमपि शोभते एव । एवञ्च आचार्याभिप्रायमबुद्ध्वा वृथैव कटाक्षित आचार्यो जयदेवेन "अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती । असौ न मन्यते कस्मादनुष्णमनलङ्कृती ।" इति ब्रुवाणेन ।

स्फुटालङ्कारविरहितं काव्यमुदाहरति– **यः कौमारहर** इत्यादि । स्वाधीनपतिकायाः सखीं प्रत्युक्तिरियम् । शिलाभट्टारिकायाः पद्यमिदमिति शार्ङ्गधरः । **यः** कौमारं बाल्यं हरतीति **कौमारहरः** प्रथम उपभोक्ता इति भावः । **वरः** प्रियः **हि** यद्यपि, निपातानां नानार्थकत्वात् । स एव चिरादुपभुक्तएवेत्यर्थः । **चैत्रक्षपाः** मधुरात्रयः ता एव पूर्वमनुभूता एव,**उन्मीलिता** विकसिता **मालती** वासन्ती तया **सुरभयः** सुगन्धयः **प्रौढाः** प्रगल्भाः **कदम्बस्य** हलिप्रियवृक्षस्य सम्बन्धिनः **अनिलाः** वाता [**ते च** ते एवेत्यर्थः, चोऽवधारणे निपातानां नानार्थत्वात् । **अस्मि च** अहमपि । अस्मीत्यहमर्थकं विभक्तिप्रतिरूपकमव्ययम् । **सा एव** उत्कण्ठाहेतुभूतमवस्थान्तरं न प्राप्ता एव । **तथापि** तत्तदुपभोगसामग्रीणाम् उपभुक्तपूर्वत्वेऽपि **तत्र** तस्मिन् उपभुक्तपूर्वे **रेवारोधसि** नर्मदातीरे **वेतसीतरुतले** वानीरस्तम्बमध्यस्थे तले इत्यर्थः । यद्यपि वेतसी न तरुस्तथापि काव्ये सहनीय एष प्रयोगः । **सुरतस्य व्यापार** आलिङ्गनादिका क्रिया तस्य **लीला**-रूपो **विधिः** इतिकर्तव्यता तस्मिन् विचित्रक्रीडामये रते इत्यर्थः । तत्रेत्यस्य रेवारोधसि, वेतसीतरुतले, सुरतव्यापारलीलाविधौ इति त्रिभिरेवान्वय इति त्रयाणामपि उपभुक्तपूर्वत्वं लभ्यते । चेतो हृदयंसमुत्कण्ठते भृशम् उत्सुकं भवतीत्यर्थः । अतिधृत्यां छन्दसि शार्दूलविक्रीडितं वृत्तं नतु शार्दूलविक्रीडितं छन्दः । सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितमिति शार्दूलविक्रीडितलक्षणम् [१] ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ।।१।।

अत्र स्फुटो न कश्चिदलङ्कारः, रसस्य हि प्राधान्यान्नालङ्कारता ।

उदाहरणं सङ्गमयति–अत्रेत्यादिना । **स्फुटो** झटिति प्रतीयमानः । हरः वरस् इत्यनुप्रासस्य प्रकृतशृङ्गाररसप्रतीत्यननुकूलोष्मानुगतरेफघटिततया अलङ्कारत्वाभावात् । ननु अत्र वरोपकरणयोरुपभुक्तपूर्वकत्वेन उत्कण्ठाकारणस्य अभावेऽपि उत्कण्ठारूपस्य कार्यस्य उत्पत्तेः कथनात् विभावनालङ्कारः, "क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना" [का०प्र०सू० १६२] इति लक्षणात्; [अथवा वरोपकरणयोरुपभुक्तपूर्वत्वस्य उत्कण्ठाऽभावकारणस्य सत्त्वेऽपि कार्यस्य उत्कण्ठाऽभावस्य अभावस्य अर्थात् उत्कण्ठाया वर्णनाद् विशेषोक्तिरलङ्कारः, "विशेषोक्तिरखण्डेषु कारणेषु फलावचः" (का०प्र०सू० १६३) इति लक्षणात्; अत्रानयोः कतरोऽलङ्कारः स्वीकार्य इत्यत्र साधकबाधकमानाभावात् सन्देहसङ्करः; तत् कथमत्र स्फुटालङ्काराभावः इतिचेत् उच्यते– हेत्वभावे नञादिपदेन प्रतिपादिते सत्येव विभावनायाः, फलाभावे नञादिपदेन प्रतिपादिते सत्येव विशेषोक्तेः स्फुटत्वस्य स्वीकारात्, अत्र च हेत्वभाव–फलाभावयोः नञादिपदेनाप्रतिपादितत्वात् तयोरस्फुटत्वम्, तयोरस्फुटत्वे च तन्मूलकसन्देहसङ्करस्यापि अस्फुटत्वमेव । नाऽन्योऽपि कश्चन स्फुटोऽलङ्कारोऽत्र ।

ननु विप्रलम्भशृङ्गारोऽत्र स्पष्टः, स एव स्फुटो रसवदाख्योऽलङ्कारोऽत्र, उक्तं हि अलङ्कारशास्त्रप्रवर्तकमूर्धन्येन सुचिरन्तनेन आचार्यभामहेन – रसवद् दर्शितस्पष्टशृङ्गारादिरसम्' [काव्यालङ्कारे, ३–६] इति चेत्तत्राह– **रसस्य** चेत्यादि । रसस्यापि व्यज्यमानस्य वाच्यार्थोपरकारकत्वं स्वीकुर्वाणैः प्राचीनैरालङ्कारिकैः रसस्यालङ्कारत्वमेव सर्वत्र काव्येषु इति प्रतिपादितम् । किन्तु तन्निराकृतम् आचार्यानन्दवर्धनेन–'प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः । काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः' [ध्वन्यालोके, २-५] इति वदता । तथा चात्र रसस्य प्राधान्यान्नालङ्कारत्वम्, आलङ्कारिकसरणिव्यवस्थापकस्याचार्यस्य मतेनापि । अस्माभिस्तु रसस्यालङ्कारत्वं कदापि न स्वीक्रियत एव, तस्मादपि रसस्यात्र नालङ्कारतेति भावः ।

अथ संक्षेपेण काव्यलक्षणपरीक्षा । सुचिरन्तनेन आलङ्कारिकगुरुणा **भामहेन "शब्दार्थौ सहितौ काव्यम्"** [१–१६] इति काव्यलक्षणं कृतम् । तत्र सहितौ इति पदं व्यर्थं मा भूत् इति तस्य **'परस्परशोभाकरत्वेन मिलितौ'** इति अर्थः कल्पनीय इति नातिदुष्टमिदं लक्षणम्, तथापि सहितत्वस्य तेन विशेषेण अव्याकृतत्वात् अस्फुटत्वं लक्षणस्य । तेन च अलङ्कारा निरूपिता इति, "श्रव्यं नातिसमस्तार्थं काव्यं मधुर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिष्यते । आविद्वदङ्गनाबालप्रतीतार्थं प्रसादवत् ।" इति च प्रतिपादितमिति चं सालङ्कारतया सगुणतया च **शब्दार्थौं सहितौ** काव्यमिति काव्यलक्षणं तस्याभिप्रेतमिति कल्प्यते । तत्र सर्वालङ्कारयोगप्रयुक्ते सहितत्वे काव्यत्वमुत यत्किञ्चिदलङ्कारयोगप्रयुक्तेऽपि । आद्ये असम्भविवं लक्षणस्य, अन्त्ये नीरसयमकानुप्रासादियोगप्रयुक्ते सहितत्वेऽपि काव्यत्वं स्यत्; ननु तत्र मधुर्याभावात् सहितत्वानुदयादेव वा न काव्य–लक्षणप्रवृत्तिरितिचेत् तर्हि माधुर्यस्य सहितत्वस्य च तेनानिरूपितत्वादस्फुटमेव तदुक्तं काव्यलक्षणम् । सर्गबन्धप्रसङ्गे सर्गबन्धे रसानां सन्निवेश आवश्यक इति प्रदर्शयता तेन काव्यात्मभूतो रसादिः काव्यात्मत्वेन अस्फुटं दृष्टोऽपि काव्यलक्षणे तथात्वेन न गृहीत इति काव्यतत्त्वप्रतीतिवन्ध्यमेव तदुक्तं काव्यलक्षणम् । आचार्यदण्डिना च **"शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली"** [१–१०]इति काव्यशरीरं काव्यादर्शे प्रतिविम्बितम् कृतम् ।काव्यादर्शे "काश्चि मार्गविभागार्थमुक्ताः प्रागप्यलङ्क्रियाः । साधारणमलङ्कारजातमन्यत् प्रकाश्यते ।" [२–३] इति गुणनाम्नाऽपि व्यवहृता सामान्याश्च अलङ्कारा निरूपिता इति अलङ्कारयुक्ता मनोहरार्थप्रतिपादिका पदावली काव्यमिति तन्मते काव्यलक्षणं परिनिस्तिष्ठति । किन्तु दण्डिनाऽपि इष्टार्थो न व्याख्यात इति तदुक्तं लक्षणमपि सम्यगनुन्मीलितमेव । **वामनोक्ते**षु 'काव्यं ग्राह्यमलङ्कारात्' [१–१–१ ,]'सौन्दर्यमलङ्कारः' [१–१–२], 'स दोषगुणालङ्कारहानोपादानाभ्याम्' [१–१–२] 'रीतिरात्मा काव्यस्य' [१–२––६] 'विशिष्टपदरचना रीतिः [१–२–७] 'विशेषो गुणात्मा' [१–२–८], 'ओजःप्रसादश्लेषसमतासमाधिमाधुर्यसौकुमार्योदारतार्थव्यक्तिकान्तयो बन्धगुणाः' [३–१–४], 'ते एवार्थगुणाः' [३–२– १], 'समग्रगुणा वैदर्भी' [१–२–११], 'ओजःकान्तिमती गौडीया' [२–१–१२] "माधुर्यसौकुमार्योपपन्ना पाञ्चाली' [१–२–१३] इति सूत्रेषु "काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते' [१–१–१] इति वृत्तिवाक्येन साकं शीलितेषु ज्ञायते यत् दोषगुणालङ्कारहानोपादानाभ्यां सुन्दरौ शब्दार्थौ काव्यम् इति काव्यलक्षणं **वामना**भिमतमिति । किन्तु यदि सर्वैर्गुणैरुपात्तैः सौन्दर्यमिति स्वीक्रियते तदा कथमसमस्तगुणा गौडीया पाञ्चाली च रीतिः काव्यास्यात्मा, यदि च कतिपयैर्गुणैरुपात्तैरपि सौन्दर्यं तदा "अद्रावत्र प्रज्वलत्यग्निरुच्चैः प्राज्यः प्रोद्यन्नुल्लसत्येष धूमः" इत्यादौ वामनोक्तेषु ओजःप्रसादार्थव्यक्तिषु गुणेषु सत्सु तदुक्तेऽनुप्रासालङ्कारे च सति काव्यव्यवहारः स्यात्, न चेष्टापत्तिः नीरसस्यास्य लोकोत्तरास्वादाजनकत्वेन काव्यात्वाभावात् । तस्मात् स्वोक्तिव्यघाताभिव्यप्त्यन्यतरदोषग्रस्तं वामनोक्तं काव्यलक्षणम् । आलङ्कारिकसरणिव्यवस्थापकस्य **आनन्दवर्धनस्य** तु **सहृदयश्लाध्यव्यङ्ग्यात्मकौ शब्दार्थौ काव्य**मिति काव्यलक्षणमभिप्रेतम् तत्र भवता सहृदयश्लाघ्यानामर्थानां विवृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्त्वात् तत् लक्षणं स्फुटं नातिनिन्दनीयञ्च । किन्तु "प्रतीयमानस्य चान्यभेददर्शनेऽपि रसभावमुखेनैवोपलक्षणं प्राधान्यात्" [१-५] इति, "नीरसस्तु प्रबन्धो यः सोऽपशब्दो महान् कवेः । स तेनाकविरेव स्यादन्येनास्मृतलक्षणः ।" [३-१९- परिकरश्लोकः] इति, "वाच्यानां वाचकानाञ्च यदौचित्येन योजनम् । रसादिविषयेणैतत्कर्म मुख्यं महाकवेः ।" [३-३२] इति, "व्यङ्ग्यव्यञ्जकभावेऽस्मिन् विविधे सम्भवत्यपि । रसादिमय एकस्मिन् कविः स्यादवधानवान् ।" [४-५] इति च प्रतिपादयता गृहीतोऽपि काव्यस्यात्मा रसादिरूपमेव व्यङ्ग्यं काव्यात्मत्वेन असम्प्रधारयता न निर्गृहीत इति सावद्यमेव तल्लक्षणं मन्तव्यम् । **राजशेखरेण** तु "अहो श्लाघनीयोऽसि शब्दार्थौ ते शरीरम् ... ... समः प्रसन्नो मधुर उदार ओजस्वी चासि. . . . . . अनुप्रासोपमादयश्च त्वमलङ्कुर्वन्ति" [काव्यमीमांसायास्तृतीयेऽध्याये] इति सरस्वत्या वर्णितं काव्यपुरुषं प्रातिभेन ज्ञानेन दृष्ट्वाऽपि षष्ठेऽध्याये "गुणवदलङ्कृतञ्च वाक्यमेव काव्यम्" इति वदता नूनं प्रतिभाववतोऽपि स्वस्य विस्मरणशीलत्वमाविष्कृतम्, प्रमुष्टप्रायया स्मृत्याऽस्पष्टरूपेणोपनीतं काव्यस्वरूपञ्चास्माकं पुरतः स्थापितम् । **कुन्तकस्तु** "शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि । बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि ।" [काव्यालङ्कारे, १-१] इति वदन् काव्यस्य कवेर्वक्रो व्यापार एव आत्मा इति मन्यते । कविव्यापारवक्रता च तेन विस्तरेण निरूपिता । तथा च स्फुटं तदीयं काव्यलक्षणम् । किन्तु व्यापारः सदैव व्यापारविषयशेषभूतो भवतीति कुन्तकोक्तमपि काव्यस्य उपलक्षणमेव न तु लक्षणमिति ज्ञेयम् । काव्यानुशासने हेमचन्द्रेणोक्तम् – "अदोषौ सगुणौ सालङ्कारौ च शब्दार्थौ काव्यम्" इति, प्रतापरुद्रीये **विद्यानाथेनो**क्तम् – " गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ । गद्यपद्योभयमयं काव्यं काव्यविदो विदुः ।" इति, साहित्यरत्नाकरे धर्मसूरिणोक्तम्– "सगुणालङ्कृती काव्यं पदार्थौ दोषवर्जितौ ।" इति, तज्जातीयमन्यच्च काव्यलक्षणं मम्मटोक्त- काव्यलक्षणपरीक्षयैव परोक्षितं भवतीति मम्मटोक्तं काव्यलक्षणमधुना परीक्ष्यते । तदीयं काव्यलक्षणञ्च– "तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनःक्वापि ।" इति । एतच्च मम्मटाभिप्रायानुसारं व्याख्यातमेव । तत्र 'न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः' इत्यादौ दोषस्य सत्वात् तस्याकाव्यत्वापत्तिः न चेष्टापत्तिः सहृदयैस्तस्योत्तमकाव्यत्वस्य स्वीकृतत्वात्; ननु अदुष्टांशमादाय काव्यत्वनिर्वाह इति चेत् न,तत्र दुष्टांशनिरपेक्षस्यादुष्टांशस्य अर्थप्रतीतेरेवाभावात् सुतरां काव्यत्वाभावप्रसङ्गः, तत्र अदुष्ठांशस्य दुष्टांशसापेक्षत्वेन वाच्यैकत्वाच्च तयोरेकीभावे जाते एव वाक्यार्थबोधोदयः ततो व्यङ्ग्यार्थबोध इति तयोरंशयोर्वस्तुतोऽखण्डत्वं स्वीकर्तव्यमेवेति कथमखण्डस्यैकस्य समकालं काव्यत्वाकाव्यत्वे । ननु दोषशब्देन उद्देश्यप्रतीतिप्रतिबन्धको दोषो विवक्षित इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यक्कारो ह्ययमेवेत्यादौ दोषसत्त्वेऽपि तादृशदोषाभावात् नाकाव्यत्वापत्तिरिति चेत् तर्हि लक्षग उद्देश्यस्यैवोल्लेख उचितो न तु तत्प्रतीतिप्रतिबन्धकाभावस्य, तादृशदोषसत्वे च उद्देश्यप्रतीत्यभावेनैवाकाव्यत्वं सुवचम् न दोषसत्वेनाकाव्यत्वोपपादनमावश्यकम् । तस्मादधिकमेव अदोषौ इति पदम् । सरसौ इत्यनुक्त्वा सगुणौ इति वक्तुमप्यनुचितमेव । न च नीरसस्यापि प्रातिभासिकगुणयुक्तस्य सङ्ग्रहाय सरसौ इत्यनुक्त्वा सगुणौ इति वक्तुं युक्तम्, नीरसस्य काव्यत्वाभावेन असङ्ग्रहणीयत्वात् । यानिनी रसानि चित्राणि सप्रपञ्चमुदाहर्तुमपि स्वयं नोत्सहते मम्मटः तानि काव्यत्वेन स्वीकुरुते चेति चित्रमेवैतत् । अस्मिन् विषयेऽधिकमग्रे वक्ष्यते । सर्वत्र सालङ्कारौ इति सूचनमप्ययुक्तमेव, अलङ्कारस्य काव्ये अनियतवृत्तित्वेन तद्रहितस्थले लक्षणस्याप्रवृत्तेः प्रसङ्गात् । अलङ्कारस्य काव्येऽनियतवृत्तित्वञ्चोक्तमेव ध्वनिकृता–"तस्मात् स्थितमेतत्–अङ्गिभूतरसाद्याश्रयेण काव्ये क्रियमाणे नवार्थलाभो भवति बन्धच्छाया च महती सम्पद्यते इति । अत एव च रसानुगुणार्थविशेषोपनिबन्धनम् अलङ्कारान्तरविरहेऽपि छायातिशययोगि लक्ष्ये दृश्यते, यथा–मुनिर्जयति योगीन्द्रो महात्मा कुम्भसम्भवः । येनैकचुलुके दृष्टौ दिव्यौ तौ मत्स्य–कच्छपौ इत्यदौ" [४–५] इति । "उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् । हारादिवदलङ्कारास्तेनुप्रासोपमादयः ।" इति काव्येऽलङ्कारस्थितेरनित्यतां ध्वनयता पूर्वापरसन्दर्भशुद्धिचञ्चनापि मम्मटेन कथञ्च हन्त काव्यलक्षणे अलङ्कारस्य काव्ये नित्यत्वम् प्रतिपादितम् । ननु काव्यलक्षणप्रतिपादनावसरेऽपि 'अनलङ्कृती पुनः क्वापि' इति काव्येऽलङ्कारस्थितेरनित्यत्वं स्वीकृतमेवेति चेत् न तस्य वाक्यांशस्य "सर्वत्र सालङ्कारौ क्वचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः" इति ग्रन्थकृदुपज्ञव्याख्यानात्, अवरतोऽस्फुटस्य अलङ्कारस्य काव्ये आवश्यकत्वस्य स्वीकृतत्वात्, अस्पष्टं प्रतीयमानोऽप्यलङ्कारः काव्ये काञ्चन च्छायां पुष्णातीति तदभिप्रायस्य 'स्फुटालङ्कारविरहेऽपि' इति शब्देनावेदितत्वात्, यदि तादृशोऽभिप्रायो नाभविष्यत्तर्हि 'अलङ्कारविरहेऽपि' इत्येव प्रायोक्ष्यत् न तु स्फुटालङ्कारविरहेऽपीति । तस्मात् 'अनलङ्कृती पुनः क्वापि' इत्यप्यधिकमेव । "चमत्कारिबोधजनकज्ञानविषयतावच्छेदकधर्मवत्त्वं प्रकाशोक्तं काव्यलक्षणम्" इति, "सामान्यलक्षणन्तु अदोषादिपदाघटितमेव तेषां मतेऽपि" इदि च स्वीकुर्वाणेन महताऽऽडम्बरेण प्रकाशोक्तं समर्थयितुं प्रवृत्तेन नागोजिभट्टेन प्रकाशोक्तं समर्थितं न वेति विदएव विदाङ्कुर्वन्तु । एतेन मम्मटोक्तकाव्यलक्षणसमर्थनाय महामहोपाध्यायगङ्गाधरशास्त्रिमहाशयेन "तददोषौ शब्दार्थौ इत्यादिषु प्रदर्शितानां दोषाभावगुणालङ्काराणां काव्यसामान्यलक्षणोद्देश्यतावच्छेदककोटिप्रवेशो नास्त्येव" इति स्वीकुर्वाणेनोक्तम्–कविकर्तृकरसविषयौपयिक–सामग्रीसङ्घटनविषयकज्ञानवत्त्वं शब्दार्थयोरनुगतं काव्यत्वम्" इति; मम्मटोक्तकाव्यलक्षणदूषणान्येव परिहर्तुकामेन किन्तु तल्लक्षणमपि परिहरता "चमत्कारनिपुणकविकर्मत्वम्" काव्यलक्षणं मम्मटोक्तं मन्यमानेन केनचिदुक्तम्–"चमत्कारो नाम आनन्दभोगः, स च प्रथमो वाक्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रवणसमकालप्रतिसंहितेन शब्दालङ्कारेण गुणाभिव्यञ्जकैश्च वर्णैः शब्दार्थविगमनानन्त-रमुल्लास्यते यमाश्रित्य स्वच्छन्दोच्छलदित्यादौ काव्यत्वम्; द्वितीयःशब्दार्थविगमकालप्रति-संहितेन अर्थालङ्कारेण वस्तुध्वनिमपेक्ष्य व्यभिचारिभावोल्लाससमकालमुत्थाप्यते, न हि वस्तुध्वनिनिरपेक्षोऽप्युपमादिरानन्दभोजकः गौरिव गवय इत्यादेरपि तथात्वप्रसङ्गात्, यमाश्रित्य विनिर्गतं मानदमित्यदौ काव्यत्वम्; अपरस्तु व्यञ्जितव्यभिचारिभावोपरक्त-शब्दार्थस्वरूपवाक्यार्थबोधेन साधारणीकृतविभादिपदार्थोपस्थितिकाले जन्यते यमाश्रित्य भावध्वनिषु काव्यव्यवहारः; अन्यस्तु साधारणीकृतविभावानुभावव्यभिचारिपरिबृंहितस्था-यिभावस्वरूपकाव्योल्लासेन यावत्स्वसत्त्वमुद्भाव्यते (उपलभ्यते वा) यमाश्रित्य रसध्वनिषु काव्यव्यवहारः, एवमास्वाद्यमाने भावे तिस्रोऽवस्थाः, आह्लादकत्वं दीप्तिर्व्यापकता चेति त्रयं द्रुतेन दीप्तेन व्याप्तेन च चेतसा रसास्वादे गृह्यत इति त एव माधुर्यौजःप्रसादाख्या गुणाः। एवञ्चालङ्कारचमत्कार–भावचमत्कार–रसचमत्काराणामन्यतमोऽवश्यं काव्येऽ-पेक्षते। भावरसयोश्चमत्कारौ गुणमविषयीकृत्य न सम्भवत इति गुणाभिव्यञ्जका घटना तयोरपेक्षत एव, विपरीतघटनायामलङ्कारोऽपि न स्वदते इति तत्रापि गुणाभिव्यञ्जक-मपेक्षत एव, अलङ्कारास्तु रसभावाद्यन्यतमं विनापि चर्वयितुं शक्यन्त इति भावरसास्वा-दोऽप्यलङ्कारं विनाऽनुभवितुं शक्यत इत्यलङ्कारसत्ता न नियता। दोषाणामभावस्तदनुस-न्धानाभावो वा चमत्कारप्रतिबन्धकाभावत्वेन सर्वत्रापेक्ष्यत इति चमत्कारासाधारणकार-णानि एतेन (तददोषौ इत्यादिना) परिगणितानि।" इति; कैश्चित् प्राचीनैः रसवच्छ-ब्दार्थयुगलं काव्यमिति स्वीकुर्वाणैर्मम्मटोक्तकाव्यलक्षणदोषान् परिजिहीर्षुभिरुक्तम्– "वाच्यत्वासहो रसादिर्न स्वशब्देनोपस्थापयितुं शक्यते किन्तु दोषाभावगुणालङ्कारैरुपल-क्षितोऽत्र लक्षणे प्रविष्टः, उपलक्षणनानात्वञ्च न दोषाय।" इत्यपि व्याख्यातम्। तददोषौ इत्यादेश्चमत्कारासाधारणकारणपरिगणनपरत्वेऽपि तत्राविष्कृता दोषाश्चमत्कार-निपुणकविकर्मरूपं पराभिमतं काव्यलक्षणमपि ग्रसन्ति एवेति सर्वथा नास्ति निस्तारो दोषग्रासात् मम्मटोक्तकाव्यलक्षणस्य। स्वशब्देनोपस्थापयितुमशक्यं रसादिं मम्मटोक्तं काव्यलक्षणं मन्यमानैस्तु स्फुटोऽपि मम्मटाभिप्रायः सम्यङ् नाकलित इति किमधिकं ब्रूमः पराभिप्रायसम्प्रधारणापटून् वटून् प्रति। नापि शब्दार्थौ काव्यमिति वक्तुं युक्तम्, "अपौरुषेयं वाक्यं वेदः" "शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणाजन्यप्रमित्य-विषयार्थकत्वे सति शब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वं वेदत्वम्" इत्यादे-र्ग्रन्थरूपवेदादिलक्षणस्येव ग्रन्थरूपकाव्यलक्षणस्यापि शब्दनिष्ठत्वस्यैवोचितत्वात्। न च "किमर्थमुभावप्यथ निर्दिश्येते न योऽधीते वेत्यप्यसौ ? यस्तु वेत्ति अधीतेऽप्यसौ। नैतयोरावश्यकः समावेशः, भवति हि कश्चित सम्पाठं पठति न च वेत्ति, कश्चिच्च वेत्ति न च सम्पाठं पठति।" इति "तदधीते तद् वेद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[४-२-५९] इति सूत्रस्थेन वेदेत्यादेः शब्दार्थोभयवृत्तित्वप्रतिपादकेन पातञ्जलमहाभाष्येण विरोध इति वाच्यम्, महाभाष्येण वेदत्वादेः शब्दार्थोभयवृत्तित्वस्य अप्रतिपादितत्वात्। पतञ्जलिमतेऽपि शब्दवृत्तित्वमेव वेदत्वादेः। ननु कथं तर्हि छन्दोऽर्थं वेत्ति इति छान्दसः? यत्नविशेषात्तु गौणशब्दस्यापि ग्रहणात् प्रत्ययः, तथा हि– छन्दोग्रन्थसहचरितो ग्रन्थार्थस्तात्स्थ्यात्तत्साहचर्याद् वा गौण्या वृत्त्या छन्दः, तस्मात् तद्वेदितरि प्रत्ययः। कः खलु यत्नविशेषः? अयम्–यथा "तेन दीव्यति खनति जयति जितम्" [४-४-२] इत्यत्र सकृत् समर्थविभक्त्युपादानेऽपि अर्थसमुच्चयो न विज्ञायते, ततश्च प्रत्यर्थं प्रत्ययो भवति तथेहापि 'तद् अधीते वेद' इत्येवोच्यमानेऽपि अर्थसमुच्चयो न विज्ञास्यते तथा च प्रत्येकमधीयाने विदुषि च प्रत्ययो भविष्यत्येवेति किमर्थं द्विद्वितीयासमर्थग्रहणम्? अयमेव यत्नविशेषो ज्ञापयति यद् गौणस्यापि ग्रहणं भवतीति ततश्च गौणादपि छन्दोवसन्तादिशब्दात् वेदितरि अध्येतरि वा प्रत्ययः सुलभः। इममेव तु फलितार्थमभिसन्धाय भाष्ये तथा उक्तम् न तु वेदत्वादेः शब्दार्थोभयवृत्तित्वमभिप्रेत्य। तदधीते तद् वेद इति योगस्य प्रामादिकत्वपक्षेऽपि भाष्यकारव्याख्यानबलादेव गौणाच्छन्दआदिशब्दाद् वेदितरि प्रत्ययः। "ऋगित्युक्ते संपाठमात्रं गम्यते नास्या अर्थो गम्यते" [१-१-६९] इति महाभाष्यात् ऋगादिशब्दार्थोऽपि शब्द एवेति गम्यते। शब्दप्रमाणका वयं यच्छब्द आह तदस्माकं प्रमाणमिति [पस्पशाह्निके] वदतो महाभाष्यकारस्य मते शब्दप्रमाणस्य वेदस्य शब्दनिष्ठत्वमेव परं श्लिष्यते। अतो वेदत्वादेः शब्दवृत्तित्वमेव, तथा च काव्यत्वादेरपि समानन्यायेन शब्दवृत्तित्वमेवोचितमिति। यच्च केनचिदुक्तम् "विनिगमनाविरहादर्थविशेषावरुद्धः शब्द इव शब्दविशेषावरुद्धोऽर्थोऽपि लोकोत्तरचमत्कारव्यञ्जकतया काव्यमित्युभयोः प्राधान्येन (शब्दार्थौ इति) निर्देशः, काव्यं शृणोति इति व्यवहारस्तु अर्थांशेऽपि शब्दबोधार्थकशृणोतिनोपपादयितुं शक्यते आत्मा श्रोतव्य इतिवद् इति; तदसत्, परेण काव्यत्वेन विवक्षितस्य अर्थस्यापि मूलत्वेन शब्दस्य प्रधानतायाः, 'काव्यमुच्चैः पठ्यते' 'काव्यादर्थोऽवगम्यते' 'काव्यं श्रुतम्, अर्थो न ज्ञातः' इत्यादिसार्वलौकिकव्यवहारतः शब्दविशेषस्यैव काव्यपदार्थत्वप्रतीतेः, शिष्टसम्मतवेदादिलक्षणानुरोधस्य च विनिगमनाहेतोः सत्वात्; मुख्यार्थपरित्यागे निमित्ताभावात्, काव्यं बुद्धमिति क्वचित्कव्यवहारस्य मुख्यार्थबाधात् लक्षणयोपपादनीयत्वात्, शब्दाप्रतिबद्धाया लोकोत्तरचमत्कारव्यञ्जकताया एव काव्यत्वप्रयोजकत्वे लास्याङ्गादेरपि काव्यत्वापाताच्च। न च शब्दस्य काव्यत्वे तद्गतानामेव दोषगुणालङ्कारध्वनीनां निरूपणस्यौचित्येन भूयसामर्थगतानां तेषां निरूपणस्याप्रसक्त्या तन्निरूपणस्योन्मत्तप्रलापत्वापत्तिः, अर्थो रसादिव्यञ्जने शब्दस्याङ्गमिति शब्दाङ्गगतानां दोषगुणालङ्कारध्वनीनामपि निरूपणस्य सुसङ्गतत्वात्। काव्याङ्गनिरूपणं प्रतिज्ञायापि काव्याङ्गसम्ब-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्धिनामन्येषामपि विषयाणां यथौचित्यं निरूपणमावश्यकमेव न तु असङ्गतम् । तस्मान्मम्मटोक्तं काव्यलक्षणमपि दोषग्रहग्रस्तमेव । दोषभिया तददोषावित्यादि लक्षण परित्यज्य लोकोत्तरवर्णनानिपुणकविकर्म इति ग्रन्थकारानभिप्रेतमपि लक्षणं यद्याश्रियेत तदापि जगन्नाथोक्तकाव्यलक्षणे वक्तव्या दोषास्तत्रापि सावकाशा एव । सरस्वतीकण्ठाभरणे **भोजेनोक्तम्**– " निर्दोषं गुणवत् काव्यमलङ्कारैरलङ्कृतम् । रसात्मकं कविः कुर्वन् कीर्तिं प्रीतिञ्च विन्दति ।" इति काव्यलक्षणमपि नेतरव्यावृत्तकाव्यधर्मनिर्देशपरत्वेन ग्राह्यम्, किन्तु काव्यविशेषधर्माणां वर्णनत्वेनैव । एतेन **वाग्भटोक्तम्**–' साधुशब्दार्थसन्दर्भं गुणालङ्कारभूषितम् । स्फुटरीतिरसोपेतं काव्यं कुर्वीत कीर्तये । " इति, **जयदेवोक्तम्**–',निर्दोषा लक्षणवती सरीतिर्गुणभूषणा । सालङ्काररसाऽनेकवृत्तिर्वाक् काव्यनामभाक् । " इति, अलङ्कारचन्द्रिकायां **न्यायवागीशेनोक्तम्**– "गुणालङ्कारसंयुक्तौ शब्दार्थौ रसभावगौ । नित्यदोषविनिर्मुक्तौ काव्यमित्यभिधीयते । " इति, एकावल्यां **विद्याधरेणोक्तम्**– शाणोत्कीर्णमिवोज्ज्वलद्युतिपदं बन्धोऽर्धनारीश्वरश्लाघालङ्घनजाङ्घिको दिविलतोद्भिन्नेव चार्थोद्गतिः । किञ्चित्पीडितचन्द्रमण्डलगलत्पीयूषहृद्यो रसस्तत् किञ्चित् कविकर्ममर्म न पुनर्वाग्डिण्डिमाडम्बरः ।। " इति च व्याख्यातम् । काव्यार्णवमन्दरमानिना पण्डितराज–**जगन्नाथेन** च " रमणीयार्थप्रतिपादकः शब्दः काव्यम् " इति काव्यलक्षणं कृत्वा अर्थस्य रमणीयतायाः प्रयोजकाश्च प्रधानव्यङ्ग्यचमत्कारः, जागरूकगुणीभूतव्यङ्ग्यचमत्कारः, अजागरूकगुणीभूतव्यङ्ग्ययुक्तवाच्यचमत्कारः, अर्थचमत्कारोपस्कृतशब्दचमत्कारश्चेति चत्वारः परिगणिताः ।तत्र रसादिरूपासंलक्ष्यक्रमव्यङ्ग्यानामेव लोकोत्तरचमत्कारकारित्वमिति तेषामेव रमणीयताप्रयोजकत्वमास्थेयम् नान्येषाम् । तस्मात् लक्षणे रसादिपदं 'रस्यते इति रसः' इत्यभिप्रायेण रसपदेन रस-भाव-तदाभास– भावोदय-भावसन्धि– भावशबलताः संगृह्य रसपदमेव वा निवेश्यम्, एवञ्च रसप्रतिपादकः शब्दः काव्यम् इत्येव काव्यलक्षणं द्रष्टव्यम् । शब्दश्च प्रतीतपदार्थको ध्वनिः । एवञ्चरागे नातिव्याप्तिः । लक्ष्यक्रमव्यङ्ग्यानान्तु रसादिनिरपेक्षाणां किञ्चित् चमत्कारकारित्वेऽपि नैव काव्यत्वप्रयोजकत्वं युक्तमत्वस्थातुम् । न चैवं महाकविसम्प्रदायभङ्गप्रसङ्गः, महाकविभिः सर्वस्यापि वाच्यवाचकजातस्य रसादिपरत्वेनैव योजितत्वात्, एतस्याश्च वस्तुस्थितेः "वाच्यानां वाचकानाञ्च यदौचित्येन योजनम् । रसादिविषयेणैतत् कर्म मुख्यं महाकवेः ।" [३–३२].इति वदता सहृदयशिरोमणिना आनन्दवर्धनेनापि दृष्टत्वात् । यस्त्वलङ्कारव्यङ्ग्यजलप्रवाहवेगकपिवालादिचरितवर्णनभयानाञ्च महाकविवाक्यानां रसमयप्रबन्धमध्यपतितत्वेन रसोपकारकत्वाच्च रसवत्त्वलाभात् काव्यत्वाक्षतेः, तदितरेषाञ्च नीरसानां मुक्तकानां पद्यबन्धमात्ररूपाणां काव्यत्वाभावात् । विशृङ्खलगिरां कवीनां मुक्तकरूपाः प्राचीनान्धपर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परामात्रमनुसन्धानानाम् अन्यैर्गुणैः पूजां प्राप्तवताम् महाकवीनाञ्च प्रबन्धान्तर्गडुभूता रसादितात्पर्यमनपेक्ष्यैवोपनिबद्धाः वस्त्वलङ्कारमात्रव्यङ्ग्याः चित्रार्थाः चित्रशब्दाश्च वाचो न काव्यम्, किन्तु काव्याभासः। काव्याभासेऽपि काव्यत्वव्यवहारः पामरसाधारणो न हि सहृदयसत्तमस्य विवेचकविचक्षणस्य वा शोभते। विश्वनाथेन तु पूर्वापरसन्दर्भशुद्धिमन्देन निर्गृहीतमपि काव्यलक्षणं मलिनीकृत्योपस्थापितम्, तच्च प्रव्यक्तीकरिष्यामो यथावसरम् ।। (सू. ३) ।।

काव्यसामान्यलक्षणमुक्त्वा तद्विशेषलक्षणानि क्रमेण वक्तुमारभते इत्याह–**तद्भेदानित्यादिना**। **तत्**पदं काव्यपरामर्शकम्। **भेद**पदं भेदनं भेद इति व्युत्पत्त्या विभागार्थकम्, भिद्यते अनेनेति व्युत्पत्त्या विशेषलक्षणार्थकं वा। एवञ्च काव्यविभागान् आह इति काव्यविशेषलक्षणानि आह इति वाऽर्थः फलितः। काव्यविभागश्च उत्तमत्वादिना तत्समनियतध्वनित्वादिना च। **क्रमेणे**ति इदमुत्तममित्यादिना, अतादृशीत्यादिना शब्दचित्रं वाच्यचित्र मित्यादिना चेत्यर्थः।

तत्र उत्तमकाव्यलक्षणमाह–**इदमित्यादिना**। अतिशायिनि इति गोकुलनाथादिमैथिलसम्मतः पाठो हेयश्छन्दोभङ्गदोषप्रसङ्गात्। **वाच्यात्** अभिधेयार्थात्, वाच्यादित्यस्योपलक्षणत्वात् लक्षणा-तात्पर्याभ्यां बोध्याच्चार्थात् **व्यङ्ग्ये** व्यञ्जनावृत्तिगम्येऽर्थे। व्यञ्जनावृत्तिश्च निरूपयिष्यते मूलग्रन्थकृता। **अतिशयिनि** अतिशयवति सति **इदं** सामान्यलक्षणलक्षितं काव्यम् **उत्तमं** काव्यं भवतीत्यर्थः। **अतिशयश्च** अधिकाह्लादजनकत्व–वाक्यार्थविश्रान्तिधामत्वद्वितयेनेति ज्ञेयम्। व्यङ्ग्यान्तरगुणीभावेऽपि वाच्यातिशयित्वमात्रमादायोत्तमत्वव्यवहार इति सूचनाय **वाच्यादिति** इति नागोजिभट्टस्य मतम्। तन्न, तथा सति अयं स रशनोत्कर्षीत्यादौ श्रृङ्गारमादायापि उत्तमत्वव्यवहारः स्यात्। स्फुटप्रतीयमानस्यैव ध्वनिव्यपदेशनियामकत्वमिति निश्शेषेत्यादौ वाक्यार्थे विश्रान्ते उपक्षीणप्रायानुरणनशब्दन्यायेन अस्फुटमुपलभ्यमानं पार्यन्तिकं विप्रलम्भशृङ्गारमादाय तदन्तिकं रन्तुं गताऽसि इति व्यङ्ग्यस्य च न गुणीभूतत्वसम्भावनाऽपि। एतेन वाच्यार्थरसयोरान्तरालिकव्यङ्ग्योत्कर्षानुत्कर्षाभ्यां ध्वनिगुणीभूतव्यङ्ग्यत्वव्यवस्थेति च तदुक्तमपास्तम्, रसादिव्यङ्ग्यमादाय मूलग्रन्थकृता प्रदर्शितस्य ध्वनिकाव्यविभागस्य चान्यथयितुमनुचितत्वाच्च। **इदमेव** चोत्तमं काव्यं बुधैर्ध्वनिः कथित इत्यर्थः। ध्वनिशब्दस्तु काव्यशास्त्रे ध्वनतीति ध्वनिरिति कृत्वा वाचके शब्दे वाच्ये चार्थे, ध्वन्यते इति ध्वनिरिति कृत्वा व्यङ्ग्येऽर्थे, ध्वननं ध्वनिरिति कृत्वा व्यञ्जनरूपशब्दव्यापारे, उक्तप्रकारकध्वनिचतुष्टयमयत्वात् काव्यविशेषे च प्रयुज्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति ध्वन्यालोकलोचनटीकायाम् उक्तम् । इदं बुधैर्ध्वनिःकथित इत्यत्र विधेयप्राधान्यस्य विवक्षितत्वात् कथित इत्यस्य पुंस्त्वम् । उद्देश्यप्राधान्यस्यौत्सर्गिकत्वेऽपि उद्देश्यविधेययोः प्राधान्याप्राधान्ये विवक्षाधीने अपि भवतः "पुनरावृत्तः सुवर्णपिण्डः पुनरपरयाऽऽकृत्या युक्तः खदिराङ्गारसवर्णे कुण्डले भवतः" इति प्रथमाह्निके महाभाष्याकारप्रयोगस्य दर्शनात् ।।४।।

कारिकां विवृणोति– इदमित्यादिना । बुधैः प्रथमैर् विद्वद्भिर्वैयाकरणैर्व्याकरणविद्भिः स्फोटादिवैयाकरणसिद्धान्त – सन्देहास्पदसंस्कृतसाधुपदसङ्ग्रहकारव्याडिप्रभृतिभिः । प्रथमे हि विद्वांसो वैयाकरणाः, अन्वयव्यतिरेकादिन्यायप्रयोगमूलाया विवेचनात्मिकाया विद्वत्ताया वेदवाक्यव्याकरणपरवैयाकरणोपज्ञत्वात्, अन्यासाञ्च लौकिकीनां विद्यानाम् अन्वयव्यतिरेकादिन्यायमूलकत्वात् । प्रधानभूतोऽर्थप्रतीतिरूपफलोत्पादकत्वान्मुख्यो यः स्फोटो ध्वन्युपहितप्रतिभारूपः सूक्ष्मो बुद्धिनिर्ग्राह्यः शब्दस्तद्रूपं यद् व्यङ्ग्यं तद्व्यञ्जकस्य शब्दस्य श्रोत्रग्राह्यस्य स्थूलशब्दस्य ध्वनिरितिव्यवहारःकृतः "अथवा प्रतीतपदार्थको ध्वनिः शब्द इत्युच्यते । शब्दं कुरु, मा शब्दं कार्षीः, शब्दकार्ययं माणवक इति ध्वनिं कुर्वन्नेवमुच्यते, तस्माद् ध्वनिः शब्दः" इत्यादौ महाभाष्ये इति भावः । स्फोटाख्यसूक्ष्मशब्दव्यञ्जकः स्थूलः शब्दो वैयाकरणैर्ध्वनिरित्युक्त इत्यर्थः । स्फोटस्वीकरणे च वैयाकरणानां संक्षेपेणेयं युक्तिः– 'पुस्तकमस्ति' इत्यादिशब्दाज्जायमानोऽर्थबोधः कथं भवति ? न तावत् पकारादित एकस्माद् वर्णात्, तथा सति द्वितीयादिवर्णोच्चारणवैयर्थ्यस्य प्रसङ्गात्, नापि पकारादिवर्णसमुदायाद् वर्णानामुच्चरित – प्रध्वंसित्वेन यौगपद्यस्यासम्भवाद् वर्णसमुदायस्य ग्रहीतुमसशक्यत्वात् । तस्मात् प्रथमेन वर्णेन अस्फुटं किन्तु समग्रमेव व्यञ्जितो द्वितीयेन ततः स्फुटतरं तृतीयेन ततोऽपि स्फुटतरमित्येवं क्रमेण अन्त्येन वर्णेन प्रव्यक्तं व्यञ्जितः स्फोटःस्फोटविषयायाम् चरमबुद्धौ अध्यारोपितस् तद्बुद्धिविषयतां नीतोऽर्थम् बोधयतीति अखण्डचैतन्यरूपोऽपि वाक्यप्रभृतिव्यङ्ग्यत्वेन वाक्यप्रभृत्युपहितः स्फोटः (स्फुटत्यर्थोऽस्मादिति व्युत्पत्तिमाश्रित्य तथोक्तः) सूक्ष्मः शब्दः स्वीकार्यः, तद्व्यञ्जकश्च स्वरवर्णानुपूर्वीविशिष्टः स्थूलो ध्वनिरूपः शब्दः इति । ततो वैयाकरणकृतध्वनिव्यवहारानन्तरं तन्मतानुसारिभिः वैयाकरणमतानुगामिभिरन्यैरपिआनन्दवर्धनप्रभृतिभिः काव्यशास्त्रिभिर्बुधैरपि न्यग्भावितमधरीकृतमप्रधानीकृतं वाच्यमभिधेयोऽर्थो येन तत् तादृशं यद् व्यङ्ग्यं व्यञ्जनावृत्तिगम्योऽर्थस्तस्य व्यञ्जने प्रकाशने क्षमं समर्थं तस्य न्यग्भावितवाच्यव्यङ्ग्यव्यञ्जनक्षमस्य शब्दार्थयुगलस्य शब्दार्थद्वितयस्य उपर्युक्तस्फोटव्यञ्जकध्वनिसादृश्यमादाय ध्वनिरिति व्यवहारः कृत इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वगभावितवाच्यव्यङ्ग्यव्यञ्जनसमर्थस्य शब्दार्थयुगलस्य । यथा—

निश्शेषच्युतचन्दनं स्तनतटं निर्मृष्टरागो ऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ॥२॥

अत्र धमशब्देन तदन्तिकमेव रन्तुं गतासीति प्राधान्येम व्यज्यते ॥

यद्यपिउत्तममध्यमाधमकाव्यानि यथास्थानं विस्तरेणोदाहरिष्यति तथापि सुखग्रहण-विज्ञेयं समासव्यासभाषणम् इति संक्षेपेण।त्रापि उत्तमकाव्यमुदाहरति– **निश्शेषेत्यादि** । नायकानयनाय प्रेषितां तं संभुज्यागतां मया बहुधा प्रसादितोऽपि नागतः स इति उक्तवतीं सखीदूतीं प्रति विदग्धोत्तमनायिकाया उक्तिरियम् । अमरुकक्कृत पद्यमिदम् । तव स्तनतटं निश्शेषं यथा स्यात् तथा च्युतं स्खलितं चन्दनं श्रीखण्डादिवर्णकं यस्मात् तत् तथाभूत-मस्ति । एतच्च स्नानकाले वापीगतबहलयुवजनत्रपापारवश्यात् स्तनोर्ध्वमूलमुपपीड्य अंसदेशं प्राप्ताभ्यां स्वस्तिकीकृतभुजलताभ्यां मुहुर्मुहुः परामर्शाज्जातमिति सम्भाव्यते । तव अधरो निर्मृष्टो निश्शेषेण प्रोच्छितो रागोऽधररञ्जनं यस्य तथाभूतो ऽस्ति । एतच्च अधरस्य उन्नतत्वेन सत्यामपि त्वरायां बहलतरजलसम्बन्धाद् दशनशोधनाङ्गु-ल्यादीनां सम्मर्दाच्च जातम् भवेत् । तव नेत्रे दूरं प्रान्तभागे अनञ्जने प्रोच्छिताञ्जने स्तः । एतच्च स्नानकाले त्वरया नेत्रपुटयोः सम्यगप्रक्षालनेन प्रान्तभागस्यैव मुखप्रक्षालने सजलहस्तसम्पर्केण इत्थं जातमिति प्रतिभाति । तव इयं दृश्यमाना तनुरङ्गलतिका **तन्वी** क्षामा **पुलकिता** पुलका रोमाञ्चाः सञ्जता यस्याः सा तथाभूता ऽस्ति । स्नान-श्रमात् शैत्यप्रयुक्तसङ्कोचाच्च क्षामता शीतात् पुलकितत्वमिति सम्भाव्यते । तस्मात् अयि **मिथ्यावादिनि** मया बहुधा प्रसादितो ऽपि नागतः स इत्यादिनानाविधमिथ्यार्थकवचन-प्रयोगशीले । बान्धवजनस्य, बध्नाति स्नेहेनेतिबन्धुः, बन्धुरेव बान्धवः 'प्रज्ञादिभ्यश्च' [५–४–३८] इति पाणिनिव्याकरणात्, तस्य सखीजनस्येत्यत्रार्थः । अज्ञातः पीडाया विरहव्यथाया आगमः प्राप्तिर्यया तथाविधे स्वार्थैकपरायणे स्वस्नानकालातिक्रमासहे हे दूति सखीभावं परित्यज्य दूतीभावमात्रं श्रितवति, त्वम् इतो मदन्तिकात् स्नातुं स्नानार्थं वापीं दीर्घिकां गतासि, तस्य अधमस्य विस्मृतप्रेमतया वियोगदुःखदातुरन्तिकं समीपं **न पुनः** नैव गतासीति वाच्योऽर्थः । [२]

तत्राधमपदप्रमुख्यानां निश्शेषच्युतचन्दनमित्यादिपदानां वक्तृबोद्धव्यादिवैशिष्ट्य-बलादागतं व्यङ्ग्यमाह–**अत्रेत्यादिना** । प्राधान्येन इत्यस्य इतिपदेन अधमपदेनेतिपदेन च काकाक्षिगोलकन्यायेनान्वयस्वीकारे तदन्तिकमेव रन्तुं गतासीति व्यङ्ग्यस्य वाच्याधिक-चमत्कारित्वयुक्तवाक्यार्थविश्रान्तिधामत्वेन प्रधानतया व्यक्तिरिति, व्यञ्जकेषु प्रधानतया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(सूत्रम् ५) अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम् ।
अतादृशि वाच्यादनतिशयिनि । यथा–

ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरी सनाथकरम् ।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया ।। ३ ।।

अधमपदस्य व्यञ्जकत्वमिति चार्थः फलति । अधमपदप्राधान्यञ्च अधमपदस्य वाचकत्वे यत् तत्पदप्रवृत्तिनिमित्तं दुःखदातृत्वम् अपराधान्तर–साधारण–दुःखदातृत्वाकारेण स्थितम् तदेव तस्य व्यञ्जकत्वे सम्भोगनिमित्तकदुःखदातृत्वाकारेण पर्यवस्यतीति तस्य मुख्यव्यङ्ग्य-व्यञ्जकत्वात्, तस्यातिपरुषत्वात् सासूयत्वाच्च वाच्यार्थं झटित्यतिक्रम्य व्यङ्ग्यार्थबोध-प्रवर्तकत्वात् इतरपदानपेक्षयाऽपि व्यङ्ग्यबोधनक्षमत्वाच्च । निश्शेषच्युतचन्दनमित्या-दिपदानामर्थानां चन्दनच्यवनादीनान्तु स्नानकार्यतया निबद्धानां सम्भोगाङ्गभूताश्लेषा-धरपान–चुम्बनादिकार्यत्वस्यापि सम्भवेन तथात्वेन प्रतिसन्धाने सति तद्व्यञ्जनद्वारा तत्साहित्येनैव सम्भोगप्रत्यायकत्वमिति निश्शेषेत्यादिपदानां सम्भोगव्यञ्जने अप्रा-धान्यम् । न चात्र विपरीतलक्षणयैव तदन्तिकं रन्तुं गतासीत्यर्थस्योपलब्धिः, निश्शेषच्युत-चन्दन स्तनतटमित्यादि–वाक्यार्थानां साधारण्यात् मुख्यार्थे बाधाभावात् तात्पर्यार्थस्य झटिति अस्फुरणाच्च लक्षणावसराभावात् । नच नीचकर्मकारित्वस्य अधमपदवाच्यस्य साधनायैव अत्यावश्यकं व्यङ्ग्यमिति तस्य गुणीभूतत्वमाशङ्क्यम्, दूतीप्रेषणसापेक्षत्वेन विस्मृतानुरागतया वियोगदुःखदायित्वेनैव नायकस्याधमत्वस्य वाच्यार्थतया विवक्षितस्य सुसिद्धत्वात् ।

एवञ्च स्तनतटे एव मर्दनाधिक्यात् स्तनसन्ध्यादौ नायककरपरामर्शयोगाच्च ते स्तनतटमेव निश्शेषच्युतचन्दनम्, अधरस्यैव चुम्बनीयत्वेन बहुशश्चुम्बितत्वात् ते अधर एव प्रोञ्छितरागः, नयनप्रान्तभागयोरेव चुम्बनीयत्वेन बहुधा चुम्बितत्वात् ते नयन-प्रान्तभागौ एव लुलितकज्जलाञ्चनयुक्तौ, शृङ्गारक्रीडाश्रमात् तन्वी तत्कृतात्प्रहर्षात् त्वयाऽधुनापि गूढमनुभूयमानात् पुलकिता च तव तनुः, स च मत्प्रियः प्रमदालताभ्रमरः तस्मात् त्वं तदन्तिकमेव रन्तुं गतासीति व्यङ्ग्योऽर्थः । अयञ्चार्थो वाच्यार्थातिश-यीति सहृदयहृदयसाक्षिकम् । (सू. ४) ।

मध्यमकाव्यलक्षणमाह– अतादृशि इत्यादि । **व्यङ्ग्ये** झटिति प्रतीतिपथमा-गत्य चमत्कारकारके (न तु विलम्बेन स्फुटतरचमत्कारान्तरव्यवहितत्वेन च प्रती-तिविषयतामवतीर्य यत्किञ्चिच्चमत्कारकारके) व्यङ्ग्यार्थे **अतादृशि** सति तु इदं काव्य-सामान्यलक्षणाक्रान्तं शब्दार्थयुगलं **मध्यमं**काव्यं भवतीत्यर्थः । इदञ्च **गुणीभूतव्यङ्ग्य-**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र वञ्जुललतागृहे दत्त सङ्केता नागतेति व्यङ्ग्यं गुणीभूतं तदपेक्षया वाच्यस्यैव चमत्कारित्वात् ॥

मिति **बुधैः कथित**मिति लिङ्गविपरिणामेनानुषज्यते; गुणीभूतं व्यङ्ग्यं यस्मिन् तत् गुणीभूतव्यङ्ग्यं काव्यमित्यर्थः । अतादृशि इति पदं व्याकरोति– **अतादृशि वाच्यादनतिशयिनि** इति । वाच्याद् अनतिशयश्च व्यङ्ग्यस्य वाच्यचमत्कारापेक्षया अधिकस्य चमत्कारस्य अकरणात् वाक्यार्थविश्रान्त्यधामत्वाद् वा । एवञ्च वाच्यचमत्काराधिकचमत्कारानाधायकत्व – वाक्यार्थविश्रान्त्यधामत्वान्यतरवत्प्रव्यक्ततरचमत्कारान्तराव्यवहितचमत्कारकव्यङ्ग्ययुक्तत्वं गुणीभूतव्यङ्ग्यत्वमिति मध्यमकाव्यलक्षणं फलितम् । चित्रे व्यङ्ग्यसत्त्वेऽपि तस्य तादृशचमत्कारानाधायकत्वान्न तत्रातिव्याप्तिः । एवञ्च गुणीभूतव्यङ्ग्यस्य चित्रस्य च विविक्तो विषयः । "यत्तु अतादृशि गुणीभूतव्यङ्ग्यम् इत्यादि काव्यप्रकाशगतलक्षणे चित्रान्यत्वं टीकाकारैर्दत्तं तन्न, पर्यायोक्तसमासोक्त्यादिप्रधानकाव्येषु अव्याप्त्यापत्तेः । तेषां गुणीभूतव्यङ्ग्यतायाश्चित्रतायाश्च सर्वालङ्कारिकसम्मतत्वात् ।" इति रसगङ्गाधरकारेण यदुक्तं तदसत् । पर्यायोक्तसमासोक्त्यादेश्चित्रत्वमेव । यत्र हि व्यङ्ग्यं गुणीभूतमपि सत् साक्षादेव चमत्कारकारकं तद् गुणीभूतव्यङ्ग्यस्य विषयः, यत्र तु व्यङ्ग्यं वाच्यार्थोपस्कारद्वारा चमत्कारकरणे वाच्यस्य सहायकमेव तत् पर्यायोक्तसमासोक्त्यादिस्थलं चित्रस्यैव विषयः, चमत्कारवैविध्यतारतम्यनिबन्धनो हि विषयविभागः, तस्माद् गुणीभूतव्यङ्ग्यस्य विषयश्चित्रविषयाद् विविक्त एवेति कुशाग्रधीभिर्विज्ञेयम् । एतच्च गुणीभूतव्यङ्ग्यनिरूपणावसरे अलङ्कारव्याख्यानावसरे च प्रव्यक्ततरं प्रदर्शयिष्यामः ।

गुणीभूतव्यङ्ग्यं सुखग्रहणाय संक्षेपेणोदाहरति–**ग्रामतरु**णमित्यादि । स्वयमेव सङ्केतं कृत्वा गृहकार्यपरायणतया तं विस्मृत्य सङ्केतस्थानमगतायाः स्वकीयसङ्केतस्थानगमनज्ञापनाय तत्रत्याशोकमञ्जरीमादाय उपागतमुपनायकं दृष्ट्वा विषण्णायाः कस्याश्चिन्नायिकाया वर्णनमिदम् । रुद्रटालङ्कारे उदाहृता गाथा इयम् । नूतनाशोकमञ्जरीयुक्तहस्तं ग्रामीणयुवकं चञ्चलनयनव्यापारेण वारंवारं विलोकयन्त्याः मुखकान्तिरत्यन्तं मलिना (दिवसधूसरचन्द्रकान्तिसदृशी) भवतीत्यर्थः । [३] ।

गुणीभूतव्यङ्ग्यं दर्शयति **अत्रे**-त्यादिना। गुणीभूतत्वमुपपादयति**तदपेक्ष**येत्यादिना। **वाच्यस्य** मुखच्छायामालिन्यातिशयस्यैव **चमत्कारित्वाद्** आह्लादजनकत्वात् । मुखच्छायामालिन्यातिशयरूपवाच्येनैकान्तत आकृष्टं सहृदयहृदयं विप्रलम्भाभासास्वादं नानुधावतीति ध्वनिव्यसनितया अत्रापि विप्रलम्भाभारमादाय ध्वनित्वमामूलोक्तव्यङ्ग्यापेक्षया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(सूत्रम् ६) शब्दचित्रं वाच्यचित्र मव्यङ्ग्यं त्ववरं स्मृतम् ॥ ५ ॥

चित्रमिति गुणालङ्कारयुक्तम् । अव्यङ्ग्यमिति स्फुटप्रतीयमानार्थरहितम् । अवरम् अधमम् । यथा–

स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा–
मूर्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाऽह्नाय वः ।

स्थातुं न युक्तम्, प्रधानेन व्यपदेशा भवन्तीति न्यायाच्च । न चेदं वाच्यं विप्रलम्भाभासे एव विश्रान्तम्, केवलायां नायिकायाः सङ्केतभङ्गाकर्तव्यताबुद्धौ वाच्यस्य विश्रान्तेः सम्भवात् । (सू. ५) ।

अधमकाव्यलक्षणं विभागप्रतिपादनमुखेनाह– **शब्दचित्र**मित्यादिना । **अव्यङ्ग्यं** तु इदं काव्यसामान्यलक्षणयुक्तं शब्दार्थयुगलम् **अवरं** काव्यं **स्मृतम्** उक्तमित्यर्थः । अत्र स्मृतमिति प्रयोगो न मनोहरः, अस्य ग्रन्थस्य स्मृतित्वाभावात् । मतमिति सुवचम् । तच्च **शब्दचित्रं वाच्यचित्रम्** इति द्विधा भवतीत्यर्थः । चित्रत्वस्योभयत्रानुगतत्वाद् इदम् अधमं काव्यं बुधै**श्चित्रं** कथितमित्यर्थः प्रतीयते ॥ ५ ॥

अधमकाव्यलक्षणफलितार्थं भावमुखेन स्पष्टीकुर्वन् चित्रपदार्थमाह –**चित्रमिति गुणालङ्कारयुक्तम्** इति । अत्र गुणपदं प्रातिभासिकगुणपरम्, एवञ्च माधुर्याद्यन्यतम–गुणव्यञ्जकवर्णैरलङ्कारैश्च युक्तमिति फलितोऽर्थः । अस्मदध्यापकश्रीयुतजयमन्तमिश्रम–हाशयस्य तु 'यथा विचित्रैरलङ्कारैरलङ्कृताया वलीपलितखालित्यपरीताया जरत्या-श्चित्ताकर्षकत्वं यद्यप्यलङ्कारवैचित्र्यनिबन्धनं तथापि आत्मा तद्गुणाश्च तां न व्यभिचरन्ति तथैव अधमेऽपि काव्ये चमत्कारेऽलङ्कारनिबन्धनेऽपि काव्यात्मा रसः तद्गुणाश्च तद् न व्यभिचरन्तीति गुणपदं मुख्यगुण- परत्वेनैव व्याख्यातुं युक्तम्, एवञ्च काव्यलक्षणेऽपि गुणपदं रसोपलक्षकत्वेन ग्राह्यम्' इति मतम् । अस्माकन्तु न तत्र मनो रमते । मम्मटस्य यदि तादृशोऽभिप्रायोऽभविष्यत् तर्हि रसपदमेव काव्यलक्षणेऽग्रहिष्यत् सः इति । काव्येरसादिसत्त्वं हि रसादिप्रत्यायकत्वमेव, एवञ्च यत्काव्यकृतोद्रिक्ततमचमत्कारक्षणे रसादिप्रतीतिर्नास्ति तत्र रसादेरगणना एव न्याय्या, शब्दार्थयुगलस्य काव्यत्वे तादृशचमत्काराधायकशब्दार्थयुगलत्वस्यैव बीजत्वात्, पार्यन्तिकी परिदुर्बला च रसादिप्रतीतिरगणेया एवेति च ॥ काव्ये यथाकथञ्चित् सर्वत्र रसादिव्यङ्ग्यस्य सत्त्वेन, अवरतः पार्यन्तिकस्य परिदुर्बलस्यापि रसादिव्यङ्ग्यस्य अभावे तु शब्दार्थयुगलस्य प्रहेलिकात्वापातात् वार्तात्वापाताद् वा असंभवि इदम् अवरका-व्यलक्षणमित्याशङ्कानिराकरणायाह–**अव्यङ्ग्यमिति स्फुटप्रतीयमानार्थरहितम्** इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिद्यादुद्यदुदारदर्दुरदरीदीर्घा दरिद्रद्रुम-
द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम् ।। ४ ।।

ननु इदं पञ्चमोल्लासे प्रतिपाद्येन अस्फुटव्यङ्ग्यरूपेण गुणीभूतव्यङ्ग्येनैव गतार्थमिति चेत् न तत्र गुणीभूतव्यङ्ग्ये व्यङ्ग्यस्य उद्रिक्ततरचमत्कारान्तरेण अनाच्छादितत्वात् क्लिष्टस्यापि तस्य चमत्कारकारकत्वमेव, अत्र तु व्यङ्ग्यम् उद्रिक्ततरशब्दार्थचमत्कारान्यतरेणाभिभूतत्वाच्चमत्कारमपि न जनयतीति अत्र व्यङ्ग्यस्य अस्फुटतरत्वं ज्ञेयम् । अव्यङ्ग्यमिति अस्फुटव्यङ्ग्यमिति अस्फुटतरव्यङ्ग्यमिति वाऽनुक्त्वा स्फुटप्रतीयमानार्थरहितमित्युक्तिः सर्वथाव्यङ्ग्यप्रतीतिरहितस्य शब्दार्थचमत्कार- मात्रसारस्य शब्दार्थयुगलस्यापि काव्यत्वेन सङ्ग्रहाय, तत्रापि स्फुटप्रतीयमानार्थराहित्यस्य सत्त्वात् । न चेदं दुर्विज्ञानोत्तरप्रश्नवाक्यरूपप्रहेलिकात्मकम् प्रहेलिकातिरिक्तस्यापि मध्येव्योम स्फुरतीत्यादेः शब्दार्थ– चमत्कारमात्रसारस्य काव्यस्य सत्वात् ।

सुखग्रहणार्थं संक्षेपेण चित्रकाव्यमुदाहरति । तत्र पूर्वं शब्दचित्रम्--**स्वच्छन्दोच्छल**दित्यादि । स्वच्छन्दं स्ववशं यथा स्यात्तथा उच्छलत् उद्गच्छत् अच्छं निर्मलं कच्छकुहरेषु जलप्रायतटप्रदेशस्थतरङ्गकृतबिलेषु छातेतरं दुर्बलेतरमर्थात् वेगेन बलवत् यत् अम्बु जलं तस्य छटा परम्परा तया मूर्छन् विनश्यन्मोहोऽज्ञानं येषां ते महर्षयस्तैर्हर्षेण सहर्षं विहिते कृते स्नानाह्निके स्नानम् आह्निकं दैनिकमन्यत् कर्म च यस्यां सा स्नानस्यापि आह्निकत्वेऽपि प्राधान्यात् पृथक् ग्रहणम् । एतावता मन्दाकिन्या महर्षिसेव्यत्वेन तीर्थान्तिराद् व्यतिरेको दर्शितः । उद्यन्त उद्गच्छन्त उदारा महान्तो दर्दुरा भेका यासु ताः तादृश्यो दर्यः कन्दरा यस्याः सा, दीर्घा लम्बा अदरिद्रा परिणाहवत्त्वेन शाखासम्पत्त्या च अकृशाश्च ते द्रुमास्तेषां द्रोहो मदन्योऽपि दीर्घ इति अमर्षेणेव पिपातयिषा तस्य उद्रेको वृद्धिस्तेन महान्त उन्नता उर्मयस्तरङ्गास्तैर्मेदुरो निबिडो मदो गर्वो यस्याः सा मन्दाकिनी गङ्गा वो युष्माकं मन्दतां दुर्भाग्यम् अह्नाय झटिति भिद्यात् उच्छिद्यात् विनाशयादित्याशीः । [४]

अत्र छकारस्य हकाररेफषकाराणां हकारनकारयोर्दकारस्य नकारदकारयोश्च अनुप्रासः शब्दालङ्कारः । शब्दाश्रयोऽलङ्कारः शब्दालङ्कारः । आश्रयाश्रयित्वनिरूपणञ्चान्वयव्यतिरेकनियमाभ्यां परीक्षणेन । एवञ्च शब्दान्वयव्यतिरेकानुविधायी अलङ्कारः शब्दालङ्कार इति निष्कर्षः । समीक्ष्य विनिवेशितः शब्दालङ्कारो हि सत्युपकार्ये रसादौ शब्दशोभाकरणेन परम्परया रसादिकमुपकरोति, असति तु तस्मिन् केवलं शब्दे एवातिशयमादधाति । असमीक्ष्य विनिवेशितस्तु सन्तमपि रसादिकमाच्छाद्य स्वप्रधानतया भासते यथात्रैवोदाहरणे । यद्यपि अत्र कवेर् मन्दाकिनीविषयको रत्याख्यो भावः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विनिर्गतं मानदमात्ममन्दिराद् भवत्युपश्रुत्य यदृच्छयापि यम् ।
ससम्भ्रमेन्द्रद्रुतपातितार्गला निमीलिताक्षीव भियाऽमरावती ।। ५ ।।

इति काव्यप्रकाशे काव्य-प्रयोजन-कारण-स्वरूप-तद्विशेषनिरूपणो नाम प्रथम उल्लासः ।

कथञ्चित् प्रतीतिविषयमागच्छति तथापि कवेरनुप्रासमात्रे उद्यमस्य दर्शनात् कविहृदयगतस्यापि तस्य उद्यमान्तराभिभूतत्वम्, उद्रिक्तालङ्कारचमत्कारेणसहृदयचित्तस्य च हठादाकृष्टत्वात् तच्चित्ते ऽपि स भाव उद्रिक्ततरे अलङ्कारचमत्कारे विश्रान्ते एव परिदुर्बलतया प्रतीतिविषयतामवतरतीति च एतत्काव्यकृतोद्रिक्तचमत्कारस्य भावात्मकत्वस्याभावात् भावस्यात्रागणेयत्वं बोध्यम् ।

वाच्यचित्रमुदाहरति-- **विनिर्गत**मित्यादि । भर्तृमेण्ठविरचिते कह्लणकृतकश्मीरराजतरङ्गिण्यामुल्लिखिते [२।२६०-२६२] हयग्रीववधाख्ये महाकाव्ये हयग्रीववर्णनप्रस्तावे पद्यमिदमिति सम्भाव्यते । **मानदं** शत्रूणां मानं द्यति खण्डयतीति मित्रेभ्यो मानं ददातीति वा मानदस्तम्**आत्ममन्दिरात्** स्वगृहात् न तु नगरात्**यदृच्छया**निमित्तशून्यया स्वेच्छया, या यत्किञ्चिद्रूपा हेतुशून्या इच्छा यदृच्छा इति पदं मयूरव्यंसकाद्याश्रयणेन पृषोदरादित्वाश्रयणेन च साधु; **विनिर्गतं** निस्सृतं न तु प्रस्थितम्, **उपश्रुत्य** कथञ्चित् श्रुत्वा, न तु प्रामाणिकाद् दूतात्, **ससम्भ्रम**स्त्वरायुक्त **इन्द्र**स्तेन दौवारिकाह्वानादिविलम्बासहत्वात् स्वयमेव **द्रुतम्** क्षिप्रम् **पातिता** यथाकथञ्चित् न तु सम्यक्, शीघ्रं निक्षिप्ता**अर्गला** कवाटविष्कम्भः काष्ठविशेषो यस्याः सा तथाविधा **अमरावती** इन्द्रपुरी **भिया** भीत्या, निमीलिताक्षी नीम्लोचिताक्षीव भवतीत्यर्थः । जगत्यां छन्दसि वंशस्थं वृत्तमिदम्, न तु वंशस्थं छन्द इति वक्तव्यम् । वंशस्थलक्षणं च "जतौ तु वंशस्थमुदीरितं जरौ" इति । [५] ।

अत्र निमीलिताक्षीव भवतीति उत्प्रेक्षा अर्थालङ्कारः । अर्थाश्रितश्चमत्कारविशिष्टः साधर्म्यादिरर्थालङ्कारः । एवञ्च वाक्यार्थोपस्कारको वाक्यान्तर्गतो ऽर्थविशेष एव अर्थालङ्कारः । स्वरूपसम्बन्धेन सम्बन्धान्तरेण वा ऽपि अर्थाश्रितो ऽलङ्कारो ऽर्थालङ्कार इति फलितो ऽर्थः । अत्रापि आश्रयाश्रयित्वनिरूपणन्तु अन्वयव्यतिरेकपरीक्षणेनैव । एवञ्च अर्थान्वयव्यतिरेकानुविधायी अलङ्कारोऽर्थालङ्कार इति निष्कर्षः । अधिकं दशमे उल्लासे वक्ष्यामः । तादृशस्यार्थस्यालङ्कारत्वं च वाक्यार्थोपस्करणपूर्वकविभावशोभाकरणद्वारा रसस्योपकरणाद् विचित्रत्वादेव वा । अर्थालङ्कारो हि विभावादे रसाद्यङ्गस्य उत्कर्षमादधान एव रसादीनुपकरोति । यत्र तु चमत्कारहेतू रसादिर्नास्ति तत्र उत्प्रेक्षाद्यात्मकवाक्यानां स्वरूपमात्रेण अलङ्कारीभूतोत्प्रेक्षाद्यात्मकवाक्येन तुल्यत्वात् स्वरूपवैचित्र्यादेव चार्थालङ्कारत्वव्यवहारः । यत्रापि असमीक्ष्य निवेशितम् उत्प्रेक्षा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्यात्मकं वाक्यं सन्तमपि रसादिकमभिभूय स्वप्रधानतया तिष्ठति तत्रापि तस्यार्थालङ्कारत्वेन व्यवहारः स्वरूपवैचित्र्यादेव, यथात्रैवोदाहरणे । अत्र रसाद्यङ्गत्वमतिक्रम्य हठात् सहृदयहृदयाकर्षणेन स्वप्रधानत्वं प्राप्ताया उत्प्रेक्षाया एव प्राधान्येनास्वाद्यत्वाद् अर्थचित्रमिदं काव्यम् । हयग्रीवे अनुभावातिशयः इन्द्रे भयानकाभासो वा उत्प्रेक्षाकृते चमत्कारे विश्रान्ते एव मन्दं प्रतीतिविषयमवतरन् न रसनीयत्वं प्राप्नोतीति न च काव्यस्य व्यपदेशविशेषहेतुतामारोहतीति न ध्वनित्वमस्य काव्यस्य न वा गुणीभूतव्यङ्ग्यत्वम् । गोविन्दठक्कुरस्तु सरसत्वाश्रयणेनेदमुदाहरणं प्रत्याख्याय "मध्येव्योम स्फुरति सुमनोधन्वनः श्यानचक्रं मन्दाकिन्या विपुलपुलिनाभ्यागतो राजहंसः । अह्नश्छेदे त्वरितचरणन्यासमाकाशलक्ष्म्याः संसर्पन्त्याः श्रवणपतितम्पुण्डरीकं मृगाङ्कः ।" इत्युदाहरणसुपन्यास्थत् । श्यानचक्रं शाणचक्रं शस्त्रतैक्ष्ण्यसम्पादकं पाषाणजयन्त्रम् । नरसिंहठक्कुरस्तु वध्यत्वेनोपनिबध्यमाने हयग्रीवे वीररसस्य भावस्य वा अनवभासाद् युक्तमेव मूलोक्तमुदाहरणमिति मन्यते । प्रबन्धमध्ये पाठे तु अस्य पद्यस्य रसमयता रसाभासमयता भावमयता वाऽपि भवेदेव, एककन्तु पठितं वाच्यचमत्कारप्रधानमेवेदं पद्यम्, अत्र वाक्यस्य उत्प्रेक्षापरत्वात्, उत्प्रेक्षायामेव वाक्यार्थस्य विश्रान्तत्वाच्च । यद्यपि रसमयप्रबन्धमध्यगतत्वेन सरसं काव्यं अधमत्वेनोदाहर्तुं न युक्तं तथापि एककाभिप्रायेणैवेदमुदाहृतमत्रेति सम्भाव्यते । (सू. ६) ॥

इति श्रीहिमवत्खण्डस्थ-नेपालदेश-मध्यवर्ति-त्रितुङ्गा-
चलाङ्कित-जनपदान्तर्गत-ताम्रकूट-ग्रामा-
भिजन-नारनाथि-गाङ्गेय-कौण्डिन्याय-
नाऽऽचार्य-शिवराजकृतौ हैमवत्यां
काव्यप्रकाशविवृतौ
प्रथम उल्लासः

॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुभराज्याभिषेकः संस्कृताध्ययनसंस्थानञ्च एकं सिंहावलोकनम्[1]

राज्याभिषेकविषये – प्रा. सिद्धिनाथगौतमः

२०३१।१०।४।६

वीरभूमिस्तपोभूमिर्वेदभूमिस्तथैव च ।
अध्यात्मभूश्च नेपालो राजते राष्ट्रमण्डले ॥१॥

राष्ट्रियता – समुत्कर्षे स्वातन्त्र्ये च सगौरवे ।
जाजागर्ति नरेशस्याभिषेको राज्यकर्मणि ॥२॥

ज्योतिर्मयं तदतुलं पट्टं तत्तु त्रिशक्तिकम् ।
देदीप्यते च राजन्यौजस्विता ह्यभिषेचनात् ॥३॥

नरनारायणेत्यादिविविधा विरुदावलिः ।
ॐराजपट्टविख्याता प्रशस्तिः शोभते प्रभोः ॥४॥

शासने राजतन्त्रस्य निहिते त्वधिकारके ।
विशेषे भावनादार्ढ्यं कर्तुं राज्याभिषेचनम् ॥५॥

प्रजानां विनयाधाने रक्षणे भरणादिषु ।
संलग्नराजसंस्थायाः शक्तिवृद्ध्यै विशेषतः ॥६॥

राष्ट्रियेऽस्मिन् समारोहे स्वधर्मे च स्वसंस्कृतौ ।
स्वाभिमाने स्थिता जातिर्नेपालस्य प्रगर्जति ॥७॥

ऐतरेये ब्राह्मणे हि विष्णुधर्मोत्तरे तथा ।
भारते रामवृत्तान्ते गर्गादिसंहितासु च ॥८॥

ज्योतिःशास्त्रे नयाख्ये च राजशास्त्रेऽर्थशास्त्रके ।
राजधर्माभिषेकादौ सन्त्युल्लेखाः सहस्रशः ॥९॥

परम्पराप्रशस्तायां मान्यतायामनादितः ।
सामाजिक्यां च धार्मिक्यां भावनायां प्रवल्गिताः ॥१०॥

---

१ वर्णानुक्रमानुसारम् अस्माद् लेखात् एव पूर्वं मुद्रणीयः साम्बराजाचार्यस्य लेखः मुद्रणालयस्य त्रुट्या अस्थाने एव पूर्वमेव मुद्रितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राजसूयाख्ययज्ञस्येदानीन्तनस्वरूपक: ।
राज्याभिषेक आभाति ह्यनुकल्पत्वपूरणे ।।११।।

संस्थानविषये:-

अनुसन्धानपर्यन्तं प्रमाणपत्रत: स्थिता ।
संस्थानस्य व्यवस्थास्ति शिक्षाया नूत्नपद्धतौ ।।१२।।

प्रमाणे स्नातकाख्ये च मूलाभीष्टानिवार्यका: ।
क्षेत्रे सहायका: पाठा अन्यसंस्थानसन्निभा: ।।१३।।

संस्थानान्तरनिष्पन्नां जनशक्तिस्वरूपिणीम् ।।
स्ववैशिष्ट्यसमेतां च शक्तिमुत्पाद्य तिष्ठति ।।१४।।

युगानुकूलशिक्षाया: सार्थक्यं सुविचारत: ।
विदधद्द्योतते नित्यं संस्थानं संस्कृतस्य हि ।।१५।।

आर्यत्व-हिन्दुत्व-सुमानवत्वे पक्षे सुशीलान् निखिलान् विधाय ।
शास्त्रीय-गाम्भीर्ययुतान् करोति जनांस्तथाचारविचारसाधून् ।।१६।।

प्रमुकुटप्रशस्ते राष्ट्रसंस्कारबोधे गुरुकुलपरिपूताभ्यासशास्त्रार्थमाने ।
[illegible]विधिनिपुणत्वे वास्तुविद्याविधाने प्रचलति सततं यत् कार्यसंपादनादौ ।।१७।।

संस्कृते राष्ट्रभाषाया: संस्कृतस्य कलानिधे: ।
चन्द्रिकाचालनायैव संस्थानं यतते सदा ।।१८।।

राष्ट्रे राजनि सत्प्रेमभक्तिदीपं प्रसार्य च ।
राष्ट्रियतासुसंबद्धां जनशक्तिं सृजत्यद: ।।१९।।

आंग्लभाषानिार्यत्वं प्रमाणे स्नातकस्तरे ।
संस्थानस्यास्ति लक्ष्यं तु क्रमश: पाठ्यसाधने ।।२०।।

राष्ट्रियस्य महत्त्वस्योपयोगित्वं पुन: पुन: ।
विश्वात्मदर्शने चर्चानुसन्धाने विधीयते ।।२१ ।।

दाङ्‍ तथा मट्टिहान्यां धराने काष्ठमण्डपे ।
विद्यापीठानि* चत्वारि संस्थानान्तर्गतानि वै ।।२२।।

हैमवत्यभिधेयेयं संस्थानस्य सुपत्रिका ।
शुभराज्याभिषेकाङ्करूपं प्राप्य सुशोभते ।।२३।।

[illegible] सुखसमता-प्रसाधने सुशान्तिललित-सुगति-प्रचारणे
[illegible]ता-सरलनय-प्रसारणे सरस्वती श्रुतिमहती महीयताम् ।।२४।।

---

* विद्यापीठम् इदानीं 'क्याम्पस' इति प्रसिद्धम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पण्डित श्रीदधिराम शर्मा मरासिनी

(वि॰ सं. १९३०- २०२०)

–पं० धनञ्जयमरासिनी ।

आसीद् गुल्मी–मण्डलान्तर्गता ऽऽ र्घाऽभिधोपण्डलमध्यवर्ती–वामरूक-ग्रामे सदाचार–पूतमरासिनोवंश्यो वेदाऽभ्यास–परायणो लालमणिशर्मा द्विजाऽग्रणीः ।

तत्सुतो नाम्ना दिर्शैशर्मा तत्त्वजिज्ञासार्थं वने तपस्यन् कञ्चन कालं निनाय । तपस्यतस्तस्य दुश्चरतपः प्रभावाद् विद्योतमाने नयने असित–पक्षरात्रौ नक्षत्रे इव दूरस्थैरनुभूयेते स्म ।

ततः कदाचित् स्वपने 'तव भक्त्यैव प्रीतोऽस्मि मा तपसा शरीरं शुशुषस्त्वद्वंशे लब्धात्म–साक्षात्कारा भविष्यन्ति' इति जगदीश्वरेणानुकम्प्यमानस्तपसो विरराम सः ।

तस्य शशिधर–प्रेमनारायण-बुद्धिधर नामानः पुत्राः क्रमशोऽजनिषत । तेषु शशिधर शर्मा समुत्पत्पन्नैकपुत्रो गोष्ठे वसन् गाः सेवमानो जगदीशानुकम्पया स्फुरत् तत्त्वज्ञानः स्वकीय–पूर्व–स्वभावं विरहयाम्बभूव ।

अलौकिकाचारं पुत्रं वीक्ष्य तमुन्मत्तमिवाऽऽशङ्कमाना जननी तद्गुरुं भारद्वाज–गोत्रं धनेश्वरं निवेदितवती । धनेश्वरश्च 'अधीतशास्त्राः पञ्चयज्ञादिकर्मनिष्ठा अभ्यस्तोपनिषदोऽपि वयं नाऽऽत्मसाक्षात्काराय समर्थाः कथं त्वमात्म–ज्ञानं लब्धवानिव लौकिकाचारमतिक्रामसि ? किं त्वं जानासि ?' इति पत्रद्वारा साक्षेपं तं कथितवान् ततः शशिधरशर्मणा 'भवन्तं गुरुं सदा शिवरूपं भवन्नाम च शिवपञ्चाक्षर–मन्त्ररूपं पश्यामि, नान्यत् किञ्चिज्जाने' इत्यर्थकेन श्रीधनेश्वरनाम्नः प्रत्यक्षरं पद्यमयेनस्तोत्ररूपेण प्रतिपत्रेण निवेदितो गुरुः परमप्रीतो विस्मितश्च 'स्थाने पुत्रस्ते तत्त्वज्ञाताभूदिति' शशिधरमातरं समसान्त्वयत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ कदाचित् तीर्थयात्रापरो गुरुणा निनीष्यमाणं पाथेयं प्रतिषिध्य तेनैव सह बदरिकाश्रमं गच्छन् मार्गे सर्वत्र सिद्धि–प्रभावेण यथावश्यकं भोजन–शयनादि वस्तु–जातमकल्पयत् ।

स्वयमात्मतत्त्व–ज्ञोऽपि शास्त्र–मूलां परम्परीणां रीतिं रक्षन् हिमालयखण्डे मनुष्य-दुष्प्रवेश–सूक्ष्मद्वार–विशाल–गर्भ–गुहायां प्रविश्य तत्रसमाधिप्रभाव–सहस्र–वर्षायुषः कस्माच्चित् (भूरे बाबा) महात्मन आत्मतत्त्व–बोधवाक्यमश्रौषीत् ।

तदनु कृष्णगण्डकी–गव्यूति–प्रतीच्य–तीरवर्तिन ऋष्यशृङ्ग (रेसुङ्गा) शैलस्य कूटे महीरुहकोटराश्रय आत्मानुचिन्तनादिपर ईतिभीत्यादिनिरसनेन परितस्थ–ग्राम-वासिनो जनान् रामराज्यसुखमनुभावयन् समये समये नारद–दत्तात्रेय–दुर्वासः प्रभृति–मुनिभिरपि स्नेहेन कृतसंगमः प्रारब्धभोग्यं समयमतिवाहयामास ।

तत्पुत्रो लक्ष्मीनारायणस्वामी बाल्यादेव लब्धात्मतत्त्व अबाल ब्रह्मचारी तत्रैव ऋष्यशृङ्गकुटे स्थितः ।

अधित्यकायां सावनीप्रदेशं नागरङ्गादिनानाविधफलेग्रहिपादपारामेण मण्डयाम्बभूव । यत्रत्यानि फलानि दर्शकगोपालादितृप्तिकराणि भवन्ति ।

स सुदूराऽऽगतानां सामीप्यभाजां च जनानामतीताऽऽगामिवर्तमानविषयाञ्जन्मान्तरविषयांश्च जानन् ईतिभीतिनिराकरणेन पितेव सुखमनुभावयाभास ।

अथातो दिशैपुत्रः शशिधर–सौन्दर्यः प्रेमनारायणशर्मा गृहे वसन्नपि योगमार्गं प्रविविक्षुः सदाचारशील आसित् ।

तत्पुत्रो मणिराम शर्मा ज्योतिः शास्त्र विशारदो गायत्री–मंत्रजपपरायणः स्पर्श-योगावधि प्राप्त आसीत् ।

'पूतं भवद्वशं गुरुकुलमङ्गीचिकीर्षवो वयं स्मः, अतोभवता कोप्यास्माकीन ग्रामे प्रहीयताम्' इति खिद्मिमाभिजनैर्जनैः प्रार्थितो लक्ष्मीनारायणस्वामी मणिराम शर्माणममुं खिदिमगमनायाऽऽज्ञापयत् । असौ च तदीयाऽऽज्ञागौरवेण तत्प्रभृतिखिदिमग्रामे–न्यवसत् । मणिराम पुत्रः परीक्षित, सरुद्राऽभिषेकपञ्चायतन–देवपूजनपरायणः सदाचार शील आसीत् ।

अस्माच्च काश्यपगोत्रप्रभवायां खगेश्वरीदेव्यामङ्काग्निनवेन्दु– (१९३९) मिते वैक्रमाब्दे आषाढ कृष्णाष्टम्यां भृगुवासरे प्रकृतचरितनायकः श्रीपण्डितदाधराम शर्मा मरासिनी जनुषाभुवमलमकरोत् ।

श्रीहरिहरगौतमनिर्मित वापीतटे शीलायामुत्कीर्णानि संक्षिप्त निजपूर्वज वर्णनानि तेन निर्मितानि पद्यान्यधस्तनरूपाणि सन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथा-

दिव्यैर्गजैरुपरितस्तपनीयकुम्भैरानन्दमन्थरकरैरभिषिच्यमानाम्
पद्मासनादिपरिपूजितपादपद्मां पद्मासनाञ्जलनिधेस्तनयां नमामः ॥
यस्याः पदाम्बुजरजोलवमुत्तमाङ्गे वाञ्छन्ति धारयितुमम्बुजविष्टरायाः
आम्नायशेखरवचः स्तुतवैभवायै तस्यै नमोस्तुगरुडध्वजवल्लभायै ॥२।

ग्रामे वामरुकाभिधो जपरतो योगी निरुद्धेन्द्रियो
वेदाभ्यासपरायणोऽवनितले ख्यातो द्विजन्माग्रणीः ॥
नाम्ना लालमणिर्धनञ्जयमुनेर्गोत्रे पवित्रेऽभव-
त्तादृक्सर्वगुणो बभूव च दिशैशर्मा तदीयःसुतः ॥३॥
तेनार्घाचलकन्दरे सुकठिनं तप्तं तपस्तत्र य-
द्विघ्नोभूददः ऋश्यशृङ्गगिरिमागत्यापि तप्तं पुनः ।
प्रीतस्तत्तपसा पुराणपुरुषः प्रावोचदग्रेस्थितः
स्वप्नेऽलं तपसा द्विजेन्द्रपरया प्रीतोस्मि भक्त्यैव ते ॥४॥

त्वत्पुत्रपौत्राविह योगसिद्धौ भविष्यतोन्येपि च वंशजास्ते ।
जपैकनिष्ठा भवितार एवेत्युदीर्य देवः स तिरोबभूव ॥५॥
प्राप्तप्रसादा भगवत्सकासान्महानुभावो भगवन्तमेव ।
भक्त्या समाराध्य चिरं स योगी कालेन वैकुण्ठपदं जगाम ॥६॥
त्रयस्तस्याभवन्पुत्रा ज्येष्ठः शशिधरः प्रभुः ।
प्रेमनारायणो बुद्धिधरस्तदनुजावुभौ ॥७॥
श्रीशशिधरचरणानां महिमानं वक्तुमत्र कः शक्तः ।
पुनरवतरति पृथिव्यां वाल्मीकिश्चेत्स एव शक्तःस्यात् ॥८॥
सत्यं ज्ञानमनन्तं ब्रह्मवापुः सुखेन येन साक्षात् ।*
जपतः श्रीगायत्र्याः शुक्लयजुः संहितापाठात् ॥९॥
देहं धारयतो योगात्सहस्रं शरदां गुरोः ।
अशृण्वंस्ते महावाक्यं संप्रदायविशुद्धये ॥१०॥
मथुरायां गतैरेभिः साक्षाद्गोपालवालतः ।
तत्त्वोपदेशः संप्राप्तो ब्रह्मात्मैक्यप्रबोधकः ॥११॥
नारदोऽपि समागत्य स्वयमेव समादृतः ।
ऋष्यशृङ्गाचलस्थेभ्यो भक्तेस्तत्त्वमुपादिशत् ॥१२॥
अन्येपि बहवः सिद्धाः श्रीमच्छशिधरप्रभून् ।
सप्रेमाणः समाजग्मुरृष्यशृङ्गाचलाश्रमे ॥१३॥

---

* अत्र वाक्यार्थः स्फुटो न प्रतिभाति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चेतः समादधानानामेषां ब्रह्मणि निष्कले ।
देहस्तस्थावन्तरिक्षे हस्तमात्रे महीतलात् ।।१४।।
वीरशालिप्रभृतयः षड्दर्शनकृतश्रमाः ।
बुधाः सिषेविरेपादानेषामुच्छिष्टभोजिनः ।।१५।।
भूमिरत्नाम्बरैरार्चीदेतान्नेपालमागतान् ।।
महाराजाधिराजश्रीगीर्वाणयुद्धविक्रमः ।।१६।।
नास्तिक्यात्प्रातिकूल्येन वक्तुस्तूपरिकस्यचित् ।
नासास्यबिलतस्तेषां पेतुर्ज्वालास्त्रयोग्निजाः ।।१७।।
भित्त्वा मूर्धानमादित्यमण्डलं च निजेच्छया ।
श्रीमन्तस्तनुमुत्सृज्य कैवल्यपदमाविशन् ।।१८।।
तत्पुत्रास्तादृशा एव लक्ष्मीनारायणाभिधाः ।
कीर्तयन्ति गुणान्येषामद्यापि सकलाः जनाः ।।१९।।
प्रेमनारायणो नाम नारायणपरायणः ।
जपयोगरतो नित्यमभूच्छशिधरानुजः ।।२०।।
ज्योतिर्विदां 'शिरोरत्न' मणिरामस्तदात्मजः ।
रुद्रपाठरतो नित्यं परीक्षित् तत्सुतोऽभवत् ।।२१।।
तत्सुतो दधिरामोहमाख्यामाख्यां महात्मनाम् ।
कर्तुं सरोवरस्यास्यपूर्वजानां सतां मुदे ।।२२।।

प्रकृतमनुसरामः-

त्रैयब्दिकमेव बालमिमं विहाय दुरदृष्टवशान्मातरि दिवंगतायां **पितामही** मातृस्थानीया सस्नेहं लालयन्ती पुपोष । पञ्चमेब्दे निजतातपादात् परीक्षित एव वर्णमाला-मारभ्य सप्तशत्यन्तमध्यगीष्ट । अथाष्टमेऽब्दे श्रौतेन विधिना कृतोपनयनो **महोदय-**ब्रह्मचारिणो यथानियमं शुक्लयजुर्वेदमधीयानो योगं शिशिक्षुणा चङ्क्रम्यमाणेन **तेनैव** ब्रह्मचारिणा समं काशकी पुष्करिणीं (कास्कीपोखरा) धृततत्पोटलिको गतो योगनिष्णातात् तत्रत्याद्विदुषः पशुपतिशर्मणः कञ्चित्कालं लघुकौमुदीमधीतवान् । भोजनादि **व्यवस्था-**रहितो गृहं निववृते ततः ।

परमध्ययनैकमनोवृत्तिस्तिवारिवंशावतंस — संपादितावास-भोजनादि-**व्यवस्थां** पाटनदेवी (तुलसीपुर) स्थ-संस्कृतपाठशालामुपेतस्तदीय-प्रतिभातिशय-तुष्टेन **तत्रत्याधि-**कारिणा प्रवेशितः स-लघुकौमुदीकान् प्रथमपरीक्षायां निर्धारितान् ग्रन्थान् **समग्रानधीत्य** **रसबाणाङ्कभू** (१९५६) मिते वैक्रमाब्दे प्रथमपरीक्षां प्रथमश्रेण्यामुत्तीर्णवान् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो राजधान्यां काष्ठमण्डपे राजकीय–संस्कृत–पाठशालायां गतममुं प्रातिभेन-चमत्कारेण कविता – लेखन – संस्कृत-भाषणादिभिश्च समाकृष्टमनाः शिक्षा–निर्देशकस्त्रयोदशेहन्येव पाकशालायां प्रावीविशत् । तत्र विशेषेण गुरोर्विष्णुहरेःसकाशाद् व्याकरणमन्येभ्यो जीवनाथ–गङ्गादत्तादि–गुरुभ्यो न्यायवेदान्तसाहित्यादिग्रन्थानधीयानः कविता–रचनायामपि बद्धधीरन्यानपि बहून्सतीर्थ्यान् कवितालेखनरीतिमशिशिक्षत् । विधुरसाङ्केन्दु (१९६१) मिते वैक्रमाब्दे वाराणसेयराजकीयसंस्कृतमहाविद्यालयीयनव्य-व्याकरण–मध्यम–परीक्षायां प्राथम्येनोत्तीर्णवान् । ततो गृहमागत्य पितृनिर्देशवर्ती अग्निवंशोद्भवां गङ्गादेवीं भर्तृसेवापरायणामुपायत । तदानीं चिरन्तनाऽशिक्षा–तमोग्रस्तसमाजमध्यात्म-कर्मकाण्ड–व्यवहार-सदाचाराऽध्यापनरूपमयूखैरुद्बोधितवान् ।

अत्रभवतः प्रथमं पुत्री जाता तदनु चाऽननुभूत–सुतवदन-दर्शनाऽऽनन्दश्चतुर्विंशद्वर्षोऽसावात्रेय-गोत्रोद्भ वां गोपिकादेवीं चारुहसितां भर्तृ-सेवा-परायणां परिणीतवान् । अब्दान्तर एव परिहृतसापत्नदोषाया ज्येष्ठपत्न्याः पुत्र-रत्नमजनि ।

ततःसंस्कृतानुरागी स्वयमुपार्जितबहुललक्ष्मीको गुरुवचःप्रमाणो वदान्यो महीसुरो हरिहरशर्मागौतमो निज-गुरुप्रकृत–चरितनायकस्योपदेशं शिरसा दधानो निजाभिजने पाणिनीयतपोवनोत्सङ्गे खिदिमग्रामे स्वकीयेन नाम्ना वेदाङ्कनवेन्दुमिते (१९९४) वैक्रमाब्दे संपादितच्छात्रावास-वस्त्र–भोजनादि- व्यवस्थां श्रीहरिहरसंस्कृतपाठशालां-स्थापयित्वा तन्निर्देशिनं तमेव सानुनयं स्थापितवान् ।

ततः प्रभृति श्रीदधिरामशर्मा तत्रत्यांश्छात्रान् समये समये प्राचीनाऽऽर्य-पद्धति-मुपदिशन्नध्यापकवर्गं च समुचितं निर्दिशन् वर्षाणां षड्विंशत्योक्तपाठशालाप्रधानाचार्यत्वेन संस्कृत–भाषां प्राचीचरत् । यतः परसहस्राणिच्छात्राणां संस्कृत-भाषा-प्रसारणक्षमाण्यभूवन् । असौ ब्रह्ममुहूर्तान्मध्याह्नावधि ध्यान-स्नानायुतसंख्यगायत्रीजप–ब्रह्मयज्ञ-तर्पण-स-रुद्राभिषेक - पञ्चायतनदेवपूजन – शुक्लयजुः – संहिता – पूर्णसप्तशती श्रीमद्भगवद्गीता-विष्णुसहस्रनाम - श्रीमद्भागवतपाठ -- पञ्चयज्ञादिभिरवशेषसमये च योगोपयोगिशास्त्रालोचन-भक्तिरसप्रधान-कवितालेखनादिभिर्यावज्जीवं समयाऽकरोत् ।

तत्र भवता निर्मितानि हास्यादि-रसालङ्कारयुक्तान्यपि खण्डकाव्यानि पारमेश्वरपदमन्तिमं लक्ष्यमुररीकुर्वन्ति । रसस्यन्दीनि तान्यधस्तान्नाम्ना निर्दिश्यन्ते ।

(१) 'श्रीराम चरितामृतम्' ७ सर्गात्मकम्–

(संस्कृतभाषायां पद्यात्मकम्)

यथा निदर्शनम्:–

यत्सत्वेनाऽसदपि निखिलं सद्वदाभाति विश्वं
नामैवालं स्मृतमपि सकृच्छेत्तुमंहांसि यस्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नानारूपैरवतरति यः पालकः साधुसङ्घं
तं श्रीरामं हृदयनिलयं चेतसा भावयामः ।।

श्रीरामचरितामृतम् (सर्गः१,)

अकिञ्चनप्रियोऽसि त्वं बुधानामिति वाङ्मुधा ।
संचीयते नामरत्नं हृत्कोशे त्वत्प्रियैः सदा ।।
नीत्या शास्त्रोक्तयापि त्वं पालयन् सकलाः प्रजाः ।।
अनीतिमेव काकुत्स्थ? कुरुषे सागराम्बराम् ।।

(२) श्रीकृष्णचरितामृतम्– ७ सर्गात्मकम्–

(संस्कृतभाषायां पद्यात्मकम्)

यथानिदर्शनम्ः–

अपश्यतां नीलसरोरुहद्युतिं सशंखचक्राब्जगदं चतुर्भुजम् ।
स्फुरत्प्रभामण्डलमध्य–वर्तिनं परं पुमांसं पुर एव दम्पती ।।१।।

लघुतरकरपद्मोऽतीवलघ्वङ्गुलीको
लघुतर–मुख–पद्मोऽतीवलघ्वङ्घ्रिपद्मः ।
लघुतर–सकलाङ्गस्तेजसैकेन भूयान्
गुरुरपि निखिलानां बालकोऽभूल्लघीयान् ।। ५८ ।।

(द्वि. स.)

व्रजपरिवृढसूनोः शैशवीयैर्विलासै–
र्भृशमपहृतचेतो– वृत्तयो गूढ–भावाः ।
निजगदुरथ सर्वा नन्दपत्नीं तरुण्यो-
विनय तनयमेतं दुर्विनीतं यशोदे ?।।११।।

(३) गणेशवैभवम्–

(संस्कृतभाषायाम् पद्यात्मकम्)

यथा निदर्शनम्ः–

गणेशपादाम्बुरुहद्वये मनोमधुव्रतोऽद्यैव मया नियोज्यते ।।
यतः समस्तेन्द्रियगोचराभिधे न यात्यसौ चम्पककानने रतिम् ☞।।

☞ अस्य वाक्यस्यार्थः स्फुटो नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(४) अपरोक्षाऽनुभूतिः (संस्कृतभाषायाम्)

यथा निदर्शनम्:--

एकस्मै हरिनाम्ने पर्याप्तं वै न यज्जगज्जालम् ।
तेनाऽयं मनुजन्मा बद्धो मन्मानसं दहति ॥

(५) गण्डकीस्तोत्रम् (सं. भा. पद्यात्मकम्)

(६) (शिवाष्टकम् अकारमात्रस्वरात्मकम्)

यथा निदर्शनम्:--

रथ-चरण-कर-कमल-भव-
दशशत-नयन-खग-पतन-चरणजलज ? ।
अशरण-शरण ? मरण-भय-
मपहर, शशधर-शकल धर ! ॥
अवर्णस्य सुवर्णस्य वर्णनातीत-सद्गतेः ।
अष्टमूर्तेरष्टकं स्यादवर्णं तुष्टये सताम् ॥

(७) दशपदीस्तवः– (संस्कृतभाषायां पद्यात्मकम्)

(८) बालगोपालस्तुतिः (,, ,,)

(९) हरियाचना (,, ,,)

(१०) अम्बिकाष्टकम् (,, ,,)

(११) विष्णुप्रार्थना (,, ,,)

(१२) मातापितृस्तोत्रम् (,, ,,)

(१३) नीलकण्ठ-स्तवः (यत्र प्रतिपद्यमकारादि वर्णक्रमानुसारेणाऽऽरम्भः) संसारदुःख-शमनं-भज नीलकण्ठम्, इति च चतुर्थपादो वर्तते)

यथा निदर्शनाय ङवर्णारब्ध-पद्यम्:-

ङित्वं हि सर्व-हर-गर्व-हरं प्रसिद्धं
तादृङ् न तातङि तदेव स-हेतुकत्वात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञात्वैवमीशभजनं फलनिर्व्यपेक्षं
संसार–दुःखशमनं भज नीलकण्ठम् ।।

(१४) हृषीकेशाष्टकम् (संस्कृत भाषायां पद्यात्मकम्)

यथा निदर्शनम्:–

जगत्–सृष्टौ हेतुं भव–जलधि–सेतुं सुर–कुल-
द्रुहां केतुं भक्ताञ्छरणमुपनेतुं सुनिपुणम् ।
अनन्तं ज्ञानन्तं सकल–जगतां तं नरहरि–
हृषीकेशं वन्दे नव–घन–निभं देवमनिशम् ।।

नरक–गतिविभीतः स्तौमि नाहं मुरारे ?
नपुनरमरनारी–सङ्गचारी बुभूषुः ।
इह किल सुख–हेतौ भूरि–वित्ते न चित्तं,
तव चरणसरोजे भक्तिमिच्छामि नित्यम् ।।

(१) भक्तिविलास (नेपालीभाषायां पद्यबन्धः)
(२) सदुपदेश (" ")
(३) श्रीकृष्णाद्भुतचरित्र (" ")
(४) श्रीकाशीविरह (" ")
(५) प्राण–विचार (" ")
(६) श्रीसूर्यनारायणस्तुतिः (" ")
(७) श्रीरामकृपामृतलहरी (" ")
(८) कालसाम्राज्य (" ")
(९) भस्माष्टक (" ")
(१०) श्रीभागवती महिमा (" ")
(११) श्रीविष्णुमानसपूजा (" ")
(१२) गङ्गालहरी (" ")

इत्यादीनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विपश्चिदपश्चिमोऽसौ पुत्ररत्नेन धनञ्जयशर्मणा पितृवचः प्रमाणेन पित्रैव सदाचार-शास्त्राभ्यासप्रियेण तस्यामेव हरिहरसंस्कृतपाठशालायां छात्रानध्यापयता यावज्जीवं सन्तोषितोऽनन्य-पुत्रः स सब्रह्मवर्चस आचार्यकक्षायामधीयानस्य ज्येष्ठनप्तुरन्येषां च यथावयस्तत्तत्कक्षायामधीयानानां सर्वेषां नप्तृणामपि सदाचारेण प्रमोदमानमानसो विषयान्निवृत्तो भगवच्चरणारविन्द-मकरन्दसमावेशितमना आनन्दवनसेवी व्योमाक्षिनभोनयन (२०२०) मित-वैक्रमाब्दे अधिक चैत्रशुक्लतृतीयायां सोमवासरे धर्मपत्नीद्वयं-पितृसम-सदाचार-शीलं पुत्रं शूलपाणि-वृषध्वजारि-यज्ञमूर्ति-नीलकण्ठ-नारायणकदेवनाम्नः षट्पौत्रान्, शिष्यान्, धर्मप्राणान् जनान् साश्रुमुखान् विरहयन् काश्यां मणिकर्णिकायां दिव्यवपुरभूत् ॥

हरिः ॐ तत्सत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुभ-कामना

–पद्मनाभोपाध्यायः निरौला
कञ्चनवारी–विराटनगरस्थः।

वीरेन्द्रभूपतिरनेकविदेशचारी, शिक्षानुसारनयपालविकासकारी
कर्तव्यनिष्ठनिजपूर्वजकार्यकारी, राज्याभिषेकसलिलं लभतामिदानीम् ।।१।।
देशे च रक्षां मनुजे च शिक्षाम्, दीने च भिक्षाम् सुकृते च दीक्षाम्
वीरेन्द्रभूपो विदधातु नित्यं, राज्याभिषेकं समवाप्य चाद्य ।।२।।
नेपालराज्ये प्रथितप्रभावा, देवाः प्रदद्युर्विजयं च तस्मै
रक्षेन्नरेन्द्रो नयपालदेशं, राज्याभिषेकं समवाप्य चाद्य ।।३।।
तदेकत्रिंशे परिवत्सरेऽस्मिन्, लब्ध्वाभिषेकं जयदं नरेशः
आरोग्ययुक् पूर्णशतायुरेव, कुर्यात् सदैवं नयपालराज्यम् ।।४।।
श्रीपञ्चवीरेन्द्रमहाधिपस्य, राज्याभिषेके शुभकामनेयम्
पं० पद्मनाभाभिधभूसुरेण, वितीर्यते तस्य जयाय नित्यम् ।।५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शालग्राम-शिलाष्टकम्

पं. भीमकान्तशास्त्री (गुल्मी, धुरकोट)

शालग्रामः सुवृत्तः कलिमलदहनः स्निग्धवर्णः सचक्रो
यस्मिन्देशे गृहे वा निवसति सततं सर्वतीर्थाश्रयन्तत्
भक्त्या पूज्येत येन प्रतिदिवसमसौ किन्न तीर्थाश्रयः स्यात्
किन्त्वेतस्मान्निवासात्परमधिपुरुषे जङ्गमत्वं विशेषः ॥१॥
शालग्राम ! त्वदीयाऽसिततनुरथयन्नर्मदेशस्य शुभ्रा
मन्येऽहं भक्ततुष्ट्यै धरसि शिवगुणं सात्विकं स्वं प्रदाय ॥
यद्वा कृष्णातटे मत्स्थितिरिति सुहृदि ख्यापितं वर्णसाम्यात्
किंवा स्वस्मिञ्छिवे वा गमयितुमयथाभेदबुद्धिं जनेषु ॥२॥
ये मूढाः केवलं त्वां विदुरुपलतया ग्रावरूपास्त एव
नाहं जाने तदीयां गतिमथ तव ये पूजनं सञ्चरन्ति ॥
तेषां वक्तुं फलं कः प्रभवति यदि वा शारदा वाप्यनन्तः
का वार्ताऽस्मादृशानां क्वचिदपि मशको मेरुमुत्थापयेत ॥३॥
शापन्याजात्तुलस्या व्रज भुवि झटिति प्रार्थितश्चक्रगर्भ !
प्रोक्ता सापि त्वया त्वत्तनुरियमवनौ गण्डकीत्वं प्रयातु ॥
त्वत्तीरेऽहं शिलाः स्यामिति तव समयं प्राप्य कृष्णा भवत्सा
तत्तीरे त्वं शिलास्तेऽवतरणमवनौ मर्त्यसंरक्षणार्थम् ॥४॥
यस्ते पूजां चिकीर्षुर्जगति मृगयते प्राप्स्यसे तस्य भक्त्या
मूलस्थानं तु कृष्णातटमतिसुभगं मुक्तिरुर्वन्तरालम् ॥
भक्ताः क्षेत्राद्यथेष्टं तव खलु निकरं सर्वतः प्रापयन्तु
किन्तु क्षेत्रेऽपि सत्ता न हि तव विरला भक्तवात्सल्यहेतोः ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शालग्राम ! त्वमेको न यदि भुवि भवेर्ग्रावरूपं विधाय
भक्ताः कं पूजयेरन् कलिकलुषहरं दर्शनं कस्य साक्षात् ।।
मादृक्षाः प्राप्नुयुश्चाखिलजनसहितो धन्य एष प्रदेशो
धन्या वैं भारतीयाऽवनिरपि निखिला त्वत्कृपालेशमात्रात् ।।६।।
धन्येयं गण्डकी याऽमितभुवनसगर्भस्य तेऽनन्तसंख्यां
गर्भे धृत्वा पुनाति क्षितितलमखिलं गङ्गयैकी–भवित्री ।।
धन्यं क्षेत्रद्वयं त्वद्वसतिरपि ययोरन्तरं मुक्तिरुर्वो–
रेतेष्वेवाश्रितानामपि तव भजतां धन्यता कस्य गण्या ।।७।।
ये त्वन्निर्माल्य वारि प्रतिदिनमभिगृह्णन्ति तेषामकाल–
मृत्युर्वा रोगपीडा क्वचिदपि न पुनर्जन्ममृत्यू भवन्ति ।।
येऽपि प्राणप्रयाणावसर उपलभन्तेऽपि ते सर्व पापै–
र्मुच्यन्ते 'नात्र शङ्का' श्रुतिकथितमिदं यान्ति विष्णोश्च लोकम् ।।८।।
शालग्राम शिलास्तोत्रं त्रिकालं यः पठेन्नरः ।
शालग्राम ! त्वदर्चायां भक्तिस्तस्यास्त्वहैतुकी ।।९।।

इति श्री शालग्राम शिलाष्टकम् भीमकान्तरचितं समाप्तम् ।
(रचनाकालः २००९ वि॰ सं.)

卐

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पण्डित श्रीबद्रीनाथसुवेदिनो जीवनचरितम्

–कुमारी भुवनेश्वरी देवी

परमपवित्रे हिमवत्पार्श्वे नेपालदेशस्य ।
कास्की-मण्डलमध्ये स्यावलुङ्गाख्योऽस्ति वै ग्रामः ।।
वैचक्षण्यं वेदेऽधिगत्य सुवेदपदवाच्याः ।
वहुशो वसन्ति तत्र भूसुरवर्याः स्ववीर्यविख्याताः ।।
वृत्तिक्षेत्रं विपुलं कास्कीक्षेत्रादवाप्तपूर्वास्ते★
ससुखं जीवनलीलां सच्चारित्रेण यापयन्ति स्म ।।
तस्मिन्वंशे रामाज्जयमंगलसंज्ञको जातः ।
तस्मान्माधवनामा स्वनामधन्यो वदान्योऽभूत् ।।
कमलापतिरितिनामा तत्पुत्रो यो द्वितीयोऽभूत् ।
खंजुङखासुरमध्ये पांचोकाख्ये शुभे ग्रामे ।।
गत्वाधिगत्य भूमिं विद्यावलतः स्थितस्तत्र ।
अनुरोधान्मित्रपितुर्यजमानानाञ्च सर्वेषाम् ।।
सप्तासन् तत्तनयाः स्ववीर्यविख्यातसद्यशसः ।
प्रथमो हि दण्डपाणिस्ततश्च नारायणेत्याख्यः ।।
वद्रीनाथश्च ततो डिल्लीरामश्चतुर्थोभूत् ।
तदनु हरिप्रसादः षष्ठो गोविन्दनामाऽभूत् ।।
भोजः सप्तम आसीत् राजान्त्यः पुत्रतोऽप्यन्त्यः ।
ज्यौतिषिकश्च कर्मकाण्डे निपुणोऽभवत् प्रथमः ।
कृषिगोरक्षालग्नोऽभवद् द्वितीयः सतां सेव्यः ।
व्याकरणमध्यमां श्रीकाश्यामुत्तीर्य पाठको जातः ।।

★अवाप्य धीरास्ते इति पाठः साधुः ।

 Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्यालये तृतीयो ग्रामस्थे पण्डितः ख्यातः ।।
रुद्राष्टाध्यायसारं महेन्द्रविजयं महाकाव्यम् ।
विरचय्य पद्यनिवहानन्यांश्चै वापि स्वर्गतो विद्वान् ।
कृषिगोरक्षानिपुणो गृहकार्ये चापि वै तूर्यः ।
ज्योतिर्विद्याकर्मकाण्डादौ प्रञ्चमः कुशलः ।।
काश्यां कलिकातायां नेपाले वै प्रयागे च ।
लक्ष्मणपुरे च विश्वविद्यालयेऽधीत्य शास्त्राणि ।
प्राच्ये पाश्चात्ये च शास्त्रचये स्नातकः कुशलः ।।
नानोपाधिसनाथः ख्यातोऽभूत्पण्डितः षष्ठः ।।
नेपालानां संस्कृतविद्यालये वै महत्पूर्वे ।§
जातप्रधानाचार्यो दशवर्षमध्याप्य तत्रैव ।।
वाराणसेयविश्व-विद्यालये वै गतस्तस्मात् ।
पाठयति सर्वशास्त्रं भक्त्या तत्रागतांश्छात्रान् ।।
गङ्गातीरे विमले शान्ति-कुटीरे मनोहरे शान्ते ।
संस्थाय रामघट्टे भजति हरिं कानने सुखदे ।।
गृहकर्म-कर्मकाण्डे कार्ये कुशलश्च सप्तमो जातः ।
तेषां पुत्रैः पौत्रैर्व्याप्तास्ते वै वसुन्धरा तत्र ।।
तत्र हि बद्रीनाथस्तृतीयजन्मा हि यस्तस्य ।
चरितं विशदं रम्यं विस्तारााद् वच्मि साम्प्रतं श्रृणुत ।।
कमलापतितो धर्मादेव्याः कुक्षिं समुज्ज्वलयन् ।
नेत्ररसग्रहचन्द्रे वैक्रममार्गे समुत्पन्नः ।।
कृतसर्वबाल्यलीलः संस्कारजातं च समधिगत्य ।
श्री दीननाथविदुषश्छात्रत्वं प्राप्य वै प्रथमम् ।
ग्रामे सज्जनविदुषां स्यालचौरेति विख्याते ।
संस्कृतविद्याध्ययनं चक्रे श्रीपुष्करावत्याम् ।
तदनन्तरं स धीमान्पिपठीषया काष्ठमण्डपं गत्वा ।
दधिरामात् पौडेलाद् विदुषोऽधीत्यैव व्याकरणम् ।।
काश्यां गत्वाशीत्यां समुदतरन्मध्यमां तस्मिन् ।
प्रत्यावृत्यैव ततो पौराणिकतां गतः ख्यातः ।।
कुशलश्च कर्मकाण्डे ज्यौतिषशास्त्रे च निष्णातः ।

---

§अत्र पदविन्यासः चिन्त्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

याज्ञिककार्यै समयं कञ्चिदसौ यापयामास ।।
चतुरुत्तरे ह्यशीत्यां वर्षे वै वैक्रमे प्रतिष्ठाप्य ।
सद्विद्यालयमेकं खुदिवेण्यां कर्मदातीरे ।।
सुब्बानरजङ्गगुरुङ ख्यातो घनपोखरानिलयः ।
अध्यापकत्वे यं वै नियोज्य नित्यं हि सच्चक्रे ।।
दत्वा विपुलैश्वर्यं सपुत्रपौत्रः समभ्यर्च्य ।
मुदितो मुदितश्चैनं चक्रे विलोक्य पाठनं तस्य ।।
गोविन्दमाधवादीन् राधाकृष्णादिकांश्चैव ।
स्वान्पुत्रान्सूर्यादीन् संस्कृतमध्यापयामास ।।
तेष्वेको गोविन्दो नानाशास्त्रेषु निष्णातः ।
वाराणसेयविश्वविद्यालयेऽध्यापनं चिरतः ।
कुर्वन्नास्ते श्रेष्ठोऽधुनापि षष्ठोऽनुजो यस्य ।
छात्राणां समितौ यो जातो वै विश्वविख्यातः ।।
देवीभागवते वै यस्यैव हि तत्वबोधिनी टीका ।
विलसति सभ्यसमाजे हिमवत्खण्डे तथा स्कान्दे ।।
माधवनामा घिमिरे काव्यं नयपालभाषायाम् ।
कृत्वा कविवरपदवीं लेभे प्रज्ञाप्रतिष्ठाने ।।
राधाकृष्णः प्राध्यापकपदवीमाप्य नेपाले ।
त्रिभुवनविश्वविद्यालये ऽधुना ऽध्यापयन्नस्ति ।।
पुत्रज्येष्ठः सूर्यो जातः सहसा ऽञ्चलाधीशः ।
रापत्यञ्चलमधुना समलङ्कुर्वन् विराजते तत्र ।।
मध्यमपुत्रो लक्ष्मीनाथो गोरक्षनाथस्य ।
निकटे निवसन्नधुना चिकित्सको ऽस्त्येव कविराजः ।।
मेदिनिनाथो यस्य कनिष्ठपुत्रो गृहे तिष्ठन् ।
अध्यापकतां प्राप्तो ऽध्याप्यानध्यापयत्येषः ।।
एवं बहवश्छात्राः स्नातकपदवीं गता यस्या
सन्ति व्याप्ता राष्ट्रे सहस्रशो यत्र तत्रैव ।।
गीर्वाणवाणिसेवां सततं प्राणं पणं कृत्वा ।
विदधे सदैव यो ऽसौ विख्यातो नैष्ठिकः श्रेष्ठः ।।
रुद्राष्टाध्यायसारं महेन्द्रविजयं तथैवान्यत् ।
एतत्काव्यद्वितयं विलिख्य ख्यातिं गतो राज्ये ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अधिगत्य दीर्घसेवापट्टाभिख्यं हि सम्मानम् ।
अधिराजाद्धि महेन्द्रात् प्रसन्नचित्तः सदैवासीत् ।।

"संस्कृतमेवाध्याप्यं सर्वासूत्कृष्टपाठशालासु ।
सर्वस्वमस्मदीयं तदेव पैत्र्यं परं सारम् ।।
भवति हि रक्षिते ऽस्मिन्नस्माकं संस्कृते रक्षा ।
नो चेद् भवेद्विनष्टा ऽवश्यं साऽतो हि संरक्ष्या ।।"

इत्येव मुक्तकण्ठं नित्यं सर्वत्र संघोष्य ।
तद्रक्षार्थं सर्वान् प्रीत्या सम्बोधयामास ।।
महिषीकर्णे वीणारणनमिवैतद् वृथा जातम् ।
धिक्कृत्य मन्दभाग्यान् मत्वा तदरण्यरोदनं सर्वम् ।।

तानांग्लचाटुकारान् तच्चाकचिक्येन सञ्चकितान् ।
त्यक्त्वा स्वग्रामीणान् 'दुरडाणां' प्राप्तवान् सद्यः ।।
तत्रैव पाणिनीये विद्यालये ऽध्यापकप्रमुखः ।
भूत्वा कतिचिद् वर्षान् सेवायां यापयामास ।।

रोगेणार्तः पश्चात्समागतः काष्ठमण्डपे तत्र ।
क्रीते नूतनभवने सूर्यसमक्षं जहौ प्राणान् ।। *

卐卐卐 卐卐卐

---

*छन्दसि वाक्यविन्यासे च कियताप्यंशेन त्रुटियुक्तो ऽप्ययं निबन्धो पवित्र्याः कुमार्या उत्साहवृद्धये प्रकाशितः । सा स्वकीयमभ्यासं वर्धयतु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दरिद्रता

-पं. रामनाथ आचार्यः
भूतपूर्वप्रधानाचार्यः, वाल्मीकिसंस्कृत-
महाविद्यालयस्य ।

हरे ! हरणशीलता दुरितसन्ततेः सन्ततं
तवैव, सकलश्रुतिस्मृतिवचोभिरुद्घोष्यते ।
अतः जगतपालको विविधतापसंहारकः
कृणत्तु विपदं सतां प्रभुरलं स लक्ष्मीपतिः ॥ १ ॥

दरिद्रता

स्वकीयजनजीवनावनसमीहया प्रश्रय-
प्रकारमुपदर्शयन् सरसचाटुसंभाषणैः ।
कृताञ्जलिपुटः पुरो धनवतां रतस्तोषणे
धनाप्तिवशगो नरो भवति दुःखपात्रं क्षितौ ॥ २ ॥
धनागमपरीप्सया धनिकवर्गमाराधयन्
गतागतपरिश्रमातिशयशीर्णगात्रो भृशम् ।
कलत्रसुतवान्धवोदरदरीसमापूरणेऽ
प्यनीश इह मानवो निधनतां निजां गर्हति ॥ ३ ॥
विहाय विधिनोदितं विविधकर्मजातं स्वकं
सुरार्चनजपादिकं वृजिनसंहृतिक्षेपणम् ॥
दिवानिशमतन्द्रितं द्रविणभूरिचिन्ताकुलो
मलीमसमुखः परिभ्रमति मानवस्तृष्णया ॥ ४ ॥
वितरय तनुतानवं विविधदुःसहव्याधिभि-
र्निरन्तरपरिश्रमोद्वहनशक्तिहीनोऽधनः ॥
कथं व्यवहृतिर्गृहे वसु विनेति सञ्चिन्तयन्
समेति नहि निर्वृतिं कथमपीह दैवाहतः ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दरिद्रजनमानसं मुकुलिताननाब्जप्रभा-
वलोकनविनिश्चितप्रचुरदुःखजालं भृशम् ।।
समुन्नतिविधौ विधेरननुकूलतां भावयत्
पुराजनिकृतं स्वकं दुरितसञ्चयं चिन्तति ।। ६ ।।
अनादरपरम्परामनुभवन्नपि क्षीणधी-
र्विधातृपरतन्त्रतावशगतो गतो दीनताम् ।।
अमन्दमदमन्दिरं धनिकवृन्दमेवाश्रयन्
नहि स्मरति शङ्करं मनसि नेति खेदास्पदम् ।। ७ ।।
विधाय जनशोषणं कृपणतासमालिङ्गिताऽ-
भिमानभरतुन्दिला विविधभोगवद्धादराः ।
धनान्धितधियो नराः परिनिरीक्ष्य नैजाधि[-क
स्वतां परंविजृम्भितां हृदयतापमातन्वते ।। ८ ।।
दरिद्रजनभाषितं समहितप्रदानोन्मुखं
यथातथमनाविलं परिणतौ परं भेषजम् ।।
दिवानिशधनार्जनप्रवणमानसैर्मानवैः
कृपालवपराङ्मुखैः कुमतिभिः कथं श्रूयताम् ।। ९ ।।
सहासितमहोत्सवः सहविहार आशैशवात्
सहाध्ययनशीलता परममित्रता भासुरा ।
तदेतदखिलं नृणामिह विलीनतां प्रायशः
प्रयाति धनगर्विणामधनमानवस्याग्रतः ।। १० ।।
(क्रमशः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिष्यादर्शः

–पं. रामनाथ आचार्यः
भूतपूर्वप्रधानाचार्यः, वाल्मीकिसंस्कृत-
महाविद्यालयस्य ।

भालस्थललसच्चन्द्रचन्द्रिकाद्योतिताम्बरम् ।
सर्वस्वं शिवयोर्देवं वन्देमहि गजाननम् ॥ १ ॥
मुनिषु प्रवरो धीमानाम्नायाम्नातकर्मणाम् ।
ज्ञाता शास्त्रेषु निष्णातो धौम्य आसीदृषिः क्षितौ ॥२॥
सरस्वतीकृपापाङ्गप्रेमपात्रप्रकृष्टताम् ।
प्राप्तः प्रेक्षावतां मान्यः शान्तस्वान्तो बभूव यः ॥३॥
यदास्यचन्द्रनिर्यातवचनामृतचन्द्रिकाम् ।
विद्वच्चकोरनिकरो ववाञ्छाऽऽचमितुं चिरम् ॥४॥
आदर्शतां प्रयातस्य महामहिमशालिनः ।
यस्य सारस्वतं ज्योतिर्व्यराजत हृदम्बुजे ॥५॥
तस्य शिष्योऽनन्यभक्त उपमन्युर्हि शीलवान् ।
आसीत्सोऽपि च तं नित्यं सेवया समतोषयत् ॥६॥
यागाय सम्भृता धेनुर्नित्यं नेतुं वनावनौ ।
सच्चरित्रं गुणोपेतं देशिकस्तं न्ययूयुजत् ॥७॥
प्रत्यूषे पूर्वमुत्थाय विहिताभिषवक्रियः ।
गृहेभ्यो गृहिणां भिक्षां भिक्षित्वा गुरवेऽददात् ॥८॥
उपमन्युस्ततो वाक्यं गुरूणां शिरसा वहन् ।
वनं निनीय ता धेनूः सायमाश्रममानयत् ॥९॥
चिन्तासन्तानरहितो गुरुभक्तिदृढव्रतः ।
अतो लेभे परां पुष्टिमुपमन्युर्दिने दिने ॥१०॥
अथैकदा गुरुः प्राह परीक्षणसमुत्सुकः ।
उपमन्युं भक्तिमन्तं निर्भीकं वचने स्थितम् ॥११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भुञ्जानमन्नं मे दृष्टिर्भवन्तं नैव पश्यति ।
समेति च शरीरं ते वत्स मांसलतां कथम् ॥१२॥
तन्निदानं बुभुत्सुं मां याथातथ्येन साम्प्रतम् ।
ब्रूहि, नैव गुरुं शिष्यः प्रतारयति कर्हिचित् ॥१३॥
लब्ध्वा कथञ्चित्समयं भक्षयन्तीषु धेनुषु ।
शष्पं, भिक्षां याचमानो नित्यमश्नाम्यहं गुरो ! ॥१४॥
विनयावनतस्कन्धे भक्तिभावपुरस्कृते ।
वदत्येवं सत्यवाचमुपमन्यौ कृताञ्जलौ ॥१५॥
तत्थ्य-श्रवणसञ्जातहर्षो मनसि तत्क्षणम् ।
मधुरेण स्वरेणाथ गुरुस्तं पुनरब्रवीत् ॥ (युग्मम् ।) १६॥
विद्याध्ययनशीलेन सता च ब्रह्मचारिणा ।
अनिवेद्य गुरौ भिक्षां वत्स ! भोक्तुमसाम्प्रतम् ॥१७॥
गुरोः कुले निवसतां विद्यामादातुमिच्छताम् ।
छात्राणां परमो धर्म एष एव सनातनः ॥१८॥
तत्तादृशं गुरोर्वाक्यमुपमन्युर्निशामयन् ।
वाचंयमत्वमाश्रित्य कुटीरं स्वं समाययौ ॥१९॥
अथापरेद्युरुषसि विहिताभिषवक्रियः ।
गृहस्थेभ्यो लब्धभिक्षां गुरुपादतले न्यधात् ॥२०॥
शिष्यानीतानि वस्तूनि स्वस्मै दत्तानि देशिकः ।
आदाय न्यदधात्क्वापि जिज्ञासुस्तस्य भावनाम् ॥२१॥
भिक्षासंप्राप्तवस्तूनां लेशेनापि स बालकः ।
अदृश्यहर्षमुद्रेण गुरुणा नान्वगृह्यत ॥२२॥
अथापि दधतं पुष्टिं देहं तस्य निरीक्ष्य सः ।
कौतुकाविष्टहृदयो दध्यौ किञ्चिन्महामुनिः ॥२३॥
इतराश्चर्यभूतासु तपश्चर्यासु यो ययौ ।
अलङ्कर्मीणतां, सोऽथ शिष्यं तं समभाषत ॥२४॥
कायेन मनसा वाचा मद्वाचं परिपालयन् ।
समाचरसि वत्स त्वं वैपरीत्यं न जातु चित् * ॥२५॥

*इयं कविता रचयित्रा सूर्योदयपत्रिकायां प्रकाशनाय मया दत्ता परं तत्राद्यावधि न प्रकाशिता । अतो हैमवत्यां प्रकाशनाय दत्तेति अस्मद्हस्ते समर्पिता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हैमवत्याः प्रथमाङ्कस्य शुद्धिपत्रम्

राज्याभिषेकमहोत्सवे सत्वरं प्रकाशिताया हैमवत्याः प्रथमेऽङ्के सञ्जातानामशुद्धीनां संशोधनमिह प्रकाश्यते

पृष्ठसंख्या	पङ्क्तिसंख्या	अशुद्धिः	शुद्धिः
शुभाभिनन्दनम्	२	निकरं ऋद्ध	निकरंर्ऋद्ध
"	४	मिस्विरा	गिरिश्वरा
"	१३	कीर्तेः	कीर्ते !
विषयसूची	३	प्रसाद अधि-	प्रसादः अधि-
१	२	"	"
१	१६	समाजराजयोः	राजसमाजयोः
१	२०	कर्तव्यम्	कर्तव्या
२	४	एतिश्मंश्च	एतस्मिश्च
२	१०	अभावे एव	अभावे स एव
२	१७	वुभुक्षन्ती	बुभुक्षन्ते
२	२०	सफलता	सफलतोः
२	२६	सःवे	सरवे
३	३	अपवादकानां	अपवादकानां
३	"	विनयनं	विनयनस्य
३	४	सज्जनमन्या	सज्जनस्यान्या
३	५	बर्द्धिताय	बर्द्धितस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृष्ठसंख्या	पङ्क्तिसंख्या	अशुद्धिः	शुद्धिः
१	५	निक्षेपश्च	निक्षेपश्चैत्येषां
१	६	दण्डनञ्चा	दण्डनञ्चेत्येषाम्
३	७	अनिवार्यताभ्यश्चं	अनिवार्यताभ्यश्च
३	९	समाजराष्ट्रराजाः	समाजराष्ट्रराजानः
३	१०	सम्बन्धनत्वं	सम्बन्धनं
३	११	धर्मबर्धनं	धर्मवर्द्धनम्
३	११	कर्तव्यम	कर्तव्यम्
३	१२	कर्तव्यम्	कर्तव्या
३	१३	समाजराष्ट्रराजाः	समाजराष्ट्रराजानः
३	१३	आत्मत अभिन्ना	आत्मतो ऽभिन्नाः
३	१३	अन्यतमस्मिन्	अन्यतमे
३	२२	राष्ट्र	राष्ट्रम्
४	२०	सुजयतां	सुयजतां
५	१०	पतंजलि–	पतञ्जलि–
५	११	तत्व–	तत्त्व–
५	२५	कवितर्किक	कवितार्किक
६	३	शास्त्राब्धि—	शास्त्राब्धि—
७	२७	वलि—	बलि—
८	२३	पितृन्	पितॄन्
८	२३	अतिथिंश्च	अतिथींश्च
८	२५	वलि	बलि
९	९	उपान्त	उपात्त
९	२२	योत्रीश्वरोः	योगीश्वरः
१०	१	तमप्रविष्टान्	तमः प्रविष्टान्
१०	६	ध्येयौ	ध्येयो
११	२१	दत्तैः ।	बत्तैः
११	२२	जमन्दा	जन्मदा
११	२७	पेमा	प्रेमा
१३	२	नानुवर्ज्यः	नानुगम्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृष्ठसंख्या	पङ्क्तिसंख्या	अशुद्धिः	शुद्धिः
१२	२३	कायविशेष—	कार्यविशेष—
१३	१	स्वाध्वी	साध्वी
१३	५	ह्यु चिनान्न—	ह्यु चित्मन्न—
१४	१६	पितृन्	पितॄन्
१५	७	प्रससृत्य	उपसृत्य
१६	३	मिच्छ्र—	मिच्छु—
१६	१०	व्रवीति	ब्रवीति
१६	११	व्रत–	ब्रत–
१६	१३	सशुद्धभक्ता	सुशुद्धभक्ताः
१६	१६	सुव्रह्मचर्य–	सुब्रह्मचर्य
१६	२१	शाभ्व–	शाभ्व·
१६	२४	वंशसारा	वंशसाराः ।
१७	१४	दविरत	दविरतं
१७	१४	गुणमादिदीत्सू ,	गुणमाप्तुकामान्
१७	१७	यथावत	यथावत्
१७	२०	अभ्यन्तरस्यमथरं	आभ्यन्तरं धनभव-
१७	२७	विद्या	विद्यां
१८	१	सद्धियः	सद्धियो
१९	४	श्रापद्म-	श्रीपद्म-
१९	५	राजस्य	राज्यस्य
१९	१३	मकरात्	मकरोत्
१९	१८	स्याध्यापक-	स्याध्यायक-
१९	२३	सपादितः	सम्पादितः
२०	२५	ऐवं	एवं
२०	२७	तं	तस्य
२१	३	स्याध्याय-	स्वाध्याय-
२१	१३	द्रविडात्	द्राविडात्
२१	२३	सन्यासि-	संन्यासि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृष्ठसंख्या	पङ्क्तिसंख्या	अशुद्धिः	शुद्धिः
२१	२६	बम्बई आदि	बम्बयादि
२२	२	प्रचारिणा	प्रचारिण्याः
२२	८	षटपञ्चाषत्	षट्पञ्चाषत्
२२	१६	अवत	अव्रतः
२२	१६	विद्वांसः	विद्वांसः शिष्याः
२२	२५	संजाता	संजाताः
२३	४	विष्णः	विष्णुः
२३	६	सर्वोन्नतम्	सर्वोन्नतं
२३	८	रुरव-	रुरव-
२३	१०	परम्परा	परम्पराः
२३	१०	स्थिताः	स्थिता
२३	११	यदीया	यदीयाः
२३	१२	श्चिन्तनम्	श्चिन्तनं
२५	११	राज्यो-	राज्यो-
२६	१	न्नतेभ्व	न्नतेश्च
२६	१	सम्बर्धयन्	संवर्धयन्
२६	७	संस्थित	संस्थितं
२६	१०	स्वे ऽक्षिणी	लोचने
२७	१०	रर्वा	सर्वा
२८	६	व्राह्मणत्व	व्राह्मणत्व
२८	१२	पवित्र	पवित्रं
२८	१५	वेदिक	वैदिक
२८	१७	व्राह्मणेन	व्राह्मणेन
२८	१७	बसिष्ठेन	बसिष्ठेन
२९	५	गोव्राह्मण	गोव्राह्मण
२९	७	हेतु	हेतुः
३०	४	अखर्गगर्वगर्विताः	अखर्वगर्वाः
३०	७	समुपलब्धं	समुपलब्धुं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृष्ठसंख्या	पङ्क्तिसंख्या	अशुद्धिः	शुद्धिः
३०	१३	ब्रह्मणौ	ब्रह्मणो
३०	१४	चोद्बोधक	चोद्बोधक
३०	१६	सम्बद्धा	सम्बद्धा
३१	१	त्यादि	त्यादिः
३१	१	ससारः	संसारः
३१	६	कणशूल	कर्णशूल-
३१	९	गिरिशिखदं	गिरिशिखरं
३१	६	बाणिज्य	वाणिज्य
३१	१२	संस्कारोद्बोधिका	संस्कारोद्बोधिका
३१	१२	प्रच्छन्नां	प्रच्छन्नं
३१	१४	विानन्दन्तः	विनिन्दन्तः
३१	१७	परमपि	परमपि
३१	२७	रुद्बोधय	रुद्बोधय
३४	२२	ददन्तु	ददताम्
३५	१	वध्वं	वध्वं महते
३७	१०	व्रातोद्वल्ल	व्रातोद्वेल्ल

KATHMANDU
NEPAL

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वा. वि. ५

मुद्रकः— लुष प्रेस, पुल्चोक, ललितपुर।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu